Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

નમો નાણસ્સ

# હિમગીરી જૈન ટ્રસ્ટ સંચાલિત તપોવન સંસ્કારપીઠ

# (જ્ઞાનકોષ)

- ઝેરોક્સ પ્રતો -

: યોજના સ્થળ :

તપોવન સંસ્કારપીઠ

મુ. અમીયાપુર - પો. સુઘડ - જિ. ગાંધીનગર. પીન : ૩૮૨૪૨૪
ફોન નં. :- (૮૨) ૭૬૨૭૩, ૭૬૩૪૧.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ राजनगर मण्डन श्री आदीश्वराय नमः ॥

॥ शासनप्रभावक श्री वृद्धि-नेमि-उदयसूरीश्वरेभ्यो नमः ॥

# 卐 चत्वारि प्रकरणानि 卐

(श्री जीवविचार, श्री नवतत्त्व, श्री दण्डक, श्री लघु सङ्ग्रहणी (श्री जम्बूद्वीपक्षेत्र संग्रहणी)

वृत्त्यलङ्कृत - सावचूरिकम्

शुभाशिष एवं प्रेरकः

प्रशान्तमूर्ति परम पूज्य आचार्य भगवन्त श्री विजयउदयसूरीश्वरजी म. सा.

पट्टालंकार निडरवक्ता परम पूज्य आचार्य भगवन्त श्री विजयमेरुप्रभसूरीश्वरजी म. सा.

संपादकः प. पू. आ. भ. श्री विजयमेरुप्रभसूरीश्वरजी म. सा. शिष्यरत्न पू. पं. श्री इन्द्रसेनविजयजी गणि.

संकलकः-पूज्यपाद श्री शिष्यरत्न पू. गणि. श्री सिंहसेन विजयजी म.

प्रकाशकः-श्री जैन ग्रन्थ प्रकाशक सभा-अहमदाबाद.

वि. सं. २०४२ 卐 वीर सं. २५१२ 卐 नेमि सं. ३७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ૨ ॥

શાસનપ્રભાવક પૂજ્યપાદ આચાર્ય ભગવંત શ્રી **વિજયમેરુપ્રભસૂરીશ્વરજી મ. સા.** ના શિષ્યરત્ન
પૂ. પં. શ્રી **માનતુંગવિજયજી** ગણિ. ની શુભ પ્રેરણાથી

: પ્રત : ૫૦૦

## ઔદાર્યભર્યો આર્થિક સહયોગ

: મૂલ્ય : પઠન–પાઠન

- **શ્રી વિજયનેમિસૂરિ જ્ઞાનશાળા,** પાંજરાપોળ, અમદાવાદ–૧
- **શ્રી જૈન સોસાયટી શ્વે. મૂ. જૈન સંઘ,** એલીસબ્રીજ, અમદાવાદ–૬
- **શ્રી શાંતિનાથ જૈન દહેરાસર ધર્માદા ખાતા પેઢી,** કોઠીપોળ, વડોદરા–૧
- **શ્રી જુના મહાજનવાડા શ્વે. મૂ. જૈન સંઘ,** જુનો મહાજનવાડો, અમદાવાદ–૧
- **શ્રી નગરશેઠ વંડા શ્વે. મૂ. જૈન સંઘ,** નગરશેઠનો વંડો, અમદાવાદ–૧

જ્ઞા....ન...ખા....તા....માં....થી

**પ્રાપ્તિસ્થાન : શ્રી વિજયનેમિસૂરિ જ્ઞાનશાળા,** પાંજરાપોળ, રીલીફ રોડ, અમદાવાદ–૩૮૦૦૦૧

: મુદ્રક :
નવનીતભાઈ જે. મહેતા
સાગર પ્રિન્ટર્સ, પાદશાહની પોળ,
રીલીફ રોડ, અમદાવાદ–૧

કિંમત : ૩૫

**પૂજ્ય સાધુ–સાધ્વીજીમ.**
ત...થા
જ્ઞાનભંડારોને ભેટ

— મુદ્રક —
પૂજા પ્રિન્ટર્સ એન્ડ ટ્રેડર્સ
મહેંદીકુવા, ચાર રસ્તા,
અમદાવાદ–૧

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# સ મ ર્પ ણ

પ્રાતઃ સ્મરણીય.... પરમોપકારી... પરોપકાર-પરાયણ....

નિઃસ્પૃહ... નિખાલસ સ્વભાવી... નિડરવક્તા

શાસનપ્રભાવક... સમર્થવ્યાખ્યાનકાર

પૂજ્યપાદ આચાર્યભગવંત

## શ્રીમદ્ વિજયમેરુપ્રભસૂરીશ્વરજી મહારાજ સાહેબના

પરમપાવનીય કરકમલોમાં કોટિ કોટિ વંદન સાથે

## સ.... મ.... ર્પ.... ણ

જેઓશ્રીએ મારા જીવન-ઉપવનને દર્શન-જ્ઞાન-ચારિત્રની મઘમઘતી સૌરભથી સુવાસિત બનાવ્યું છે.

ચરણોપાસક પં. ઇન્દ્રસેનવિજય ગણિ.

॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# चत्वारि प्रकरणानि अनुक्रमणिका


| -विषय- | -पेज- |
|---|---|
| (१) आर्थिक सहयोग.... | २ |
| (२) समर्पण.... | ३ |
| (३) अनुक्रमणिका.... | ४ |
| (४) प्रस्तावना परिमल.... | ५ |
| (५) किंचित् मात्रम्... | |
| (६) शुद्धिपत्रकम्... | |
| (७) श्री जीव विचार प्रकरण सटीकम्.... | १ थी ३२ |
| (८) श्री नवतत्त्व प्रकरण सावचूरिकम्.... | १ थी १८ |
| (९) श्री दण्डक प्रकरण सावचूरि-सटीकम्... | १ थी २२ |
| (११) श्री लघुसङ्ग्रहणी (श्री जम्बूद्वीपक्षेत्र सङ्ग्रहणी) सटीकः.... | १ थी २० |


॥ ४ ॥

For Private and Personal Use Only

# श्रीदण्डक प्रकरणम्

પ્રસ્તુત દંડક પ્રકરણના તથા અવચૂરિના કર્ત્તા **શ્રીગજસાર મુનિ** છે. તેઓએ સિદ્ધાન્તના વિચાર સંબંધી ૩૬ ગાથાઓનું પ્રકરણ હોવાથી 'विचार षट्त्रिंशिका' નામ રાખ્યું છે. દંડક પ્રકરણની ટીકા કરનાર **શ્રીરૂપચંદ્ર મુનિએ** 'લઘુસંગ્રહણિ એવું નામ રાખ્યું' છે. આ ગ્રંથની મૂળ ગાથાઓ ૩૬ લગભગ હશે એમ 'ષટ્ત્રિંશિકા' પદ ઉપરથી સમજાય છે બીજી વધારાની હશે ! दण्ड्यन्ते जीवा अस्मिन्निति दण्डकः એટલે જીવો જેને વિષે દંડ–શિક્ષા પામે તે दण्डक કહેવાય. અનંત જ્ઞાનાદિકનો માલિક આત્મા જડ પુદ્ગલના સંબંધથી વિભાવદશામાં રમણતા કરી રહ્યો છે. તેની શિક્ષારૂપે કર્મરાજા આત્માનું અનંત જ્ઞાનાદિક ધન હરીને ૨૪ ગતિસ્થાન રૂપ ૨૪ બંદીખાનામાં પૂરી અનેક જાતની વિડંબના પમાડે છે, માટે તે ૨૪ ગતિસ્થાનો (ગતિના ભેદ) જ આત્માને દંડ–શિક્ષા રૂપ હોવાથી 'दण्डक' કહેવાય છે.

૦ **૨૪ દંડક :** ૧ દંડક સાત નારકનો, ૧૦ દંડક ભવનપતિ દેવોના, ૫ દંડક પૃથ્વીકાય વગેરે પાંચ સ્થાવરોના અથવા પાંચ એકેન્દ્રિયોના, ૩ દંડક વિકલેન્દ્રિયના (દ્વીન્દ્રિય–ત્રીન્દ્રિય–ચતુરિન્દ્રિય), ૧ દંડક ગર્ભજ તિર્યંચનો, ૧ દંડક ગર્ભજ મનુષ્યનો ૧ દંડક વ્યંતરનો, ૧ દંડક જ્યોતિષીનો, ૧ દંડક વૈમાનિકનો.

૦ **સિદ્ધાન્તરૂપ ૨૪ દ્વારો :** (૧) શરીર (૨) અવગાહના (૩) સંઘયણ (૪) સંજ્ઞા (૫) સંસ્થાન (૬) કષાય (૭) લેશ્યા (૮) ઇન્દ્રિય (૯) બે સમુદ્ઘાત (૧૦) દૃષ્ટિ (૧૧) દર્શન (૧૨) જ્ઞાન (૧૩) અજ્ઞાન (૧૪) યોગ (૧૫)

ઉપયોગ (૧૬) ઉપપાત (૧૭) ચ્યવન (૧૮) સ્થિતિ (૧૯) પર્યાપ્તિ (૨૦) કિંઆહાર (૨૧) સંજ્ઞા (૨૨) ગતિ (૨૩) આગતિ (૨૪) વેદ.

એ ૨૪ દ્વાર છે અથવા ૨૪ દ્વારરૂપ સંક્ષિપ્ત સંગ્રહણી છે. વૃત્તિકર્તાએ આ પ્રકરણનું નામ લઘુ સંગ્રહણી રાખ્યું છે પરંતુ પ્રકરણની સ્વોપજ્ઞ (શ્રીગજસાર મુનિ કૃત) અવચૂરિમાં તો 'આ ૨૪ દ્વારની બે ગાથાઓ લઘુસંગ્રહણી પ્રકરણમાંથી લીધેલી છે." એમ કહેલું છે તેથી લઘુ સંગ્રહણી બીજો જ ગ્રંથ છે અને ૩૦૦ લગભગ ગાથાવાળી બૃહદ્ સંગ્રહણી એ જ લઘુસંગ્રહણી છે.

## श्रीलघुसंग्रहणी प्रकरणम्

આ પ્રકરણનુ વાસ્તવિક નામ **શ્રીજંબૂદ્વીપ ક્ષેત્ર સંગ્રહણી છે.** પરંતુ વર્તમાન સમયમાં આ પ્રકરણ લઘુ-સંગ્રહણીના નામથી ઓળખાય છે. આ તિર્યચ્છા લોક (મધ્ય લોક) માં રહેલા અસંખ્ય દ્વીપ સમુદ્રોમાં સર્વથી પહેલો જંબૂદ્વીપ નામનો દ્વીપ છે. તે દ્વીપમાં રહેલા અનેક શાશ્વત પદાર્થોના સંગ્રહને કહેનાર છે. જેમાં ખંડ, યોજન, ક્ષેત્ર, પર્વતો, કૂટ, તીર્થ, શ્રેણિઓ, વિજયો, સરોવરો અને નદીઓ એ ૧૦ પદાર્થોના સંગ્રહ (આ પ્રકરણમાં કહેવાનો છે માટે આ ગ્રન્થનું નામ) તે **'સંગ્રહણી'** પ્રકરણ કહેવાય છે. એ **૧૦ પદાર્થો** તે આ પ્રકરણમાં **૧૦ દ્વાર** તરીકે જાણવા.

### શ્રીજંબૂદ્વીપમાં દશ પદાર્થો........

(૧) ખંડ : ૧૯૦ ખંડ પ્રમાણુનો (સંક્ષિપ્ત, ઉત્તર)



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(૨) **યોજન :** ૭૯૦૫૬૯૪૧૫૦ યોજનથી અધિક

(૩) **વર્ષ :** મનુષ્યની વસતિવાળા ક્ષેત્ર–૭.

(૪) **પર્વત :** ૨૬૯.

(૫) **કૂટ :** પર્વતના શિખરો તે ગિરિકૂટ–૪૬૭ અને ભૂમિ ઉપર રહેલા શિખરની આકૃતિવાળા પર્વત તે ભૂમિકૂટ–૫૮.

(૬) **તીર્થ :** જેને જીતવા માટે ચક્રવર્તિઓને અને વાસુદેવોને જળમાં ઉતરવું પડે. એવા જળમાં રહેલા દેવસ્થાનો તે તીર્થ કહેવાય...આવા તીર્થ ૧૦૨ જંબૂદ્વીપમાં છે.

(૭) **શ્રેણિ :** વૈતાઢય પર્વતો ઉપર રહેલી વિદ્યાધરોના નગરની પંક્તિઓ તથા સૌધર્મેન્દ્ર અને ઇશાનેન્દ્રના લોકપાલના આભિયોગિક (સેવક) દેવોના નગરની પંક્તિઓ તે શ્રેણિ કહેવાય. આવી જંબૂદ્વીપમાં શ્રેણિઓ ૬૮–૬૮ કુલ–૧૩૬ છે.

(૮) **વિજય :** ચક્રવર્તિઓને જીતવા યોગ્ય ૬–૬ ખંડવાળા ક્ષેત્ર તે વિજય. આવા જંબૂદ્વીપમાં વિજય ક્ષેત્ર ૩૪ છે.

(૯) **દ્રહ :** દ્રહ એટલે સરોવર. તે જંબૂદ્વીપમાં ૧૬ છે.

(૧૦) **નદી :** જંબૂદ્વીપમાં સર્વનદીઓ ૧૪,૫૬,૦૦૦ છે.

**'જંબૂદ્વીપ સંગ્રહણી'**ની રચના ૧૪૪૪ ગ્રંથના રચયિતા સૂરિપુરંદર **શ્રીહરિભદ્રસૂરીશ્વરજી** મહારાજાએ કરેલ છે. અને તેના ઉપર **શ્રીપ્રભાનંદસૂરિ વિરચિત વૃત્તિ વિ. સં. ૧૩૯૦ ભાદરવા વદ–૪** ના કરેલ છે તેમ વૃત્તિકારની પ્રશસ્તિ જોતાં સ્પષ્ટ જણાય છે.

॥ ૭ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# * : પ્રસ્તાવના પરિમલ : *

**શ્રમણ** ભગવાન **શ્રી મહાવીર પરમાત્મા** જેઓ આપણા આસન્ન ઉપકારી અને ચરમ તીર્થપતિ છે. તેઓનું અવિચ્છિન્ન પ્રભાવશાળી શાસન આપણને પ્રાપ્ત થયેલ છે. જયવંતા શ્રી જિન શાસનમાં પૂર્વના મહાપુરુષોએ અથાગ પરિશ્રમ લઈ જીવોને ધર્મનો બોધ–જ્ઞાન સરળ રીતે થાય તે માટે વિવિધ ક્ષેત્રે સુંદર સાહિત્યનું સર્જન કરી મહાન્ ઉપકારની વર્ષા વરસાવી છે.

**પ્ર**સ્તુત ગ્રન્થ **'ચાર-પ્રકરણ'** નો સંસ્કૃત વૃત્તિ અને સાવચૂરિથી સુશોભિત છે. જે **કિંચિત્ માત્રમ્'** શિર્ષક તળે તેના વિષેની માહિતીથી સભર છે. આ ગ્રન્થ પૂ. સાધુ–સાધ્વી–શ્રાવક–શ્રાવિકા એ ચતુર્વિધ સંઘને લાભદાયી અને ઉપયોગી નિવડશે. ભાષા સાદી....સીધી...સરળ...સુગમ છે.

**શા**સન સમ્રાટ્ તપાગચ્છાધિપતિ, પંચપ્રસ્થાનમય શ્રીસૂરિમંત્ર સમારાધક પૂજ્યપાદ ભટ્ટારકાચાર્ય ૧૦૦૮ **શ્રી શ્રી શ્રી વિજયનેમિસૂરીશ્વરજી** મ. સા. ના **પુણ્ય પ્રભાવ સામ્રાજ્યે** પૂજ્યપાદશ્રીના પટ્ટધર સિદ્ધાન્ત વાચસ્પતિ, ગીતાર્થ ચૂડામણિ પરમ પૂજ્ય આચાર્ય ભગવંત **શ્રીવિજયઉદયસૂરીશ્વરજી** મ. સા. ની **દિવ્ય કૃપાથી** તેઓશ્રીના પટ્ટાલંકાર નિડરવકતા, શાસન પ્રભાવક પરમપૂજ્ય આચાર્યભગવંત **શ્રીવિજયમેરુપ્રભસૂરીશ્વરજી** મ સા. ના શુભ આશીર્વાદ અને પ્રબળ પ્રેરણાથી આ ગ્રન્થનું પ્રકાશન કરતા અને શ્રી સંઘના કરકમળમાં મૂકતાં અમો સવિશેષ આનંદ અને અત્યંત



For Private and Personal Use Only

હર્ષોલ્લાસ અનુભવીએ છીએ. ચાર પ્રકરણની વૃત્તિ આદિનું પ્રકાશન અનેક સંસ્થાઓ તરફથી પ્રગટ થયેલ પરંતુ તે અપ્રાપ્ય યદ્વા પ્રાપ્ય પણ સુઘડ છાપકામના અભાવે આ ગ્રન્થ જરૂર સહુને આદર અને આવકારને પાત્ર થશે તે નિઃશંક વાત છે.

વિ. સં. ૨૦૪૧ માં અમદાવાદ–પાંજરાપોળ ઉપાશ્રયે ચાતુર્માસ સ્થિત પ્રશાન્તમૂર્તિ પરમ પૂજ્ય આચાર્યદેવેશ **શ્રીવિજયઉદયસૂરીશ્વરજી** મ. સા. ના પટ્ટાલંકાર સુવિશુદ્ધ સચ્ચારિત્રધારક પરમ પૂજ્ય આચાર્યદેવેશ **શ્રીવિજયમેરુપ્રભસૂરીશ્વરજી** મ. સા. ના સદ્ઉપદેશામૃતના પાનથી ગ્રન્થ પ્રગટ કરવામાં અમારો ઉત્સાહ...ઉલ્લાસ ઐવઢાયો એટલું જ નહિ પરંતુ પૂજ્યપાદશ્રીના શિષ્યરત્નો પૂ. પં. **શ્રીમાનતુંગવિજયજી** ગણિ. ની પ્રેરણાથી આર્થિક સહયોગ....પૂ. પં. **શ્રીઇન્દ્રસેનવિજયજી** ગણિ. નું ચીવટ અને કાળજીપૂર્વકનું સંપાદન કાર્ય...તથા પૂ. ગણિ. **શ્રીસિંહસેનવિજયજી** મ. સા. નું સુંદર સંકલન તથા પ્રૂફ સંશોધન કાર્ય ખરેખર પ્રશંસનીય અને અનુમોદનીય છે. ઉપરોક્ત પૂજ્યવર્યોના અમો ખૂબ ખૂબ ઋણી છીએ.

તેમજ મુદ્રક સહકાર **નવનીતભાઈ જે. મહેતા** (સાગર પ્રિન્ટર્સવાળા) તથા મુદ્રણકાર્ય સુંદર અને સુઘડ કરી આપવા બદલ **શ્રી નવપ્રભાત પ્રેસવાળા**ના અમો ખૂબ ખૂબ આભારી છીએ.

મતિ દોષ.......દૃષ્ટિ દોષ...પ્રેસ દોષના કારણે કોઈપણ ક્ષતિ રહી હોય તથા ભગવાનની આજ્ઞા વિરુદ્ધ કંઈપણ છપાયું હોય તો તેના માટે અંતઃકરણપૂર્વક ત્રિવિધે–ત્રિવિધે મિચ્છામિદુક્કડં.

ગુરુગમથી આ ગ્રન્થનું અધ્યયન-અધ્યાપન તથા ચિંતન-મનન-નિદિધ્યાસન કરવાથી જૈનશાસનના અનેકવિધ સિદ્ધાન્તોનો અપૂર્વ બોધ થાય તેમ છે. પ્રાન્તે પ્રસ્તુત ગ્રન્થ વાંચી-વિચારી-આત્મસાત્ કરી પરમપદને પ્રાપ્ત કરો એ જ મંગલ કામના.

## કિંચિત્ માત્રમ્-

### श्री जीवविचार प्रकरणम्

આ પ્રકરણમાં જીવોના ભેદ-સ્વરૂપ-આયુષ્ય-કાયસ્થિતિ-પ્રાણ-યોનિ-પ્રમાણાદિ વિચાર કથનવડે આનું 'જીવવિચાર' એ પ્રમાણે સ્વરૂપ અનુરૂપ સ્વનામ અર્થાનુસાર છે. ૫૧ ગાથાત્મક આપ્તપ્રણીત અનેકગુણગણાલંકૃત વાદિ વેતાલ **શ્રીમદ્ શાંતિસૂરિજીએ** રચેલ છે આ પ્રકરણની ટીકા ખરતરગચ્છીય વાચક મેઘનન્દન શિષ્ય પાઠક શ્રીરત્નાકરે વિ. સં. ૧૬૧૦ આસો વદ-૮ ના કરી છે એમ ટીકાકાર કૃત પ્રશસ્તિથી સ્ફુટ જણાય છે.

તેઓ જૈનશાસનમાં મહાપ્રભાવક આચાર્ય થઈ ગયા. તેઓની અપૂર્વ વાદશક્તિ જોઈને લઘુભોજરાજાએ તેઓને **'વાદિવેતાલ'** નું બિરૂદ આપ્યું હતું. વિ. સં. ૧૦૯૭ માં શ્રીચક્રેશ્વરી અને શ્રીપદ્માવતી દેવીની સહાયથી તેઓએ ધૂળીકોટ પડવાની આગાહીથી શ્રીમાળીના ૭૦૦ કુટુંબોનું રક્ષણ કર્યું હતું. તેઓએ શ્રીઉત્તરાધ્યયન સૂત્ર ઉપર ૧૮,૦૦૦



For Private and Personal Use Only

શ્લોક પ્રમાણ ટીકા રચી છે જે 'પાઈય ટીકા' નામથી પ્રસિદ્ધ છે. શ્રીઉત્તરાધ્યયનની બૃહદ્‌વૃત્તિની પ્રશસ્તિમાં તેઓ પોતાને થારાપદ્રીય ગચ્છ (જે વડગચ્છની શાખા છે) ના બતાવે છે. મહાકવિ ધનપાલ કૃત તિલકમંજરીનું સંશોધન તેઓએ કર્યું હતું. વિ. સં. ૧૧૧૧ માં કાન્હોડ નગરમાં પૂજ્યપાદ આચાર્યશ્રીનો સ્વર્ગવાસ થયો.

આ ગ્રંથ મૂળ પ્રાકૃત ભાષામાં ૫૧ આર્યા છંદમાં બનાવેલ છે. તેની ઉપર વિ. સં. ૧૬૧૦ માં પાઠક રત્નાકરે બૃહદ્‌વૃત્તિ રચી અને વિ. સં. ૧૭૫૦ માં શ્રી ક્ષમાકલ્યાણકે લઘુવૃત્તિ બનાવી છે.

## श्री नवतत्त्व प्रकरणम्

પ્રસ્તુત પ્રકરણ એ જૈન દર્શનના જ્ઞાનના ચાર અનુયોગો પૈકી પ્રથમ દ્રવ્યાનુયોગ વિભાગનો અંશ છે. નવતત્ત્વના વિષય ઉપર જુદા જુદા અનેક મહાપુરુષોએ ટીકાઓ કરેલી છે.

શ્રીનવતત્ત્વ ઉપર પ્રાચીન વિદ્વાને અવચૂરી લખેલ છે. આ અવચૂરીનું સંસ્કૃત એવું તો સરળ અને રસીક છે કે, આ પ્રકરણનું પ્રાથમિક અધ્યયન કરનારને ઉલ્લાસ સાથે કંઠસ્થ કરવાની જિજ્ઞાસા થાય તેવું છે. શ્રીનવતત્ત્વના વિશાળ જ્ઞાનરૂપ સાગરમાં પ્રવેશ કરવાને પ્રસ્તુત અવચૂરી 'નૌકા' રૂપે લાગવાથી મૂળ તથા અવચૂરી સાથે આપવામાં આવેલ છે.

પ્રસ્તુત પ્રકરણમાં જીવાદિ નવતત્ત્વનું સુવિશદ શૈલીમાં વિશેષ રૂપે સુંદર સ્વરૂપ બતાવવામાં આવ્યું છે. તેમજ 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



નવતત્ત્વ જાણવાથી થતો લાભ, સિદ્ધના ૧૫ ભેદ સદૃષ્ટાન્ત જણાવેલ છે. તેથી **'નવતત્ત્વ'** એ પ્રમાણે યથાર્થ નામ રાખવામાં આવ્યું છે. નવતત્ત્વનું વિશેષ સ્વરૂપ તેના ભેદોની વ્યાખ્યા સ્પષ્ટ અને સંક્ષિપ્ત સ્વરૂપમાં બતાવવામાં આવેલી છે. તેમજ જૈન દર્શનના ધર્માસ્તિકાયાદિ **'ષડ્દ્રવ્ય'** નો પણ સુંદર નિર્દેશ તથા સમજણ આપવામાં આવેલ છે.

આ પ્રકરણ ૫૯ ગાથાત્મક છે છેલ્લી ગાથા પ્રક્ષિપ્ત ગણતાં ૬૦ ગાથાનું છે; નવતત્ત્વ પ્રકરણની ઘણી ગાથાઓ આર્યાવૃત્ત છંદમાં છે. (૧) જીવ (૨) અજીવ (૩) પુણ્ય (૪) પાપ (૫) આશ્રવ (૬) સંવર (૭) નિર્જરા (૮) બંધ (૯) મોક્ષ જેના અનુક્રમે ૧૪ ભેદ, ૧૪ ભેદ, ૪૨ ભેદ, ૮૨ ભેદ, ૪૨ ભેદ, ૫૭ ભેદ, ૧૨ ભેદ, ૪ ભેદ, અને ૯ ભેદ છે. કુલ ભેદ ૨૭૬ થાય છે.

ભવ્ય જીવોએ આ નવતત્ત્વનો અભ્યાસ કરી શ્રીજિનેશ્વર ભ. ની આજ્ઞાનું સમ્યક્ શ્રદ્ધાન કરી, સમ્યક્ આચાર-વિચાર રૂપ સમ્યક્ ચારિત્રનું પરિપાલન કરી મુક્તિ પદ પ્રાપ્ત કરવું એ જ આ **નવતત્ત્વ** જાણવાનો સાર છે.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# —: शुद्धिपत्रकम् :—

## (१) श्री जीवविचारप्रकरणम्

| पृष्ठ | पंक्ति | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १A | ११ | अमुह | अबुह |
| २A | ११ | मा | मादि |
| ३A | ६ | चेब | चेव |
| ४A | ९ | अक्षा.... | अरूपा.... |
| ४A | ११ | वनस् ति | वनस्पति |
| ५A | ९ | मेयाइ | भेयाइ |
| ७A | २ | इंति | इति |
| ८A | १० | ....विदेषः | ....विशेषः |
| ९A | ४ | प्रकटाथैं | प्रकटाथैं |
| ९ | ६ | चक्षुपां | चक्षुषां |
| १०A | ५ | मुहर्त | मुहूर्त |
| १३A | ९ | जीब | जीव |
| | | ....श्चशता | पश्चशता.... |
| १३A | १३ | संस्थ... | संस्थि.... |
| १५ | १२ | –तत्पृथ्व्या... | तात् पृथ्वी |
| १६ | १३ | मा–।..., | सप्त... |
| २२A | ५ | मावा... | मात्रा... |
| २८A | १२ | ...शमि | ...शमिके |
| १ | ६ | स्यां | अस्यां |
| २ | ९ | प्रणतं | प्रणीतं |

॥१३॥

For Private and Personal Use Only

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ३A | ११ | सिद्धाश्चव | सिद्धाश्चैव | ११A | १० | जीब | जीव |
| ४A | १० | शरीणिः | शरीरिणः | १३A | १० | नत्तए | नयत्तए |
| ४ | १२ | विक्ले.... | विकले.... | १४ | ७ | ...दुमय | ...दुभय |
| ६A | १ | ईश्यते | दृश्यते | १६A | १२ | उपि | उपरि |
| ७A | ६ | लोवा... | लोका... | १७A | १२ | विनयं | विजयं |
| ८ | २ | अबद्धस्पि | अबद्धास्थि | २६A | ११ | अणंन... | अणंत... |
| ९A | १० | सूत्रकुता | सूत्रकृता | ३० | १२ | पद्वाचि | यद्वाचि |
| ९ | १२ | द्वदश | द्वादश | | | | |

## (२) श्री नवतत्त्वप्रकरणम्

| | | | | | | |
|---|---|---|---|---|---|---|
| ७ | ८ | सहारण... | साहारण... | १८ | छेल्ली उपादेयमो १२८ | १२० |

## (३) श्री दण्डकप्रकरणम्

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १ | ७ | इत | इति | ६A | १ | ...नंखं | संखं |
| २ | ५ | व्यथाखयानं | व्याख्यानं | ७A | ३ | ...वत्तारि | चत्तारि |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ८A | १३ | कपायद्धार | कषायद्वार | ६A | ९ | नरतेइन्ति० | नरतेइंदि० |
| १०A | १२ | आहारान् | आहारकान् | ७A | १२ | तिरएसुं | तिरिएसुं |
| २A | १४ | दण्ड | दण्डको | ८ | १२ | तेजद्या | तेजआद्या |
| ३A | ९ | ...पथोग | ...पयोग | | | | |

## (४) श्री लघुसङ्ग्रहणी

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १A | ७ | प्रभाद्धरीरजी | प्रभसूरीश्वरजी | ४A | १२ | कृ | कृते |
| ३ | ३ | द्वां शत् | द्वात्रिंशत् | ५A | ९ | मिति् | मिति |
| ४ | १ | च | किंच | ७ | ५ | तावन्त्यूल!(?) | तावन्त्यमूल |
| ६A | ५ | क्षेत्रद्धार | क्षेत्रद्वारं | १०A | १० | नाम... | स्वनाम... |
| ८A | ९ | सामानि | सामानिका | १० | ७ | लक्षं | लक्ष |
| १० | ७ | नीलवंत वतरा (?) | नीलवदंतरा | ११ | ४ | ...वर्द्धनी | ...वर्द्धना |
| १० | ८ | सहस... | सहस्र... | ११A | ७ | मेघकारा | मेघंकरा |
| २ | २ | वीर्घ... | दीर्घ... | १२A | १ | तथा विद्युत्प्रभ | तथा विद्युत्प्रभे सिद्धायतन १ |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | | | |
|---|---|---|---|
| ११A | ७ | तोयधरा विचित्रा | सुवत्सा, वत्समित्रा |
| १२ | २ | विस्तार | विस्तारं |
| १२ | ५ | यजने | योजने |
| १४A | ८ | गिरिणं | गिरीणं |

अथ पुनर ..माह९मी लीटीने बदले ८मी समजवी, त्यारबाद खित्ताणं विजयाणं वियड्ढ चउचउरतीसवट्टियरे। सोलस वक्खारगिरी, दो चित्तविचित्त जमगा ॥११॥ आटलुं उमेरवुं

| | | | |
|---|---|---|---|
| १५ | ८ | सग्रह | सर्वाग्रह |
| १६ | ५ | गाथाद्ध | गाथार्द्धे |
| १५ | ५ | विपसु | विजपसु |

प्रेसदोषना कारणे ह्रस्व के दीर्घइ आदि अक्षरो बराबर छपाया न होय तो वाचकवर्गे स्वयमेव सुधारी लेवा तथा विशेष अशुद्धि रहेवा पामेल होय तो जणाववा नम्र विनंति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ राजनगर मंडन श्री मूलेवापार्श्वनाथाय नमः ॥

॥ श्रीवृद्धिचन्द्रजी सद्गुरवे नमः ॥

॥ शासनसम्राट् श्रीविजयनेमि-उदय-मेरुप्रभसूरीश्वरेभ्यो नमः ॥

# ॥ श्री जीवविचारः ॥

## ॥ सटीकः ॥

सज्ज्ञानभास्करं वीरं, नत्वा वाणीं निजं गुरुम् । कुर्वे जीवविचारस्य, कारिकां सुखबोधिकाम् ॥१॥

इह हि हेयोपादेयादिपदार्थसार्थपरिज्ञाननिपुणस्य जन्मजरामरणरोगशोकादिदौर्गत्यनिपीडितस्य भव्यसत्त्वस्य स्वर्गापवर्गादिसंपत्संपादनप्रवणस्य जीवतत्त्वस्य ज्ञानमुपादातुमुचितं, तदुपादानोपायः सौवगुरूपदेशमन्तरेण न सम्यग्ज्ञायते, न चानुपायप्रवृत्तानामिष्टार्थाप्तिरित्यतः कृपापावित्र्यमनाः श्रीशान्तिसूरिस्तत्त्वोपदेशं दातुकामः शिष्टमार्गानुगामितया पूर्वं तावदभीष्टदेवतानमस्करणप्रतिपादिकां शास्त्राभिधेयसूचिकामिमां गाथामाह—

भुवणपईवं वीरं, नमिऊण भणामि अबुहबोहत्थं । जीवसरूवं किंचि वि, जह भणियं पुव्वसूरीहिं ॥१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—इह [1]पूर्वार्द्धेनाभीष्टदेवतानमस्कृतिद्वारेण विघ्नविनायकोपशान्तये मङ्गलमाभाहत, उत्तरार्धेन चाभिधेय सम्बन्धप्रयाजने च [2]सामर्थ्यगम्ये । तथाहि–सम्बन्धस्तावदुपायोपेयलक्ष . साध्यसाधनलक्षणो वा । तत्रेदं शास्त्रमुपायः साधनं वा, साध्यमुपेयं वा शास्त्रार्थपरिज्ञानमिति । प्रयोजन तु द्विधा–कर्तुः श्रोतुश्च, पुनरनन्तरपरम्परभेदादेकैकं द्विधा । तत्रानन्तरं शास्त्रकर्तुः सत्त्वानुग्रहः, परम्परमपवर्गप्राप्तिः । यदुक्तम्–"सर्वज्ञोक्तोपदेशेन, यः सत्त्वानामनुग्रहम् । करोति दुःखतप्तानां, स प्राप्नोत्यचिराच्छिवम् ॥१॥" इति । श्रोतुः पुनरनन्तरं शास्त्रपरिज्ञानं, परम्परं(तु)तस्या(प्य)पवर्गाप्तिः, उक्तं च–"सम्यक्छास्त्रपरिज्ञानाद्विरक्ता भवतो जनाः। लब्ध्वा दर्शनसंशुद्धिं, ते यान्ति परमां गतिम् ॥ १ ॥" इति साम्प्रतं सूत्रव्याख्या–अस्यां गाथायां पूर्वक्रियानुगामि कर्तृपदं, ततोऽहमिति श्रीशान्तिसूरिर्ग्रन्थकृदाह, जीवस्वरूपं किञ्चिदित्यल्पाक्षरमहार्थमितिकृत्वा । अपेर्बहुवक्तव्यतया(त्वे)ऽपि मुक्तामुक्तत्रसेतरादिभेदभिन्नं भणामीत्यन्वयः । किं कृत्वा ? नत्वा । कं ? वीरं, कर्मविदारणात्तपसा विराजनाद्वर्यवीर्ययुक्तत्वाद्यो वीर इति ख्यातस्तं वीरं श्रीवर्धमानं। किंविशिष्टं ? भुवने–विश्वे प्रदीप इव प्रदीपः ज्ञानेनाविष्कृतजीवाजीवादिपदार्थस्तं। पुनः सूत्रकारः प्रयोजनाभिसन्धिं ब्रुवन्नाह–किमर्थं ? "अबुहबोहत्थं ति" अबुधाः-अविदितजीवाजीवादितत्त्वार्थास्तेषां बोधार्थं–तद्विज्ञानाय। पुनर्ग्रन्थकृदात्मनो गर्वपरिहारार्थं दर्शयति–यथा पूर्वसूरिभिः–गौतमाद्यैर्भणितं तथा, न स्वमनीषिकयेति गाथार्थः ॥ १ ॥

---

१ नमिऊणत्यन्तेन. २ कर्तुः श्रोतुरनन्तरं परम्परं चेति चतुर्विधस्य तथागम्यत्वात्, अबुधेत्यादि तु कर्तुरनन्तरमेव. ३ सत्सामीप्ये सद्वद्वा (५–४–१) इति भविष्यति वर्त्तमाना.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथग्रन्थोक्तवाच्यनिर्वाहितया पूर्वं जीवस्वरूपं व्याचिख्यासुराह—

**जीवा मुत्ता संसारिणो य, तस थावरा य संसारी । पुढविजलजलणवाऊ, वणस्सई थावरा नेया ॥२॥**

व्याख्या—"जीव त्ति" "जीव प्राणधारणे" अजीवन् जीवन्ति जीविष्यन्त्यायुर्योगेनेति [1]निरुक्तवशाज्जीवाः । ते द्विधा, एके मुक्ताः "मुच्लृ मोचने" [2]मोचनान्मुक्ताः निष्ठपितदुष्टकर्मविपाका आत्यन्तिकदेहादिवियोगवन्तः । 'चः' पुनरर्थे, ततः 'संसारिणः' तत्र संसरणं भ्रमणं संसारः, स एवास्त्येषामिति संसारिणः । अथ मुक्तानां सिद्धजीवानामत्रै[3]कभेदत्वात्पूर्वं तावत्संसारिणां भेदानाह—एतेष्वेके त्रसास्त्रसनामकर्मोदयवशात्रसाः—शीतोष्णभयाद्यैरभितप्ताः तन्नाशाय त्रस्यन्तीति त्रसाः । तथा तिष्ठन्त्युष्णाद्यभितापिता अपि तत्परिहारासमर्थाः स्थावरनामकर्मोदयवशवर्तिनः स्थावराः—ते एकेन्द्रिया एव ज्ञेयाः । 'चः' समुच्चये । अत्राह शिष्यः—इह सूत्रकृता पूर्वं त्रसास्ततः स्थावरा इति क्रमः प्रदर्शितस्तत्किं[4] ? सत्यं, त्रसानां पुण्यप्रकृतिकत्वात् स्थावरेभ्यः समर्थत्वाद्वा मुख्यमोक्षाङ्गत्वाद्वा । अथवा (च) प्रायशो जीवा एकेन्द्रियेषु भ्रान्त्वा द्वीन्द्रियादिषूत्पद्यन्त इतिक्रमदर्शनाय सूत्रकृत्पृथव्यादिस्थावरविशेषान् व्यञ्जयन्[5] विचारयति, ततस्त्रसजीवविचारणमित्यतः पूर्वं स्थावरवक्तव्यतामाह—"पुढवि त्ति (वित्यादि)" पृथ्व्यप्तेजोवायुवनस्पतयः एते पञ्चापि स्थावरभेदा ज्ञेयाः—ज्ञातव्या इति । तथाऽस्मिन् ग्रन्थे जीवभेदव्याख्यायां भेदद्वयी दर्शिता शास्त्रान्तरेषु द्व्यादिदशचतुर्दशचतुर्विंशतिद्वात्रिंशद्भेदा अप्युक्ताः । [6]यदुक्तं श्रीजीवाभिगमादिसूत्रे, तद्यथा—"इह[7] खलु जिणमयं जिणाणुमयं

---

१ औणादिकाप्रत्यये. २ अमोचिषतेति, एतत्त कर्मक्षयभावार्थदर्शनपरम्. ३ वर्तमानस्वरूपउपाधेरभावात्, तीर्थातीर्थादिभेदास्तु परकृताः पूर्वकालीनाश्च, समेषां कर्मक्षयस्वरूपाविर्भावैकस्वरूपत्वं. ४ चेष्टन्ते. ५ कथम्. ६ चिन्त्यमेतत्. ७ इह खलु जिनमतं जिनानुमतं

For Private and Personal Use Only

जिणाणुलोमं जिणप्पणीयं जिणप्परूवियं जिणक्खायं जिणाणुचिन्नं जिणपन्नत्तं जिणदेसियं जिणपसत्थं अणुवीईए तं सद्दहमाणा तं पत्तियमाणा तं रोएमाणा थेरा भगवंतो जीवाजीवाभिगमं नामज्झयणं पण्णवइंसु, संसारमावन्नएसु णं जीवेसु इमाओ एवमाहिज्जंति। तंजहा—एगे एवमाहिंसु दुविहा संसा०, ते एवमाहिंसु, तंजहा—थावरा चेव तसा चेव १। से किं तं थावरा? थावरा तिविहा पण्णत्ता, तंजहा—पु० आ० व० इत्यादि। से किं तं तसा? तसा तिविहा पण्णत्ता, तं जहा तेउकाइया वाउकाइआ उराला तसा पाणा०। तिविहा सं० ते एव० इत्थी पुरिसा णपुंसगा २। चउव्विहा—नेरइया तिरिया मणुस्सा देवा य ३। पंचविहा—एगिंदिया बेइंदिया तेइंदिया चउरिंदिया पंचिंदिया ४। छव्विहा—पुढवि० आ० तेउ० वाउ० वणस्सई तसा ५। सत्तविहा—नेरइया तिरिक्खजोणिया तिरिक्खजोणिणीओ मणुस्सा मणुस्सणीओ देवा देवीओ य ६। अट्ठविहा—पढमसमयनेरइया अपढमसमयनेरइया, एवं देवा मणुया तिरिया य ७। जहा ते नवविहा—पुढविकाइया आउ तेउ वाउ वणस्सई बेइंदिया तेइंदिया चउरिंदिया पंचिंदिया ८।

---

जिनानुलोमं जिनप्रणीतं जिनप्ररूपितं जिनाख्यातं जिनानुचीर्णं जिनप्रज्ञप्तं जिनदेशितं जिनप्रशस्तं अनुवीच्य [आलोच्य] तद् श्रद्धानाः तत्प्रतीयन्तस्तद्रोचमानाः स्थविरा भगवन्तो जीवाजीवाभिगमं नामाध्ययनं प्रज्ञापितवन्तः संसारमापन्नेषु ज़ीवेषु इमाः (प्रतिपत्तयः) एवमाख्यायन्ते। तद्यथा—एके एवमाख्यातवन्तः द्विविधाः सं०त एवमाख्यातवन्तस्तद्यथा-स्थावराश्चैव त्रसाश्चैव। अथ के ते स्थावराः? स्थावरास्त्रि-विधाः प्रज्ञप्ताः, तद्यथा—पृ० अ० व०। अथ के ते त्रसाः? त्रसास्त्रिविधाः प्रज्ञप्तास्तद्यथा—तेजस्कायिका वायुकायिका उदारास्त्रसाः प्राणाः। त्रिविधा संसा० त एवमाख्यातवन्तः स्त्रियः पुरुषा नपुंसकाः। चतुर्विधाः—नैरयिकाः तिर्यञ्चो मनुष्या देवाश्च। पञ्चविधाः—एकेन्द्रिया द्वीन्द्रियाः त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रियाः। षड्विधाः—पृ० अ० ते० वा० व० त्रसाः। सप्तविधाः—नैरयिकास्तिर्यञ्चः तिर्यञ्च्यः मनुष्या मानुष्यः



For Private and Personal Use Only

दसविहा य-पढमसमयएगिंदिया अपढमसमयएगिंदिया,जाव पढमसमयपंचिंदिया य अपढमसमयपंचिंदिया य ९।से किं तं सव्वजीवाभिगमे सव्वजीवेसु णं इमाउ णव पडिवत्तीउ एवमाहिज्जंति। एगे एवमाहिंसु–दुविहा सव्वजीवा जाव दसविहा सव्वजीवा पण्णत्ता। तत्थ जे ते एवमाहिंसु दुविहा सव्वजीवा ते एवमाहिंसु सिद्धा चेव असिद्धा चेव १। अहवा दुविहा सव्वजीवा इंदिया चेव अणिंदिया चेव २। अहवा सकाइया चेव अकाइया चेव ३। सजोगी चेव अजोगी चेव ४। अहवा दुहिवा सव्वजीवा वेदगा चेव अवेदगा चेव ५। एवं कसाई चेव अकसाई चेव ६। अहवा दुविहा सव्वजीवा सलेसा य अलेसा य ७। अहवा नाणी चेव अन्नाणी चेव ८। अहवा दु० आहारगा चेव अणाहारगा चेव ९। अहवा दु० भासगा चेव अभासगा चेव १०। अहवा दु० सरीरिया चेव असरीरिया चेव ११। अहवा दु० चरिमा चेव अचरिमा चेव १२। अहवा दु० सागारोवउत्ता अणगारोवउत्ता १३। से तं

---

देवा देव्यश्च अष्टविधाः–प्रथमसमयनारका अप्रथमसमयनारका एवं देवा मनुष्यास्तिर्यञ्चश्च। यथा ते नवविधाःपृ०अ०ते०वा०व०द्वी०त्री०च० पं० दशाविधाश्च–प्रथमसमयैकेन्द्रियाः अप्रथसमयैकेन्द्रियाः यावत् प्रथमसमयपञ्चेन्द्रियाश्चाप्रथमसमयपञ्चेन्द्रियाश्च। अथ कोऽसौ सर्वजीवाभिगमः सर्वजीवेषु इमा नव प्रतिपत्तय एवमाख्यायन्ते। एके एवमाख्यातवन्तः द्विविधाः सर्वजीवा यावत् दशविधाः सर्वजीवाः प्रज्ञप्ताः। तत्र ये ते एवमाख्यातवन्तो द्विविधाः सर्वजीवास्त एवमाख्यातवन्तः सिद्धाश्चव असिद्धाश्चैव। अथवा द्विविधाः सर्वजीवा इन्द्रियाश्चैवानिन्द्रियाश्चैव अथवा सकायाश्चैवाकायाश्चैव सयोगिनश्चैवायोगिनश्चैव। अथवा द्विविधाः सर्वजीवा वेदकाश्चैवावेदकाश्चैव एवं कषायिणश्चैवाकषायिणश्चैव। अथवा द्विविधाः सर्वजीवा सलेश्याश्चैवालेश्याश्चैव अथवा ज्ञानिनश्चैवाज्ञानिनश्चव। अथवा द्वि० आहारकाश्चैवानाहारकाश्चैव। अथवा द्वि० भाषकाश्चवाभाषकाश्चैव। अथवा द्विविधाः शरीरिणश्चैवाशरीरिणश्चैव। अथवा द्वि० चरमाश्चैवाचरमाश्चैव। अथवा द्वि० साकारोपयुक्ताश्चैवानाका-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुविहा सव्वे जीवा पण्णत्ता। द्विविधप्रतिपत्तौ १३ भेदाः। ज(त)त्थ जे ते एवमाहिंसु तिविहा सव्वजीवा पण्णत्ता ते एवमाहिंसु, तंजहा–सम्मदिट्ठी मिच्छादिट्ठी सम्ममिच्छादिट्ठी १। अहवा तिविहा–परित्ता य अपरित्ता य नोपरित्तानोअपरित्ता य २। अहवा तिविहा–पज्जत्तगा अपज्जत्तगा नोपज्जत्तगानोअपज्जत्तगा ३। अहवा ति०–सुहुमा बायरा नोसुहुमानोबायरा ४। अहवा ति०–सण्णी असण्णी नोसण्णीनोअसण्णी ५। अहवा ति०–भवसिद्धिया अभवसिद्धिया नोभवसिद्धियानोअभवसिद्धिया ६। अहवा ति०–तसा थावरा नोतसानोथावरा ७। से तं तिविहा सव्वजीवा पण्णत्ता। तत्थ० चउव्विहा सव्वजीवा पण्णत्ता, ते एवमाहिंसु, तंजहा–मणजोगी वयजोगी कायजोगी अजोगी य १। अहवा च०–इत्थिवेयगा य पुरिसवेयगा य नपुंसकवेयगा य अवेयगा य २। अहवा च०–चक्खुदंसणी अचक्खुदंसणी ओहिदंसणी केवलदंसणी ३। अ० च० संजया असंजया संजयासंजया नो-

---

रोपयुक्ताश्चैव। तदेते द्विविधाः सर्वे जीवाः प्रज्ञप्ताः। तत्र ये त एवमाख्यातवन्तस्त्रिविधाः सर्वजीवाः प्रज्ञप्ताः त एवमाख्यातवन्तस्तद्यथा–सम्यग्दृष्टयो मिथ्यादृष्टयः सम्यग्मिथ्यादृष्टयोऽथवा त्रिविधाः परीताश्चापरीताश्च नोपरीताश्च नोऽपरीताश्च अथवा त्रिविधाः पर्याप्ता अपर्याप्तका नोपर्याप्तका-नोऽपर्याप्तकाश्च अथवा त्रि० सूक्ष्मा बादरा नोसूक्ष्मनोबादराः। अथवा त्रि० संज्ञिनोऽसंज्ञिनः नोसंज्ञिनोअसंज्ञिनः। अथवा त्रि० भवसिद्धिका अभवसिद्धिका नोभवसिद्धिकनोअभवसिद्धिकाः। अथवा त्रि० त्रसाः स्थावरा नोत्रसनोस्थावराः। तदेते त्रिविधाः सर्वजीवाः प्रज्ञप्ताः। तत्र० चतुर्विधाः सर्वजीवाः प्रज्ञप्ताः त एवमाख्यातवन्तस्तद्यथा–मनोयोगिनो वाग्योगिनः काययोगिनोऽयोगिनश्च। अथवा च० स्त्रीवेदकाश्च पुरुषवेदकाश्च नपुंसकवेदकाश्च अवेदकाश्च। अथवा च० चक्षुर्दर्शनिनोऽचक्षुर्दर्शनिनः अवधिदर्शनिनः केवलदर्शनिनः। अथवा च० संयता असंयताः संयतासंयता नोसंयतनोअसंयताः। इत्येते चतुर्विधाः सर्वजीवाः प्रज्ञप्ताः। तत्र ये त एवमाख्यातवन्तः



For Private and Personal Use Only

संजयानोअसंजया ४। से तं चउव्विहा सव्वजीवा पण्णत्ता। तत्थ जे ते एवमाहिंसु पंचविहा, से तं–णेरइया तिरिक्खजोणिया मणुस्सा देवा सिद्धा य १। अहवा पंचविहा–कोहकसाई माणकसाई मायाकसाई लोहकसाई अकसाई ५। से तं पंचविहा। तत्थ छव्विहा–एगिंदिया बेइंदिया तेइंदिया चउरिंदिया पंचिंदिया अणिंदिया १। अहवा छव्विहा–उरालियसरीरी वेउव्विअसरीरी आहारगसरीरी तेयगसरीरी कम्मगसरीरी असरीरी। से तं छव्विहा सव्वजीवा। सत्तविहा–पुढविकाइया आउकाइया तेउकाइया वाउकाइया वणस्सइकाइया तसकाइया अकाइया १। से तं सत्तविहा सव्वजीवा। से किं तं अट्ठविहा सव्वजीवा पण्णत्ता–णेरइया तिरिक्खजोणिया तिरिक्खजोणिणीओ मणुस्सा मणुस्सणीओ देवा देवीओ सिद्धा य १। अहवा अट्ठविहा आभिणिबोहियनाणी सुयनाणी ओहिनाणी मणपज्जवनाणी केवलनाणी मइअन्नाणी सुयअन्नाणी विभंगनाणी २। से तं अट्ठविहा सव्वजीवा। जे ते एवमाहिंसु नवविहा सव्व-

---

पञ्चविधा अथ एते–नैरयिकास्तिर्यग्योनिका मनुष्या देवाः सिद्धाश्च। अथवा पञ्चविधाः–क्रोधकषायिणः मानकषायिणः मायाकषायिणः लोभकषायिणः अकषायिणः। इत्येते पञ्चविधाः। तत्र षड्विधाः–एकेन्द्रिया द्वीन्द्रियाः त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रिया अनिन्द्रियाः। अथवा षड्विधा औदारिकशरीरिणो वैक्रियशरीरिण आहारकशरीरिणः तैजसशरीरिणः कार्मणशरीरिणः अशरीरिणश्च। इत्येते षड्विधाः सर्वजीवाः। सप्तविधाः–पृथ्वीकायिका अप्कायिकाः तेजस्कायिका वायुकायिका वनस्पतिकायिकास्त्रसकायिका अकायिकाः। इत्येते सप्तविधाः सर्वजीवाः। अथ के तेऽष्टविधाः सर्वजीवाः प्रज्ञप्ताः–नैरयिकाः तिर्यग्योनिकाः तिर्यग्योनिस्त्रियः मनुष्या मानुष्य देव्यः सिद्धाश्च। अथवा अष्टविधाः आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनः अवधिज्ञानिनः मनःपर्यायज्ञानिनः केवलज्ञानिनः मत्यज्ञानिनः श्रुताज्ञानिनः विभङ्गज्ञानिनः। इत्येतेऽष्टविधाः सर्वजीवाः। ये ते एवमाख्यातवन्तः नवविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा–एकेन्द्रिया द्वीन्द्रिया-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवा पण्णत्ता। तंजहा-एगिंदिया बेइंदिया तेइंदिया चउरिंदिया नेरइया तिरिक्खजोणिया मणुस्सा देवा सिद्धा य १। अहवा नवविहा-पढमसमयनेरइया अपढमसमयनेरइया एवं तिरियमणुयदेवा सिद्धा य। से तं नवविहा। दसविहा सव्वजीवा–पुढविकाइया आउकाइया तेउ०वाउ०वणस्सइकाइया बीयतियचउरिंदियपंचिंदिया अणिंदिया १। अहवा दसविहा सव्वजीवा–पढमसमयनेरइया अपढमसमयनेरइया, पढ० ति०, अप० ति०, पढ० मणु, अप० मणु०, पढ० देवा, अप० देवा, पढ० सिद्धा, अपढ० सिद्धा। से तं दसविहा सव्वजीवा। से तं सव्वजीवाभिगमे। अथवा सर्वजीवानां चतुर्विंशतिभेदाः–"नेरइया असुराई पुढवाइबिइंदियाइओ चेव। नर वितर जोइसिया वेमाणिय दंडओ एवं ॥ १ ॥" एते चतुर्विंशतिभेदा जीवाः। यद्वा द्वात्रिंशद्भेदा अपि–" विगलिंदियजीवाणं,

---

त्रीन्द्रियाश्चतुरिन्द्रिया नैरयिकाः तिर्यग्योनिका मनुष्या देवाः सिद्धाश्च। अथवा नवविधाः प्रथमसमयनैरयिका अप्रथमसमयनैरयिका एवं तिर्यग्मनुष्यदेवाः सिद्धाश्च। इत्येते नवविधाः। दशविधाः सर्वजीवाः–पृथ्वीकायिका अप्कायिकाः तेजस्कायिका वायुकायिका वनस्पतिकायिका द्वित्रिचतुरिन्द्रियपञ्चेन्द्रिया अनिन्द्रियाः। अथवा दशविधाः सर्वजीवाः प्रथमसमयनैरयिका अप्रथमसमयनैरयिकाः, प्र० ति अप्र० ति०, प्रथ० म० अप्र० म०, प्रथ० देवा० अप्र० देवाः, प्रथमसमयसिद्धा अप्रथमसमयसिद्धाश्च इत्येते दशविधाः सर्वजीवाः इत्येष सर्वजीवाभिगमः।

नैरयिकाः १ असुरादयः १० पृथिव्यादयः ५ द्वीन्द्रियादयः ४ नरा १ व्यन्तर १ ज्योतिष्का १ वैमानिकाः १ ॥ १ ॥

विकलेन्द्रियजीवानां पर्याप्तापर्याप्ता भवन्ति षड् भेदाः। पञ्चेन्द्रियाणां चत्वारो द्वाविंशतिरेकेन्द्रियाणामपि ॥ २ ॥

पृथ्व्युदकाग्निवायुबादरसूक्ष्मपर्याप्तापर्याप्ताः। चत्वारोऽपि चतुर्भेदाः वनस्पतिः पुनः भवति षड्भेदः ॥ ३ ॥

पञ्चेन्द्रियाणां चत्वारः द्वाविंशतिः साधारणपूर्वकः षट्भेदः (विकलः) प्रत्येकं पर्याप्ते द्वात्रिंशत् जीवभेदाः ॥ ३ ॥



For Private and Personal Use Only

पज्जत्तापज्ज हुंति छब्भेया। पंचिंदियाण चउरो, बावीसमिगिंदिए संपि[याणंपि]॥१॥ पुढविदग अगणि वाऊ, बायरसुहुमपज्जत्तअपज्जत्ता। चउरो वि चउरभेया, वणस्सइ पुण होइ छब्भेया॥२॥ पंचिंदियाण चउरो, बावी साहारणपुव्वओ य छब्भेओ। पत्तेयं पज्जत्ते, बत्तीसं जीवभेयाइं॥ ३ ॥ व्याख्या—द्वित्रिचतुरिन्द्रियाणां पर्याप्तापर्याप्तभेदात् षट्। पञ्चेन्द्रियाणां संज्ञ्यसंज्ञिपर्याप्तभेदाच्चत्वारः। बादरपृथ्व्यप्तेजोवायुप्रत्येकवनस्पतीनां पर्याप्तापर्याप्तभेदाद्दश। सूक्ष्मपृथिव्यप्तेजोवायुवनस्पतीनां पर्याप्तापर्याप्तभेदाद्दश। साधारणवनस्पतिरपि द्विधा पर्याप्तापर्याप्तभेदात्। मिलिताः सर्वेऽपि द्वात्रिंशद्भेदाः। तथाण्डजादयोऽप्यष्टौ भेदा उक्ताः सन्ति। ते प्रतीता एव। चेतनादयः षट् भेदास्तेऽपि विदिताः गौरवभयान्नात्र लिख्यन्ते। इह सामान्यतया पृथ्व्यादीनां नामान्युक्तानीति गाथार्थः॥ २॥

अथ केषां पृथ्वीकायतेति तद्विज्ञानाय सूत्रकृद्गाथाद्वयेन तद्विशेषानाह—

**फलिहमणिरयणविद्दुमहिंगुलहरियालमणसिलरसिंदा। कणगाइधाउसेढी, वण्णियअरणेट्टयपलेवा॥ ३॥**
**अब्भयतूरीऊसं, मट्टियपाहाणजाइओ णेगा। सोवीरंजणलुणाइ, पुढविभेयाइ इच्चाइ॥ ४॥**

व्याख्या—"फलिह त्ति" स्फटिकनामग्रहणेन अंकतैलिकादयो ग्राह्याः, मणयश्चन्द्रकान्तादयः, रत्नानि वज्रकर्केतनादीनि, यद्वा मणयः समुद्रोद्भवाः रत्नानि (च) खनीसमुद्भवानि, विद्रुमः प्रवालः, हिङ्गुलहरितालमनःशिलादयः प्रतीता एव, रसेन्द्रः पारदः, एषां द्वन्द्वः। तथा कनकादयः सप्त धातवः, ते चामी—चामीकररूप्यताम्रत्रपुखर्परसीसकलोहानि, एषां धातूनां खनीदलानि पृथ्वीकायः। "सेढि त्ति" खटिका। वर्णिका रक्तमृत्तिका। अरणेट्टको देशप्रसिद्धः। पलेवकः पाषाणविशेषः। अभ्रकाणि पञ्चवर्णानि। तूरी वस्त्राणां पाशहेतुमृत्तिकाविशेषः। "ओस त्ति" क्षारभूमिर्यत्राङ्कुरोत्पत्तिर्न जायते। द्वन्द्वसमासान्नपुंसकत्वं चैकत्वं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेति । मृत्तिका प्रतीता एव । पाषाणजातयोऽनेकप्रकाराः । सौवीराञ्जनं श्वेतकृष्णभेदभिन्नमञ्जनं । लवणं प्रतीतं, 'उपलक्षणात्सिन्धवसमुद्रलवणादि । एवमनेकप्रकारैः पृथ्वीकायभेदा इत्यादय उक्ता अनुक्ता अपि स्वबुध्ध्या ज्ञेया इति गाथाद्वयार्थः ॥३-४॥

इति पृथ्वीकायभेदानुक्त्वाऽप्कायभेदान् कथयन्नाह—

**भोमंतरिक्खमुदगं, ओसाहिमकरगहरितणूमहिया । हुंति घणोदहिमाई, भेया णेगा य आउस्स ॥ ५ ॥**

व्याख्या—भौमं कूपादिशिराजलं । आन्तरिक्षं मेघजं पयः । "ओस त्ति" अवश्यायस्नेहजलं । हिमं तुषारं । करको घनोपलः । "हरितणू त्ति" स्नेहकाले दर्भाग्रेषु जलबिन्दवः । "महिय त्ति" महिका धूमरी, प्राकृतत्वाद्दीर्घः । "घणोदहि त्ति" पृथ्व्या आधारभूतमसङ्ख्यातयोजनप्रमाणं पयःपिण्डरूपं पृथ्वीपर्यन्तं तद् घनोदधिः अप्काय, इत्यादयोऽनेकेऽप्कायभेदाः स्युरिति गाथाऽक्षरार्थः ॥ ५ ॥

अथाप्कायभेदानुक्त्वाऽग्निकायभेदानाह—

**इंगालजालमुम्मुर-उक्कासणिकणगविज्जुमाईया । अगणिजियाणं भेया, नायव्वा निउणबुद्धीए ॥६॥**

व्याख्या—अङ्गारो ज्वालारहितोऽङ्गारः । ज्वालाऽग्निसम्बद्धार्चिर्विशेषः । मुर्मुरा विरलाग्निकणभस्म लोके कारीषोऽग्निरिति प्रसिद्धः । उल्का गगनाग्निरुत्पातकारणं व्योम्नि विविधाकारवती रेखारूपा । "असणि त्ति" आकाशात्पतिता भुवि वह्निकणाः ।

१ आदिशब्दात् स्यात् परं बहुत्वविवक्षयैवम् २ हरितणू इत्यत्र.



For Private and Personal Use Only

" कणग त्ति " गगनात्तारकवत्कणरूपः पतन्नग्निर्दृश्यते । विद्युत् प्रतीता । शुद्धाग्निर्निरिन्धनो वह्निर्वंशघर्षणादेरुत्पन्नः । उपलक्षणात्सूर्यकान्त्या ( न्ता ) देरुत्पन्नश्च । इत्यादयोऽनुक्ता अप्यग्निकायभेदा निपुणबुध्ध्या ज्ञातव्या इति गाथाक्षरार्थः ॥ ६ ॥

प्रक्रमाद्वायुकायभेदान् विवृण्वन्नाह–

उब्भामगउक्कलिया मंडलिमुहसुद्धगुंजवाया य । घणतणुवायाईया, भेया खलु वाउकायस्स ॥ ७ ॥

व्याख्या–उद्भ्रामकवातः, उत्कालिकावातः, मण्डलिकावातः, मुखवातः, शुद्धवातः, गुञ्जवातादीनां स्वरूपनाम्नैव बुध्ध्या ज्ञेयं । अथवाऽयं विशेषः, तद्यथा–उद्भ्रामकवातोऽपरनामा संवर्त्तकः यो बहिःस्थितमपि तृणादि विवक्षितक्षेत्रान्तः क्षिपति । उत्कलिकावातो यः स्थित्वा स्थित्वा वाति । मंडलिकावातो वातोलीरूपः । मुखवातः प्रतीत एव । शुद्धवात उत्कलिकादिविकलो मन्दानिलः । गुञ्जवातो यो गुञ्जन् वाति । अथ घनवाततनुवातयोः स्वरूपं किञ्चिदुच्यते–रत्नप्रभादिपृथ्वीनां सौधर्मादिदेवलोकानां यदाधारभूतौ घनवाततनुवातौ । तयोराद्यस्त्यानघृतरूपः, अन्यस्तु तापितघृतवद्द्रढरूपः । तौ द्वावपि असङ्ख्यातयोजनप्रमाणपिण्डौ । इत्यादयो वायुकायभेदा ज्ञेया नामतः, विस्तरार्थोऽन्यशास्त्रेभ्योऽवसेय इति गाथार्थः ॥ ७ ॥

प्रस्तावादथ वनस्पतिकायभेदान् कथयन्नाह—

साहारणपत्तेया, वणसइजीवा दुहा सुए भणिया । जेसिमणंताणं तणू, एगा साहारणा ते उ ॥ ८ ॥

व्याख्या—वनस्पतिजीवाः श्रुते आगमे द्विधा भणिताः–उक्ता इति सम्बन्धः । तत्रैके साधारणः, अन्ये प्रत्येकाः । "वणस-इत्ति" छन्दोभङ्गभयाद्‌द्वित्वं न । इह पूर्वं तावत्साधारणस्वरूपं व्याख्यानयति "जेसिंति" येषां–वनस्पतिकायजीवानामनन्तानामेका तनुः–शरीरं ते साधारणाः, अन्ये प्रत्येकाः । तथा चोक्तं श्रीप्रज्ञापनायां–"समगं वक्कंताणं समगं तेसिं सरीरनिप्फत्ती । समपमाहार-गहणं समगं उस्सासनिस्सासा ॥ १ ॥ एगस्स उ जं गहणं बहूणं साहारणाण तं चेव । जं बहुआणं गहणं समासओ तं पि एगस्स ॥ २ ॥ साहारणमाहारो साहारणमाणपाणगहणं च । साहारणजीवाणं साहारणलक्खणं एयं । ३ ॥" आसां सुगमार्थत्वान्न व्या-ख्यायाते, भावार्थः स्वयमेव भावनीयः । तथा ते साधारणा द्विधा–एके सूक्ष्मसाधारणा एके बादरसाधारणाः, सिद्धान्ते साधारणस्य निगोद इत्यपि संज्ञाऽस्ति । इह तावत्सूत्रे सूक्ष्मनिगोदस्वरूपं दर्शयति, यदुक्तं सङ्ग्रहिण्यां–"गोला य असंखिज्जा असंखनिगोयगोल-ओ भणिओ । इक्किक्कम्मि निगोए अणंतजीवा मुणेयव्वा ॥ १ ॥" सुगमैव । यथागमसम्प्रदायं किञ्चिदुच्यते–इह हि द्विधा जीवाः–सांव्यवहारिका असांव्यवहारिकाश्च । तत्र येऽनादिसूक्ष्मनिगोदेभ्य उद्‌धृत्य शेषजीवेषूत्पद्यन्ते, ते पृथिव्यादिविविधव्यवहारयोगा-त्सांव्यवहारिकाः । ये पुनरनादिकालादारभ्य सूक्ष्मनिगोदेष्वेवावतिष्ठन्ते ( ते ) तथाविधव्यवहारातीतत्वादसांव्यवहारिकाः । अथ

---

१ समकं व्युत्क्रामतां समकं तेषां शरीरनिष्पत्तिः । समकमाहारग्रहणं समकमुच्छ्वासनिःश्वासौ ॥ १ ॥
एकस्य तु यद्‌ग्रहणं बहूनां साधारणानां तदेव । यद्‌बहुकानां ग्रहणं समासतस्तदपि एकस्य ॥ २ ॥
साधारण आहारः साधारणमानप्राणग्रहणं च । साधारणजीवानां साधारणलक्षणमेतत् ॥ ३ ॥

२ गोलाश्चाऽसंख्याता असंख्यनिगोदको गोलको भणितः ॥ एकैकस्मिन्निगोदे अनन्ता जीवा ज्ञातव्याः ॥ ४ ॥



For Private and Personal Use Only

किमसांव्यवहारिकराशेः सांव्यवहारिकराशावागच्छन्ति न वा ? तदुच्यते–उक्तं च विशेषणवत्यां–“ सिज्झंति जत्तिया किर, इह संववहारजीवरासीओ । इंति अणाइवणस्सइरासीओ तत्तिया तम्मि ॥१॥” प्रकटार्था । तथा च सांव्यवहारिकाः सूक्ष्मनिगोदेभ्य उद्धृत्य शेषजीवेषूत्पद्यन्ते । तेभ्योऽप्युध्धृत्य केचिद्भूयोऽपि तेष्वेव निगोदेषु गच्छन्ति, परं तत्रापि सांव्यवहारिका एव ते, व्यवहारे पतितत्वात् । तत्र चोत्कर्षतोऽवस्थानकालमानमसङ्ख्याता उत्सर्पिण्यवसर्पिण्यः, यदागमः–“ [2]सुहुमनिगोए णं भंते ! सुहुमनिगोयत्ता कालओ केचिरं होइ? गोयमा ! जहण्णेणं अंतोमुहुत्तं,उक्कोसेणं असंखिज्जा उस्सप्पिणीओसप्पिणीओ कालओ खित्तउ त्ति” व्याख्या-असङ्ख्येयेषु लोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारे यावत्य उत्सर्पिण्यवसर्पिण्यो भवन्ति तावत्प्रमाणाः, असङ्ख्येया उत्सर्पिण्यवसर्पिण्य इत्यर्थः । सूक्ष्मनिगोदविशेषं संदर्श्य बादरनिगोदस्वरूपं दर्शयति–बादरनिगोदकायस्थितिस्तु सप्ततिः सागरकोटीकोटयः यदाह–“[3]बादरनिगोए णं भंते ! पुच्छा, गोयमा ! जहण्णेणं अंतोमुहुत्तं उक्कोसेणं सत्तरि कोडाकोडीओ ”सामान्यनिगोदस्थितिमानं तु सार्द्धौ द्वौ पुद्गलपरावर्त्तौ । तथा पञ्चसङ्ग्रहे–“[4]साहारणाण दो सड्ढपुग्गला निव्विसेसाणं” । अत्र साधारणनिगोदानां–सूक्ष्मेतरप-

---

१ सिध्यन्ति यावन्तः किल इह संव्यवहारजीवराशितः । आयान्ति अनादिवनस्पतिराशेस्तावन्तस्तस्मिन् ॥ १ ॥

२ सूक्ष्मनिगोदो भदन्त ! सूक्ष्मनिगोदत्वे कालतः कियच्चिरं भवेत् ? गौतम ! जघन्येन अन्तर्मुहूर्त्तमुत्कर्षतः असङ्ख्येयोत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतः

३ बादरनिगोदो भदन्त ! पृच्छा, गौतम ! जघन्येनान्तर्मुहूर्त्तं उत्कर्षतः सप्ततिः कोटीकोटयः ।

४ साधारणानां द्वौ सार्धौ पुद्गलपरावर्तौ निर्विशेषाणाम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्याप्तापर्याप्तविशेषरहितानामिति । तथा आर्यश्यामोऽपि प्रज्ञापनायामाह–"निगोए णं भंते ! निगोयत्ताए कालओ केच्चिरं होइ ? गोयमा ! जहण्णेणं अंतोमुहुत्तं उक्कोसेणं अणंतं कालं,तत्थ णं अणंताओ उस्सप्पिणिओसप्पिणीओ खेत्तओ अड्ढाइज्जा पुग्गलपरियट्टा" इति प्रसङ्गेनालं । प्रकृतं प्रस्तूयते–एकस्मिन् सूक्ष्मवालाग्रप्रदेशप्रमाणक्षेत्रेऽसङ्ख्याता निगोदाः गोलकाकारतया " गोला " इति संज्ञा। तत्रैकस्मिन् सूक्ष्मवालाग्रप्रदेशप्रमाणक्षेत्रेऽसङ्ख्याता निगोदास्तेष्वेकैकस्मिन्निगोदेऽनन्ता जीवाः, निगोदस्वरूपं प्राग्व्यावर्णितं ज्ञातव्यमिति गाथार्थः ॥ ८ ॥

अथ येषां लोकप्रसिध्ध्याऽनन्तकायता तेषां कानिचिन्नामानि गाथाद्वयेनाह––

कंदा अंकुरकिसलयपणगासेवालभूमिफोडा य । अद्दयतिगंगज्जरमोत्थवत्थुलाथेगपल्लंका ॥ ९ ॥
कोमलफलं च सव्वं, गूढसिराइं सिणाइपत्ताइं । थोहरिकुँआरिगुग्गुलिगलोयपमुहाइ छिन्नरुहा ॥ १० ॥

व्याख्या–कन्दाः–भूमध्यगा वृक्षावयवास्ते चाशुष्का एव ग्राह्याः, शुष्काणां तु निर्जीवत्वादनन्तकायिकत्वं न संभवति । तथा अङ्कुराः–उद्गमनावस्थायां अव्यक्तदलाद्यवयवा घोषातकीकरीरवरुणवटनिम्बादितरूणामङ्कुराःसर्वेऽप्यनन्तकायिकाः। किश (स) लयानि उद्गच्छन्नूतनकोमलपत्राणि तान्यप्यनन्तकायिकानि प्रौढपत्रादर्वाग्बीजस्योच्छूनावस्थालक्षणानि सर्वाणि, न तु कानिचिदेव । यतः–

---

१ निगोदो भदन्त ! कालतः कियच्चिरं निगोदत्वे भवति ? गौतम ! जघन्येनान्तर्मुहूर्तमुत्कर्षेणानन्तं कालं । तत्र अनन्ता उत्सर्पिण्यवसर्पिण्यः क्षेत्रतः अर्धतृतीयाः पुद्गलपरावर्त्ताः । २ अल्लयतिय इति वा पाठः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"सव्वोऽवि किसलओ खलु, उग्गममाणो अणंतओ भणिओ । सो चेव विवड्ढंतो, होइ परित्तो अणंतो वा ॥ १ ॥" इति पनका -पञ्चवर्णा फुल्लिः । सेवालं प्रतीतं । भूमिस्फोटानि ग्रीष्मवर्षाकालभावीनि छत्राकृतीनि लोकप्रतीतानि वा । "अद्दयतिय त्ति" आर्द्रकत्रिकं आर्द्रकः-शृङ्गबेरः, आर्द्रहरिद्रा, कच्चूरकास्तिक्तद्रव्यविशेषः । गर्जराणि प्रतीतानि । तथा मुस्तादीनां चतुर्णां स्वरूपं द्वात्रिंशदनन्त कायव्याख्यायां व्याकरिष्यते । तथा सर्वं कोमलं फलं अनिबद्धास्थिकं तिन्दुकाम्रादीनां । "गूढसिराईत्ति" गूढानि सिराणि अप्रकटसन्धीनि गजपर्णपत्राणीवाविज्ञातसंन्धीनि पत्राणियेषांतानि । बहुव्रीहावित्रिवलोपेसिद्धिः। एतदुक्तलक्षणं, न तुद्वात्रिंशदनन्तकायेषु सङ्ख्यापूरणामिति । "थोहरित्ति" स्नुह्यादीनां चतसृणामौषधीनां छिन्नरुहाणां च स्वरूपं द्वात्रिंशदनन्तकायिकषु व्याख्यानयिष्यति। इह हि ग्रन्थकृता समग्रतया द्वात्रिंशदनन्तकाया नोक्ताः सूचनात्सूत्रमिति कृत्वा, तथाप्युच्यन्ते, तद्यथा-"सव्वा हु कंदजाई" इत्यादि गाथापञ्चकं सूत्रतो न लिख्यते विदितत्वाद्, अर्थाद्विव्रियते-हुशब्दोऽवधारणे, सर्वैवकन्दजातिरनन्तकायिका । तथा सूरणकन्दोऽर्शोघ्नः, वज्रोऽपि कन्दविशेषः, आर्द्रकत्रिकं पूर्वं व्यावर्णितं ज्ञातव्यं, शतावरीविरालिके वल्लीभेदौ, कुमारी मांसलप्रणालाकारपत्रा, थोहरी स्नुहीतरुः, गडूच्यपि वल्ली प्रतीतैव, लशुनः कन्दविदेषः, "वंसकरेल्ल त्ति" कोमलानि नववंशावयवरूपाणि करेल्लकतया प्रतीतानि, गर्जरः प्रागुक्तो रक्तकन्दः, लवणको वनस्पतिविशेषः येन दग्धेन सर्जिका स्यात्, लोढः पद्मिनीकन्दः, गिरिकर्णिका वल्लीविशेषः तस्याः किशलयानि पत्राण्यप्यनन्तकायिकानि, खीरिंशुकथेगावपि कन्दौ, मुस्ता वराहप्रिया तस्या आर्द्रकन्दः, तथा लवणवृक्षस्य त्वक्, न त्वन्येऽवयवाः, खिल्लूडः कन्दविशेषः, अथवाऽ(चा)मृतवल्ली तन्तुकाकाररूपा, तथा मूलको विदित एव, भूमिरुहाणि भूमि-

१ सर्वोऽपि किसलयः खल्वुद्गच्छन् अनन्तको भणितः । स एव विवर्धमानो भवति प्रत्येकोऽनन्तो वा ॥ १ ॥

स्फोटानि प्रागुक्तस्वरूपाणि, विरूढानि अङ्कुरितानि द्विदलधान्यानि, ढक्कवात्थुलः शाकविशेषः स च प्रथमोद्गत एव, शूकरसंज्ञितो वल्लः स एवानन्तकायिको न तु धान्यविशेषः, पल्यङ्कः शाकभेदः, " कोमलंबिलिय त्ति " अबद्धास्थिका आम्लिका, आलुकपिण्डालुकौ कन्दविशेषौ, इत्येतेऽनन्तकायिका यत्नेन परिहार्याः श्रावकैर्बुद्धिमद्भिः, पुनस्तेष्वनन्तजीवघाततया कथमपि विराधना न विधेया तेषामिति गाथाद्वयार्थः ॥ ९-१० ॥

अथानन्तकाया द्वात्रिंशदधिका वेति संदेहनिरासार्थं सूत्रकृद्गाथयाह-

**इच्चाइणो अणेगे, हवंति भेया अणंतकायाणं । तेसिं परिजाणणत्थं, लक्खणमेयं सुए भणियं ॥ ११ ॥**

व्याख्या--इत्यादयः-सूत्रोक्ता एव न, किं तु अनेकेऽनन्तकायिकानां भेदा भवन्ति । सिद्धान्ते द्वात्रिंशदेव तत्किं ? उच्यते-आर्यदेशप्रसिद्धत्वाल्लोकानां कार्योपयोगनियुक्ताः अन्ये त्वप्रसिद्धत्वादनुपयोगित्वाच्च सङ्ख्यायां नान्तर्भाविताः । अतस्तेषां परिज्ञानार्थमेभ्योऽधिकानामेतल्लक्षणं श्रुते भणितं-व्यावर्णितमिति गाथार्थः ॥ ११ ॥

अथ तदेव लक्षणं व्याचिख्यासुराह—

**गूढसिरसंधिपव्वं, समभंगमहीरुहं (रगं) च छिन्नरुहं । साहारणं सरीरं, तव्विवरीयं तु पत्तेयं ॥ १२ ॥**

व्याख्या-"गूढसिरेत्यादि" गूढानि--प्रकटवृत्त्याऽज्ञायमानानि सिरास्सन्धयः पर्वाणि च यस्य पत्रकाण्डनालशाखादेः तत्तथा । यस्य भज्यमानस्य शाखादेस्त्रोटयमानस्य पत्रादेः समोऽदन्तुरः छेदो भवति तत्समभङ्गं । तथा छिद्यमानस्य न विद्यन्ते हीरकास्तन्तु-



For Private and Personal Use Only

लक्षणा मध्ये यस्य तदहीरकं। तथा छित्त्वा गृहाद्यानीतं शुष्काद्यवस्थाप्राप्तमपि जलादिसामग्रीं प्राप्य गडूच्यादिवत्पुनरपि यत्प्ररोहति तच्छिन्नरुहं। तदेतैर्लक्षणैः साधारणं शरीरं ज्ञेयं तदनन्तकायिकमित्यर्थः। एतल्लक्षणव्यतिरिक्तं प्रत्येकशरीरमिति। चः पुनरर्थे। तुरेवार्थे। तथा पुनरन्यदप्यनन्तकायलक्षणमिदं शास्त्रे नोपदर्शितं तथाप्युच्यते, तद्यथा-"चक्कं व भज्जमाणस्स, जस्स गंठी हविज्ज चुन्नघणो। तं पुढविसरिसभेयं, अणंतजीवं वियाणाहि॥ १॥" इति। प्रकटार्थैवेति गाथाक्षरार्थः॥ १२॥

अथ प्रत्येकवनस्पतिलक्षणं शरीरे क्व केषु स्थानेषु तज्जीवास्तत्प्र(श्चेत्येतत्प्र)कटयन्नाह--

## एग सरीरे एगो, जीवो जेसिं च ते उ पत्तेया। फलफुल्लछल्लिकट्ठा, मूला पत्ताणि बीयाणि॥१३॥

व्याख्या—एकस्मिन् शरीरे, विभक्तिलोपे, एको जीवो यासां वनस्पतीनां, प्राकृतत्वात्पुंस्त्वं[२], ताः प्रत्येकवनस्पतयः इति सामान्यलक्षणं। विशेषलक्षणं व्यनक्ति। चः समुच्चये। तुरेवार्थे। यासां सप्तसु स्थानेषु पृथक् पृथक् जीवा भवन्ति, तानीमानि स्थानानि, विभक्तिव्यत्ययात्सप्तम्याः स्थाने प्रथमा, तत्र फलेषु पुष्पेषु त्वचि काष्ठे मूले पत्रेषु बीजेषु सर्वत्र जीवसद्भावादायं क्रमः फलबीजयोः पश्चानामन्तर्गतत्वेनेत्युपदर्शितः यदुत्पत्तिस्तयोरनुयायिनी। तथा सप्तस्वेषु स्थानेषु एकजीवत्वमित्यर्थः। इहसूत्रकुता-प्रत्येकवनस्पतीनां नाममात्रमुपदर्शितं, विशेषो न कश्चिद्दर्शितः तथापीह नाममात्रविभेदो दर्श्यते, तद्यथा—"रुक्खा[३] १ गुच्छा २ गुम्मा

१ चक्रवद्भज्यमानस्य यस्य ग्रन्थिर्भवेच्चूर्णघनः। तत् पृथिवीसदृशभेदमनन्तजीवं विजानीहि॥ १॥

२ चिन्त्यम् समासाभावात् स्त्रीत्वाभावाच्च.

३ वृक्षा गुच्छा गुल्मा लताश्च वल्लयश्च पर्वगाश्चैव। तृणानि वनलता हरितानि औषध्यः जलरुहः कुहणाश्च बोद्धव्याः॥



For Private and Personal Use Only

३, लया य ४ वल्ली य ५ पव्वगा ६ चेव । तिण ७ वणलय ८ हरिओ ९ सहि १०, जलरुह ११ कुहणा य १२ बोद्धव्वा ॥१॥" इति द्वादशधा प्रत्येकवनस्पतिकायः । एषां विस्तरार्थः प्रज्ञापनादिभ्योऽवसेयः, ग्रन्थगौरवभयान्नात्र लिख्यत इतिगाथाक्षरार्थः॥१३॥

अथ सर्वैकेन्द्रियानाश्रित्य पृथ्व्यादयः पञ्चापि (कीदृशाः ?) क्व क्व भवन्ति (इति) तद्विशेषं (च) दर्शयन्नाह--

**पत्तेयतरुं मुत्तुं, पंच वि पुढवाइणो सयललोए । सुहुमा हवंति नियमा, अंतमुहुत्ताउ अद्दिस्सा ॥ १४ ॥**

व्याख्या-प्रत्येकतरुं मुक्त्वा प्रत्येकवनस्पतिं विहाय पृथ्व्यादयः पञ्चापि कायाः सूक्ष्मनामकर्मोदयात्सूक्ष्मैकेन्द्रियाः केवलिनां ज्ञानगोचराश्चर्मचक्षुषां छद्मस्थानामदृश्याश्चर्मचक्षुर्ज्ञानगोचरा (तीतत्वात्) निरवकाशतया सर्वत्र चतुर्दशरज्जुप्रमाणे लोके भवन्ति । इह सूक्ष्मजीवानां विशेषः सूत्रकृताऽत्र शास्त्रे स्वयमेवोक्तः । बादराणां तेषां तावदागमादर्शयति । तथा चोक्तं-"[१]एगिंदिय पंचिंदिय, उड्ढेय अहे अ तिरियलोए य । विगलिंदियजीवा पुण,तिरियलोए मुणेयव्वा ॥१॥ पुढवी आउ वणस्सई, बारसकप्पेसु सत्तपुढवीसु । पुढवी जा सिद्धसिला, तेऊ नरखित्ततिरिलोए ॥ २ ॥ सुरलोए वाविमज्झे, मच्छाई नत्थि जलयरा जीवा । गेविज्जे न हु वावी, वाविअभावे जलं नत्थि ॥ ३ ॥" इति विशेष उक्तः । तथा सूत्रकृता सूक्ष्माणां सर्वव्यापित्वं दर्शितं । अत्राह शिष्यः-प्रभो !

---

१ एकेन्द्रियाः पञ्चेन्द्रिया ऊर्ध्वं च अधश्च तिर्यग्लोके च । विकलेन्द्रियजीवाः पुनस्तिर्यग्लोके ज्ञातव्याः । १ । पृथ्वी आपो वनस्पतयः द्वादशसु कल्पेषु सप्तसु पृथ्वीषु । पृथ्वी यावत्सिद्धशिला तेजो नरक्षेत्रे तिर्यग्लोके । २ । सुरलोके वापीमध्ये मत्स्याद्या न सन्ति जलचरा जीवाः । ग्रैवेयकेषु नैव वाप्यः वाप्यभावात् जलं नास्ति । ३ ।



For Private and Personal Use Only

सर्वत्राञ्जनभृतसमुद्गकवद्विश्वं व्याप्य स्थितास्ते सूक्ष्मजीवास्तर्हि मनुष्यादीनां धावनवल्गनशयनासनादिभिरुपघातो भविष्यति । गुरुराह–न तेषां मनुष्यादिभिरुपघातः स्यादतिसूक्ष्मत्वात्, तीक्ष्णखड्गधारया छिद्यमानेऽपि वज्रघातेनाप्युपघातो न स्यात्, एवं वह्न्यादिभ्योऽपि नोपघातः । अतो ये व्यापारैर्न विनश्यन्ति ते सूक्ष्माः, इह तेषां कार्यानुपयोगित्वाद् बादरैरेव कार्यकारिता, ये बादरनामकर्मोदयवशाच्चर्मचक्षुषां गोचराः स्युरिति । तथा पुनः सूक्ष्माणामुत्पत्तिस्थानमभिधायायुःस्वरूपं दर्शयति–नियमादन्तर्मुहूर्त्तायुषः । कोऽन्तर्मुहूर्त्तः ? नवसमयेभ्य उपरि समयोनं घटीद्वयं, आगमे नवसङ्ख्यायाः पृथक्त्वसंज्ञा, तदन्तर्मुहूर्तमायुरिति । बादराणामायुः पुरो वक्ष्यति । अथ प्रसङ्गात्पञ्चानां स्थावराणां संस्थानविशेषं दर्शयति । तथा (च) सङ्ग्रहिण्यां "सुरा समा हुंडिया सेसत्ति" वचनात् सर्वावयवेष्वलक्षणं हुण्डं तत्संस्थानवन्तः । हुण्डत्वेऽपि विशेषं निर्दिशति पृथिव्यप्तेजोवायुवनस्पतीनां । तथा चागमे–"पुढवाइणं किं संठाणं पण्णत्ता ? गोयमा ! पुढवी मसूरसंठाणा पण्णत्ता, आउथिबुगबिंदुसंठाणा पण्णत्ता, तेऊ सूईकलावसंठाणा पण्णत्ता, वाऊ पडागासंठाणा पण्णत्ता, वणस्सई णाणासंठाणा पण्णत्ता, बेइंदिया तेइंदिया चउरिंदिया समुच्छिमपंचिंदियतिरिया हुंड-

---

१ सुराः समचतुरस्राः हुण्डसंस्थानाः शेषाः (उक्तशेषाः)

२ पृथ्व्यादीनां भदन्त ! किं संस्थानं प्रज्ञप्तम् ? गौतम ! पृथ्वी मसूरसंस्थाना प्रज्ञप्ताः, आपः स्तिबुकबिन्दुसंस्थानाः प्रज्ञप्ताः, तेजः सूचीकलापसंस्थानं प्रज्ञप्तं, वायुः पताकासंस्थानः प्रज्ञप्तः, वनस्पतिर्नानासंस्थानः प्रज्ञप्तः । द्वीन्द्रियास्त्रीन्द्रिय श्चतुरिन्द्रियाः संमूर्छिमपञ्चेन्द्रियतिर्यञ्चः हुण्डसंस्थानाः प्रज्ञप्ताः, गर्भव्युत्क्रान्ताः षाड्विधसंस्थानाः, संमुर्छिममनुष्या हुण्डसंस्थानसंस्थिताः ।

संठाणा पण्णता, गब्भवक्कंतिया छव्विहसंठाणा, संमुच्छिमामणूसा हुंडसंठाणसंठिया"। तथा कार्मग्रन्थिकास्तु संमूर्च्छिमतिरश्चामपि षड् षट् संस्थानानि वर्णयन्ति । "त (था च तत्पाठः) 'वेउव्विया वि हुंडसरीरा पडागासंठिया,पंचिंदियतिरियनराणं वेउव्विया अच्चुअंताणं देवाणं उत्तरवेउव्विया वि नाणासंठाणसंठिया पण्णत्ता, नारगाणं उत्तरवेउव्विया वि हुंडसंठाणसंठिया चेव" । तथा सुराणां संस्थानभणनावसरे द्वीन्द्रियादीनामप्युक्तं प्रत्प्रसङ्गतो नात्र सूत्रेऽन्तर्भावितामिति गाथार्थः ॥१४॥

इत्युक्तः स्थावराणां विशेषः प्रक्रमादथ त्रसानां प्रोच्यते, पूर्वं तावद्द्वीन्द्रियविशेषं प्रकटयन्नाह—

संखकवड्डयगंडोलजलोयचंदणगअलसलहगाई । मेहरकिमिपूयरगा, बेइंदिय माइवाहाई ॥ १५ ॥

व्याख्या-शङ्खः प्रतीतः, कपर्दको वराटकः, गण्डोलका उदरान्तर्बृहत्कृमयः, जलौकसः प्रतीताः, चन्दनका जलचरजीवविशेषाः ते तु समयभाषयाऽक्षत्वेन प्रतीताः, अलसा भूनागाः, येऽश्लेषास्थे भानौ जलदवृष्टौ सत्यां समुत्पद्यन्ते,लहको जीवविशेषो विषयप्रसिद्धः। आदिशब्दाच्छुक्त्यादयो ग्राह्याः। मेहरकः काष्ठकीटविशेषः। कृमय उदरान्तर्वर्तिनो हर्षा (अर्शो) मूलमपानकण्डूकराःस्त्रीयोन्यन्तर्गता वा। पूतराजलान्तर्वर्तिनो रक्तवर्णाःकृष्णमुखाः। मातृवाहिका गुर्जरदेशप्रसिद्धाःचुडेलीति। आदिग्रहणादीलिकादयोऽनुक्ता

१ वैक्रियाण्यपि हुण्डशरीराणि पताकासंस्थितानि। पञ्चेन्द्रियतिर्यग्नराणां वैक्रियाणि अच्युतान्तानां देवानामुत्तरवैक्रियाण्यपि नाना संस्थानसंस्थितानि प्रज्ञप्तानि, नारकाणामुत्तरवैक्रियाण्यपि हुण्डसंस्थानसंस्थितानि चैव ।



For Private and Personal Use Only

अपि द्वीन्द्रिया ग्राह्याः । सूत्रत्वाच्छन्दोभङ्गभयाद् द्वीन्द्रियपदे विभक्तिलोपः, अथवा कर्मधारयो वा । तथेहोभयत्रापि आदिशब्दग्रहणेन जलजाः स्थलजाः (श्र) भेदभिन्नत्वेन ज्ञेया इति गाथार्थः ॥ १५ ॥

इति द्वीन्द्रियजीवविशेषानुक्त्वा कतिचित्त्रीन्द्रियजीवनामानि गाथाद्वयेनाह--

**गोमी मंकुणजूआ, पिपीलि उद्देहिया य मक्कोडा । इल्लिय घयमिल्लीओ, सावयगोकीडजाईओ ॥१६॥**
**गद्दहयचोरकीडा, गोमयकीडा य धन्नकीडा य । कुंथुगु (गो) वालिय इलिया, तेइंदिय इंदगोवाई ॥१७॥**

व्याख्या–गोमीति गुल्मिः कर्णशृगाली । मत्कुणयूके प्रसिद्धे, उपलक्षणाल्लिक्षा अपि । पिपीलिकाः कीटिकाः । आसां जातिग्रहणादन्या अपि जातिविशेषेण लघुवृद्धभावेन ग्राह्याः । उपदेहिका वाल्मीक्यः । चः समुच्चये । मत्कोटकाःप्रतीताः। इल्लिका धान्यादिषूत्पन्नाः । "घयमिल्लि त्ति" घृतेलिकाः, प्राकृतत्वान्मकारागमः । "सावयेति" लोकभाषया सावाः, ते मनुष्याणामशुभोदर्कतः प्राग्भाविनि कष्टे शरीरकेशेषूत्पद्यन्ते । तथा गोकीटकाः प्रतीता एव । जातिग्रहणेन सर्वतिरश्चां कर्णाद्यवयवेषूत्पन्नाश्च जम्बुकचिच्चडादयो ग्राह्याः । तथा गर्दभका लोकविदिताः । चौरकीटा जीवविशेषाः । गोमयकीटाश्छगणोत्पन्नाः । धान्यकीटा घुणत्वेन प्रसिद्धाः । चकाराद्वातेरिकादयोऽपि मन्तव्याः । कुन्थुः प्रतीतः । गुवाली जीवविशेषः । ईलिका लट्टाः । इन्द्रगोपा ये आषाढे प्रथमवृष्टौ जीवा उत्पद्यन्ते, द्रष्टुः शिरोधृता ये वमनहर्त्तारो लोके मामलात्वेन प्रतीताः । इति त्रीन्द्रिया नामतः केऽप्युक्ताः । इहापि विभक्तिलोपश्छन्दस्त्वादिति गाथाद्वयार्थः ॥ १६–१७ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ केषाञ्चिच्चतुरिन्द्रियाणां नामतो (मानि) गाथया दर्शयन्नाह---

**चउरिंदिया य विच्छू, ढिंकुणभमरा य भमरिया तिड्डा। मच्छी डंसा मसगा, कंसारियकविलडोला य ॥१८॥**

व्याख्या–चतुर्भिरिन्द्रियैरुपलक्षिताश्चतुरिन्द्रिया इति पदं सर्वपदेषु संबध्यते। ततो वृश्चिकः प्रतीतः। ढिंकुणो जीवविशेषः। भ्रमरा भ्रमरिका च, वर्णाकारादिविविधभेदवत्तया पदद्वयदर्शनं। तिड्डाः–शलभाः तद्ग्रहणात्पतङ्गादयोऽपिज्ञेयाः।"मच्छीत्ति"मक्षिका उपलक्षणान्मधुमक्षिकादयोऽपि। दंशाः सिन्धुविषयप्रसिद्धाः प्रावृडुद्भवाः। मशकास्तु दंशाकारवन्तः सर्वर्तुभाविनश्च। एषां ग्रहणाद्धुणकुत्तिकादयो ग्राह्याः। कंसारिका विख्यातैव। "कविलडोल त्ति" कपिलको जीवविशेषः कस्मिंश्चिद्विषये टिंटण इति प्रसिद्धः। इत्यादयश्चतुरिन्द्रिया अनेके ज्ञेयाः। इह येषां नामोक्तं परं सम्यक्तया नोपलक्ष्यन्ते ते तत्तद्विषयभाषाविशेषैरप्रसिद्धत्वात्, परं त्विन्द्रियविशेषैरेकेन्द्रियादयो मन्तव्याः। तथैकेन स्पर्शनलक्षणेनेन्द्रियेणोपलक्षिता एकेन्द्रियाः। एवं स्पर्शनरसनाभ्यां द्वीन्द्रियाः। तथा स्पर्शनरसनघ्राणैस्त्रीन्द्रियाः। पूर्वोक्तैः सचक्षुर्भिरिन्द्रियैश्चतुरिन्द्रियाः। एतैः सश्रोत्रैरिन्द्रियैः पञ्चेन्द्रियाः। एवमिन्द्रियविभागैरेकेन्द्रियदया उपलक्षणीयाः। अथवाऽन्यदपि स्वरूपं किञ्चिद्दर्श्यते, यथा–प्रायशो द्वीन्द्रियाणां चरणा न भवन्ति। त्रीन्द्रियाणां चतुर्भ्यश्चरणेभ्य उपरि षड् बहवो वा चरणा भवन्ति कर्णशृगालीव। चतुरिन्द्रियाणां तु षड्वताष्टौ चरणाः स्युः। पञ्चेन्द्रियाणां तु द्वौ चत्वारोऽष्टौ वा, अथवा सर्पमत्स्यादीनामिव न तु नियमः। अथवा मूर्ध्नो मुखस्योभयोः पार्श्वयोर्वा वालौ स्यातां येषां ते त्रीन्द्रियाः। तथा पुनर्मूर्ध्नि येषां वालाः शृङ्गवद्भवन्ति ते चतुरिन्द्रियाः। इत्युक्तो द्वीन्द्रियादीनामुपलक्षणोपाय इति गाथार्थः ॥ १८ ॥

---

१ चत्वारि इन्द्रियाणि येषामिति.



For Private and Personal Use Only

अथ पञ्चेन्द्रियाणां भेदान् गाथाषट्केन व्यक्तीकुर्वन्नाह--

पंचिंदिया य चउहा, नारय तिरिया मणुस्सदेवा य । नेरइया सत्तविहा, नायव्वा पुढविभेएणं ॥ १९ ॥
जलयरथलयरखयरा, तिविहा पंचिंदिया तिरिक्खा य। सुसुमार मच्छ कच्छव, गाहा मगरा य जलचारी ॥२०॥
चउपय उरपरिसप्पा, भुयपरिसप्पा य थलयरा तिविहा । गोसप्पनउलपमुहा बोद्धव्वा ते समासेणं ॥२१॥
खयरा रोमयपक्खी, चम्मयपक्खी य पायडा चेव। नरलोयाओ बाहिं, समुग्गपक्खी वियपक्खी ॥२२॥
सव्वे जल थलखयरा, समुच्छिमा गब्भया दुहा हुंति । कम्माकम्मगमहिआ-अंतरदीवा मणुस्सा य ॥ २३ ॥
दसहा भवणाहिवई, अट्ठविहा वाणमंतरा हुंति । जोइसिया पंचविहा, दुविहा वेमाणिया देवा ॥ २४ ॥

व्याख्या—स्पर्शनरसनघ्राणचक्षुःश्रोत्रलक्षणानीन्द्रियाणि पञ्च येषां ते पञ्चेन्द्रियाः । ते चतुर्विधाः नारकतिर्यङ्मनुष्यदेवभेदैः । तत्र नारका रत्नप्रभादिपृथ्वीभेदेन सप्तधा । तद्यथा-"कै गै रै शब्दे" नरानुपलक्षणात्तिरश्चोऽपि योग्यतानतिक्रमेण कायन्त्याकारयन्तीति नरकाः सीमन्तकादयस्तेषु भवा नारकाः । एते नारकाः क्व भवन्ति तद्विशेषं दर्शयति । तथा रत्नप्रभादिषु पृथ्वीषु । तत्र रत्नानि वज्रादीनि, प्रभाशब्दोऽत्र रूपवाची बाहुल्यवाची वा, ततो रत्नानि प्रभा स्वरूपं स्वभावो रत्नानां प्रभा बाहुल्यं यस्याः सा रत्नप्रभा रत्नबहुला इत्यर्थः । तद्बाहुल्यं च खरकाण्डगतप्रथमरत्नकाण्डापेक्षं, तथाप्य(ह्य)स्यां षोडश योजनानां सहस्राः(णि) प्रथमं

खरकाण्डं, चतुरशीतिर्द्वितीयं पङ्कबहुलकाण्डं, अशीतिस्तृतीयं जलबहुलकाण्डमिति । शेषास्तु पृथिव्यः सर्वा अपि पृथ्वीस्वरूपाः । केवलं शर्कराप्रभा शर्कराबहुला इत्यादिनामानुसारतोऽन्वर्था भावनीयाः यावत्तमस्तमसः प्रकृष्टतमसः तमतमसो वाऽत्यन्ततमसः प्रभा बाहुल्यं यस्यां सा तमस्तमःप्रभा तमतमःप्रभा वेति । उक्तं च-"तेत्थ सहस्सा सोलस, खरकंडं पंकबहुलकंडं तु । चुलसीइ सहस्साई, असीइ जलबहुलकंडं तु ॥१॥ एवं असीइ लक्खा, खरकंडाईहि घम्मपुढवीए । सेसा पुढविसरूवा, पुढवीओ हुंति बाहुल्ला ॥ २ ॥" ततो रत्नप्रभा १ शर्कराप्रभा २ वालुकाप्रभा ३ पङ्कप्रभा ४ धूमप्रभा ५ तमःप्रभा ६ तमस्तमःप्रभा ७ । आसां पृथ्वीनामेवं नामानि । तथा चासां निरन्वया नामसंज्ञाः प्रोच्यन्ते-"घंम्मा १ वंसा २ सेला ३, अंजण ४ रिट्ठा ५ मघा य ६ माघवई ७ । नामेहिं पुढवीओ, छत्ताईछत्तसंठाणा ॥ १ ॥" सुगमैव । नवरं सप्तापि पृथिव्यः समुदिताश्छत्रमतिक्रम्य छत्रं तत्सं-स्थानाः। यथा ह्युपरि च्छत्रं लघु,तस्याधो महत्, ततोऽप्यधो महत्तरं, एवमेवाधोऽधो महाविस्ताराः। अथासां पिण्डबाहुल्यान्तरादिवक्त-व्यता प्रज्ञापनादिशास्त्रेभ्योऽवसेया । पुनरेतासु नारकाणां गतिस्थितिअवगाहना (वेदना) दि प्रस्तुतमपि ग्रन्थकृता नोक्तं, मयाऽपि ग्रन्थगौरवभयान्नात्र लिख्यते । इत्युक्तो नारकपदस्यार्थः ॥ १९ ॥ अथ तिरश्चां नामार्थजात्योर्विशेषं व्याकुर्वन्नाह-जल० पूर्वं तिर्यक् छब्दार्थः, स चायं-तिर्यगञ्चन्तीति यदि वा तिरोहिताः स्वकर्मवशवर्त्तिनः सर्वासु गतिषु गच्छन्त्युत्पद्यन्त इति तिर्यञ्चः, त्रिधा जल-

---

१ तत्र षोडश सहस्राणि खरकाण्डं पङ्कबहुलकाण्डं तु । चतुरशीतिः सहस्राणि अशीतिर्जलबहुलकाण्डं तु ॥ १ ॥ एवमशीत्याधिकं लक्षं खरकाण्डादिभिः घर्मपृथिव्याः । शेषाः पृथ्वीस्वरूपाः पृथ्व्यो भवन्ति बाहुल्यात् ॥ २ ॥

२ घर्मा वंशा शैला अञ्जना रिष्ठा मघा च माघवती । नामभिः पृथिव्यश्छत्रातिच्छत्रसंस्थानाः ॥ १ ॥

चरादिभेदैः। जले पानीये चरन्तीति जलचराः। "चर गतिभक्षणयोः" इति प्रसिद्धं, तदभावे विपत्तिमाप्नुवन्ति। तथा स्थले भूम्यां (भूमेः उपरि चरन्तीति स्थलचराः। खे आकाशे चरन्तीति खचराः, अलुप्तविभक्तिके खेचरा इत्यपि स्यात्। अथ *पूर्वपदस्य विशेषं दर्शयति-सुसुमारो जलचारी जीवविशेषः प्रसिद्ध एव। मत्स्योऽपि विदित एव, परं मत्स्यनामग्रहणेन सर्वे भेदास्तेषां ग्राह्याः, विविधाकारवत्तया। यदुक्तं श्रीआवश्यकबृहद्वृत्तौ पञ्चशतादेशाधिकारे-"तत्थ जे पढमवज्जा नेगमसंगहववहारा य ते तिविहं पि उप्पत्तिं इच्छंति, समुट्ठाणेणं जहा-तित्थगरस्स सएणं उट्ठाणेणं वायणाए वायणायरियस्स निस्साए जहा भगवया गोयमसामी वा दो (भगवओ गोयमसामिणो२), लद्धी (इ)वा-अभवियस्स णत्थि, भवियस्स पुण उवदेसगमंतरेणावि पडिमादि दट्ठूणं सामाइयावरणिज्जाणं कम्माणं खओवसमेणं सामइयलद्धी समुपज्जदि, जहा-सयंभुरमणसमुद्दे पडिमासंठिदा य मच्छा पउमपत्तावि पडिमा-

* जलचरलक्षणस्य

१ अत्र प्राचीनो भाग उत्पत्त्यधिकारेऽर्थतः पाश्चात्यस्तु कथञ्चित्पञ्चशतादेशाधिकारे

२ तत्र ये प्रथमवर्जा नैगमसंग्रहव्यवहाराश्च (पाठस्तु पढमे नयत्तए तिविहं) ते त्रिविधामप्युत्पत्तिमिच्छन्ति. समुत्थानेन (शरीरेण) यथा-तीर्थकरस्य स्वकेनोत्थानेन १, वाचनया-वचनाचार्यनिश्रया यथा भगवतो गौतमस्वामिनो २, लब्ध्या-अभव्यस्य नास्ति, भव्यस्य पुनरुपदेशकमन्तरेणापि प्रतिमादि दृष्ट्वा सामायिकावरणीयानां कर्मणां क्षयोपशमेन क्षयोपशमलब्धिः समुत्पद्यते, यथा स्वयम्भूरमणसमुद्रे प्रतिमासंस्थिता मत्स्याः पद्मपत्राण्यपि प्रतिमासंस्थितानि साधुसंस्थितानि च। सर्वाणि किल तत्र संस्थानानि सन्ति, मुक्त्वा वलयसंस्थानम्, ईदृशं नास्ति जीवसंस्थानमिति। तानि संस्थानानि दृष्ट्वा कस्यचित् सम्यक्त्वश्रुतचारित्राचारित्रसामायिकलब्धिः समुत्पद्येत।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





संठिया साधुसंठिदा य, सव्वाणि किर तत्थ संठाणाणि अत्थि मोत्तूण वलयसंठाणं, एरिसं णत्थि जीवसंठाणं ति, ताणि संठाणाणि दट्ठूणं कस्सइ सम्मत्तसुयचचरित्ताचरित्तसामाइयलद्धी समुप्पज्जेज्जा" इति । तथा कच्छपः कूर्मः । ग्राहो जीवविशेषस्तन्तुकतयेति प्रसिद्धः । मकरो महान्मत्स्यः । इत्यादयो जलचरा अनेके ज्ञेयाः । अधुना स्थलचारिणां विशेषं प्रकटयन्नाह–" चउपय० " स्थलचरास्तिर्यञ्चस्त्रिधा–चतुष्पदा उरःपरिसर्पा भुजपरिसर्पाश्च। तत्र चतुर्भिः पदैश्चरणैश्चरन्ति गच्छन्ति ये ते चतुष्पदाः । उरसा हृदयेन परिसर्पन्ति ये ते उरःपरिसर्पाः, " आदिमध्यलोप " इतिकृत्वा विसर्गलोपः, कृष्णोरगादयः । भुजाभ्यां परिसर्पन्ति ये ते भुजपरिसर्पाः गृहगोधादय : । इत्येतैर्लक्षणैरुपलक्षितास्तिर्यञ्चः । समासेनेति नामग्रकथनेन स्वयमेव ज्ञेयाः ॥ २१ ॥ इत्युक्तः स्थलचरविभागोऽथ खचरविशेषं व्याकरोति–"खयरा०" रोम्णो जाता ये पक्षास्ते रोमजपक्षाः, रोमजपक्षाः सन्त्येषामिति रोमजपक्षिणः शुककाकादयः । चर्मणो जाता ये ते चर्मजाः, चर्मजाश्च ते पक्षाश्च, ते सन्त्येषामिति चर्मजपक्षिणः वल्गुलीचर्मचटिकादयः । ते द्विधा अपि प्रकटा एव पक्षोपलक्षितत्वात्। चः समुच्चये। एवकारस्तु विविधजातिविशेषदर्शनार्थः । एते हि पञ्चचत्वारिंशल्लक्षयोजनप्रमाणमनुष्यलोकान्तर्वर्तिनः । तत्र मनुष्यलोकसंज्ञा कियद्यावत्तद्दर्शयति–तथा जम्बूद्वीपो धातकीखण्डः पुष्करवरद्वीपार्धं चेत्यर्धतृतीयद्वीपाः । लवणः कालोदश्चेति द्वौ समुद्रौ । एते समुदिता हेममयमानुषोत्तराचलपरिक्षिप्तं मनुष्यक्षेत्रं, अत्र मनुष्याणां जन्मनो मरणस्य च संभवात्। तत्र पञ्चचत्वारिंशत्सङ्ख्येषु भरतादिक्षेत्रेषु षट्पञ्चाशत्सङ्ख्येषु चान्तरद्वीपेषु जन्ममरणं प्रतीतं, न तु वर्षधरपर्वतादिषु। प्रायो जन्म न घटते, मरणं तु संहरणतो विद्यालब्धितो वा तत्रगतानां संभवति। मनुष्यक्षेत्राद्बहिर्जन्ममरणभाजो मनुष्या न भूता न भवन्ति न भविष्यन्ति। यद्यपि कश्चिद्देवो दानवो विद्याधरो वा वैरनिर्यातनार्थं बुद्धिमेवं विधत्ते, यथाऽस्मात्स्थानादुत्पाट्यमनुष्यमेनं नरक्षेत्राद्बहिः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रक्षिपामि, येनायमूर्ध्वशोषं शुष्यन्म्रियत इति, तथापि लोकानुभावादेव सा काचिद्बुद्धिर्भूयोऽपि जायते, यथासंहरत्येव न, संहृत्य वा पुनरानयति। तथा येऽपि जङ्घाचारिणो विद्याचारिणो वा नन्दीश्वरादीनपि यावद् गच्छति, तेऽपि तेभ्यो मनुष्यक्षेत्रमागत्यैव म्रियन्ते, तेनार्धतृतीयद्वीपसमुद्रपरिमाणमेव मनुष्यक्षेत्रं न शेषमिति। तच्चायामविष्कम्भाभ्यां पञ्चचत्वारिंशल्लक्षयोजनानामिति। अथ तद्बहिरपि द्विप्रकारा एव। के ते? एके समुद्गकपक्षिणः अपरे विततपक्षिणः। तत्र समुद्गकवत्संपुटीभूताः पक्षा एषां सन्तीति, वितता विस्तृताएवपक्षाः सन्त्येषामिति। तेषामाकाश एवोत्पत्तिविपत्ती श्रूयेते संप्रदायादिति ॥२२॥ इत्युक्तः खचारिणां विशेषः। अथ तिरश्चां सर्वसामान्यतया विशेषं गाथार्धेन दर्शयन्नाह–"सव्वे जल०" सर्वे तिर्यञ्चो जलचरस्थलचरखचरादिभेदभिन्ना द्विधा–संमूर्छिमगर्भजभेदाभ्यां। तत्र संमूर्छनात्संमूर्छिमाः मातृपितृनिरपेक्षतया, तथा गर्भे जाता यदि वा गर्भाज्जाता वेति गर्भजाः, ते तु पञ्चेन्द्रिया एव तिर्यञ्चोऽन्ये एकद्वित्रिचतुरिन्द्रियास्तिर्यञ्चः संमूर्छिमा एव। अथैषां संमूर्छिमानुत्पत्तिविशेषं दर्शयति, यथा–एकेन्द्रियाः द्वीन्द्रिया स्वजातिमलनिरपेक्षतयोत्पद्यन्ते, त्रीन्द्रियास्तु स्वजातिपुरीषादिषुत्पद्यन्ते, चतुरिन्द्रियास्तु स्वजातिलालामलस्पर्शादेभ्य उत्पद्यन्ते। पञ्चेन्द्रियेषु मत्स्यादयो जलचरा द्विधाऽपि स्युः। स्थलचरेषु उरःपरिसर्पा भुजपरिसर्पाः प्रायशो द्विधा स्युः। चतुष्पदतिर्यञ्चः संमूर्छिमाः क्वाप्युत्पद्यन्ते। गर्भजतिर्यङ्मनुष्याः प्रसिद्धा एव। संमूर्छिममनुष्याणामुत्पत्तिस्वरूपं पुरतः प्रादुष्करिष्यति। तथा खचरेषु संमूर्छिमाः शुकदहिकखञ्जरीटादयः क्षेत्रेष्वीतिकारणतयोत्पद्यन्ते, तज्जात्यखिलावयववत्वेन निष्पद्यन्ते। गर्भजखचरास्तु अण्डजास्ते प्रसिद्धा एव। इत्युक्तस्तिरश्चां विशेषःप्रस्तावान्मनुष्यजातिविशेषं गाथार्धेनाह–"कम्माकम्म०" कर्म–कृषिवाणिज्यादि मोक्षानुष्ठानं–श्रुतचारित्ररूपं वा तत्प्रधाना मह्यो–भूमयस्ताः पञ्चदश भवन्ति। तद्यथा–एकं भरतक्षेत्रं जम्बूद्वीपे, द्वे भरते धातकीखण्डे, द्वे भरते पुष्करार्धे, एवं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्च भरतानि। एवमेव पञ्च महाविदेहाः तथैरवतानि च प्रत्येकं पञ्च पञ्चेति। तासु जाताः कर्ममहीजाः। कर्म पूर्वोक्तं, तद्यत्र न ता अकर्ममह्यः त्रिंशन्मिताः। तद्यथा–"हैमवंत १, हरिवर्ष २, देवकुरवः ३, तथोत्तरकुरवः ४, रम्यकं ५, ऐरण्यवतं ६ चैताः षण्मह्यः। पञ्चभि र्मेरुभिर्गुणितास्त्रिंशत्सङ्ख्या भवन्ति। तासु महीषु जाता अकर्ममहीजाः एताश्च सर्वा अपि युगलधार्मिकाणां स्थानमाश्रयाः, युगलधार्मिका एव नरतिर्यञ्चस्तत्र वसन्तीतिभावः। ते दशविधकल्पद्रुमाप्ताशनपानवसनालङ्कारादिभिः प्राप्तेन्द्रियसुखाः। इत्युक्तः कर्माकर्ममहीजानां विशेषः। अथान्तरद्वीपस्वरूपं प्रस्तावयति। उक्तं च–"हिमवंतंता विदिसीसाणाइगयाइ चउसु दाढासु। सग सग अंतरदीवा, पढमचउक्कं च जगईओ ॥१॥ जोयणतिसएहि तओ, सय सय वुड्ढी य छसु चउक्केसु। अन्नुन्नजगइअंतर, समअंतरि अंतरा सव्वे ॥ २ ॥" हिमवदुभयप्रान्ताभ्यां द्वे द्वे दंष्ट्रे निर्गते। ततस्तासु चतसृषु दंष्ट्रासु विदिक्ष्वीशानादिषु सप्त सप्तान्तरद्वीपा भवन्ति। तेष्वन्तरद्वीपेषु प्रथमचतुष्कं जगतीतो योजनानां त्रिभिः शतैरस्ति। ततः परं षट्सु चतुष्केषु अन्योऽन्यान्तरे जगतीद्वीपान्तरे च योजनशतवृद्धिश्च भवति योजनशतं वर्धत इत्यर्थः। तथा सर्वेऽपि द्वीपा अन्तरसमविस्तारा भवन्ति। अयमर्थः–जगतीद्वीपान्तराले द्वीपानां च विस्तारे प्रथमद्वीपचतुष्कमाश्रित्य योजनशतत्रयं, द्वितीयं चतुष्कमाश्रित्य योजनशतचतुष्टयं, इत्याद्येकैकयोजनशतवृद्ध्या यावत्सप्तमं द्वीपचतुष्कमाश्रित्य योजनशतनवकं भवतीत्यर्थः। अन्तरद्वीपानामेव जलोपरिगतं प्रमाणमाह–"पढमचउक्कुच्चबर्हि, अड्ढाइय जोयणे य वीसंसा। सयरिंस वुड्ढि परओ, मज्झदिसिं सव्वकोसदुगं॥ ३॥" द्वीपानां प्रथमचतुष्कं बहिर्जम्बूद्वीपदिशि उच्चत्वं जलोपरि सप्रकाशं सार्धे द्वे योजने विंशतिः पञ्चनवतिभागाश्च। एतदङ्कानयनविधिः क्षेत्रसमासवृत्तेरवसेयः। स्थूलवृत्त्या चतुष्के चतुष्के सप्ततिसङ्ख्यानां पञ्चनवतिभागानां वृद्धिः क्रियते सर्वेषामन्तरद्वीपानामेवं जलोपरिगतं प्रमाणं भवति। अथैषामन्तरद्वीपानां नामान्याह-



For Private and Personal Use Only

" सव्वे सवेइयंता, पढमचउक्कम्मि तेसि नामाइं । एगोरुग आभासिय, वेसाणिय चेव लंगूले ॥ ४ ॥ " सर्वेऽन्तरद्वीपा वेदिकावनखण्डमण्डिता ज्ञेयाः । तथा प्रथमचतुष्के तेषामुत्तरपूर्वादिदिशमादितः कृत्वा प्रादक्षिण्येन नामानि यथा–एकोरुकः १, आभाषिकः २, वैषाणिकः ३, लाङ्गूलश्चेति ४ नामानश्चत्वारो द्वीपा वर्तन्ते । अथ "बीयचउक्के हय १ गय २, गो ३ सक्कुलिपुव्वकण्ण ४ नामाणो । आयरस १ मिंढग २ अओ ३, गोपुव्वमुहाउ ४ तइयम्मि ॥ ५ ॥ अथ द्वितीयचतुष्के हयकर्ण १ गजकर्ण २ गोकर्ण ३ शष्कुलीकर्ण ४ नामानश्चत्वारो द्वीपा वर्त्तन्ते । तृतीयचतुष्के आदर्शमुख १ मिण्ढमुख २ अयोमुख ३ गोमुख ४ नामानश्चत्वारो द्वीपा वर्त्तन्ते । अथ–" हयगयहरिवग्घमुहा, चउत्थए आसकण्णहरिकण्णो । अकन्नकन्नपावरण, दीव पंचमचउक्कम्मि ॥ ६ ॥ " चतुर्थचतुष्केऽश्वमुख १ गजमुख २ सिंहमुख ३ व्याघ्रमुख ४ नामानश्चत्वारो द्वीपा वर्त्तन्ते । पञ्चमचतुष्के अश्वकर्ण १ हरिकर्ण २ अकर्ण ३ कर्णप्रावरण ४ नामानश्चत्वारो द्वीपा वर्त्तन्ते । अथ–"उक्कमुहो मेहमुहो, विज्जुमुहो विज्जुदंत छट्ठम्मि । सत्तमगे दंतंता, घणलट्ठनिगूढसुद्धा य ॥७॥ षष्ठे चतुष्के उल्कामुख १ मेघमुख २ विद्युन्मुख ३ विद्युद्दन्त ४ नामानश्चत्वारो द्वीपा वर्तन्ते । सप्तमके चतुष्के घनदन्त १ लष्टदन्त २ निगूढदन्त ३ शुद्धदन्त ४ नामानश्चत्वारो द्वीपा वर्तन्ते । " एमेव य सिहरिम्मिवि, अडवीसं सव्व हुंति छप्पन्ना । एएसु जुयलरूवा, पलियासंखंस आउ नरा ॥ ८ ॥ एवमेव पूर्वोक्तरीत्या हि शिखरिणि पर्वतेऽप्यष्टाविंशतिर्द्वीपा भवन्तीति । सर्वे मिलिताः षट्पञ्चाशदन्तर्द्वीपा भवन्ति । एतेषु षट्पञ्चाशदन्तर्द्वीपेषु युगलरूपा मनुष्याः पल्योपमासङ्ख्येयवर्षायुषो वसन्ति । अथ शरीरप्रमाणादिविशेषं दर्शयति–" जोयणदसमंसतणू, पिट्ठिकरंडाणमेसि चउसट्ठी । असणं च चउत्थाओ, गुणसी दिणवच्चपालणया ॥ ९ ॥ " तेषां युगलधर्मिणां तनुः–शरीरं योजनदशांशोच्चं अष्टशतधनुरुच्छ्रितमित्यर्थः । तथैतेषां शरीरे पृष्ठिकरण्डानां चतुःषष्टिर्भवति । तथैतेषामाहारेच्छा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकान्तराहाद्भवति । तथैतेषामेकोनाशीतिर्दिनान्यपत्यपालनभावतश्चेति । अथ सूत्रपदं व्याख्यानयति–तत्र मनुष्यशब्दस्य निरुक्तिः मनोरपत्यं मानुष्यः मनोर्याणौ षश्चान्तः(६–१–९४)यप्रत्यये मनुष्यः अण्प्रत्यये मानुषः मानवानि (इ) ति, पुनः के मनुष्याः? आन्तरद्वीपाः समुद्रान्तर्भूतषट्पञ्चाशद्द्वीपसमुद्भवाः । चः समुच्चये । इत्युक्ता एकोत्तरशतक्षेत्रसमुद्भवा मनुष्यास्त्रिविधाः । अथ प्रक्रमाद्देवभेदान् विवृण्वन्नाह—" दसहा० " पूर्वं तावद्देवानां चत्वारो भेदा भवनाधिपतिव्यन्तरज्योतिष्कवैमानिकादिकभेदैर्भवन्ति । इह प्रस्तावाद्भवनाधिपतीनां नामान्वयसङ्ख्याविशेषं व्यक्तीकुर्वन्नाह–तत्र सामान्येन भवनवसनशीला भवनवासिनः । यद्यपि कायमानसन्निभेषु परमरमणीयकभूमिषु आवासापरनामसु महामण्डपेषु प्रायोऽसुरकुमाराः परिवसन्ति कदाचिदेव भवनेषु । शेषास्तु नागकुमारादयो भूम्ना भवनेषु कदाचिच्चावासेष्विति । स्थानस्थानिनोरभेदाद्भवना असुरकुमारादयो देवास्तेषामधिपतय इन्द्रा भवनाधिपतयश्चेति । ते दशधा, तद्यथा–" असुर १ नाग २ तडित् ३ सुवर्ण ४ अग्नि ५ द्वीप ६ उदधि ७ दिक् ८ पवन ९ स्तनिताः १० " । एतेऽसुरादयो दशापि कुमाराः शान्ता ( कुमारशब्दान्ता ) ज्ञेयाः । अथ ते क्व वसन्ति ? तद्दर्शयति, तथाहि—
"इह मंदरस्स हिट्ठा, पुढवी रयणप्पहा मुणेयव्वा । तिसु भागेसु विभत्ता, अस्सीयं जोयणं लक्खं ॥ १ ॥ तत्थेव भवणवासी देवा निवसंति दोसु भागेसु । तइए पुण नेरइया, हवंति बहुवेयणा निययं ॥ २ ॥ " क्वचिदित्यपि दृश्यते–ऊर्ध्वाध एकं सहस्रं मुक्त्वा एकलक्षाष्टसप्ततिसहस्रबहुमध्ये रुचकाधोऽष्टशतयोजनेषु भवनपतिस्थितिः, शेषे तु नारकाणामिति दृश्यते । अन्ये त्वाहुः–नवतियोजन-

१ इह मन्दरस्याधस्तात् पृथ्वी रत्नप्रभा मुणितव्या त्रिभिर्भागैर्विभक्ता अशीतिसहस्राधिकं लक्ष योजनानाम् ॥१॥ तत्रैव भवनवासिनो देवा निवसन्ति द्वयोर्भागयोः तृतीये पुनर्नैरयिका भवन्ति बहुवेदनाः सततम् ॥ २ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहस्राणामधस्ताद्भवनानि अन्यत्र चोपरितनमधस्तनं च योजमसहस्रं मुक्त्वा सर्वत्रापि यथासंभवमावासा इत्यपि। तत्त्वं तु केवलिनो विदन्ति। परं नरकप्रस्तटान्तराले भवनपतय इति संगम्यं। उक्तं च–"[1]बारससु अंतरेसुं, इक्कं इक्कं अहोवरिं मुत्तुं। मज्झंतरेसु जाई, वसंति दस भवणवासीणं ॥ १ ॥" सुगमार्थैव। परं रत्नप्रभायां त्रयोदश नरकप्रस्तटास्तेषु द्वादशान्तराणि तेभ्य एकमुपर्येकमधोऽन्तरमपनीयते शेषेषु दशस्वन्तरेषु भवनवासिन इति तात्पर्यमिति। एषां दशानामपि एकैकस्मिन्निकाये द्वौ द्वाविन्द्रौ स्यातां, दक्षिणोत्तरश्रेण्याश्रयणात्, सर्वाग्रेण चमरादयो विंशतिरिन्द्रा भवेयुरिति। तथैतेषां भवनसङ्ख्यावगाहनाशक्तिवर्णध्वर्यायुश्चिह्नादयो नात्र लिख्यन्ते, सूत्रकृतापि प्रस्तुतं नोपदर्शितमतोऽन्यशास्त्रेभ्योऽवसेयमिति। अथ भवनवासिवक्तव्यतां निरूप्य गाथाया द्वितीयपादेन व्यन्तराणां सूचयति–" अट्ठविह त्ति " विविधमन्तरं वनान्तरादिकमाश्रयतया येषां ते व्यन्तराः। तथा वनानामन्तरेषु शैलान्तरेषु कन्दरान्तरेषु वसन्ति तत्प्रसिद्धमेव यथा ( अथवा विगतं ) भृत्यवच्चक्रवर्त्याद्याराधकत्वेन (अन्तरं) विशेषो मनुष्येभ्यो येषां ते व्यन्तराः। तथा वनानामन्तरेषु भवाः पृषोदरादित्वान्मागमे वानमन्तरा इत्यपि। तेऽष्टविधाः अष्टप्रकारा भवन्ति। ते चामी–पिशाचाः १ भूताः २ यक्षाः ३ राक्षसाः ४ किन्नराः ५ किंपुरुषाः ६ महोरगाः ७ गन्धर्वाः ८ इति। अथैतेषां क्वावस्थानं? तदाह–"[2]रयणाइ पढमजोयण–सहसे इक्किक्कसयमहोवरिं मुत्तुं। अट्ठसयए अट्ठ य, विंतरजाईउ पत्तेयं ॥१॥" पुनरन्ये त्वष्टप्रकारा व्यन्तराः, तद्यथा-"[3]एवं

---

१ द्वादशस्वन्तरेषु एकमेकमध उपरि च मुक्त्वा। मध्यान्तरेषु जातयो वसन्ति भवनवासिनाम् ॥ १ ॥

२ रत्नायाः प्रथमे योजनसहस्रे एकमेकं शतमध उपरि च मुक्त्वा। अष्टसु शतेषु अष्टौ च व्यन्तरजातयः प्रत्येकम् ॥ २ ॥

३ एवं प्रथमे शते योजनदशकमध उपरि च मुक्त्वा। अष्टसु दशकेषु जातयः अणपन्नाद्याः परिवसन्ति ॥ १ ॥ अणपन्नः (अर्णपत्री) पञ्चप्रज्ञः ऋषिवादी भूतवादी चैव। क्रन्दी च महाक्रन्दी कूष्माण्डश्चैव पतङ्गश्च ॥ २ ॥

For Private and Personal Use Only

पढमंमि सए, जोयणदसगं अहोवरिं मुत्तुं । अट्ठसु सगेसु जाई, अणपन्नाई परिवसन्ति ॥ १ ॥ " ते त्विमे-" अणपन्नी १ पणपन्नी २ इसिवाई ३ भूइवाइए ४ चेव । कंदी य ५ महाकंदी ६ कोहंडे ७ चेव पयए य ८ ॥ २ ॥ " द्वयोरपि जात्योः श्रयणात् षोडश भेदा भवन्ति । एषामप्येकैकस्यां जातौ द्वौ द्वाविन्द्रौ । एवं त्रिंशदिन्द्रास्तेषु भवेयुरिति । आयुर्वर्णादि शास्त्रान्तरेभ्योऽवसेयमिति । इत्युक्तो व्यन्तरविभागः । अथ ज्योतिष्कस्वरूपं निरूप्यते-द्योतनं ज्योतिरौणादिकत्वात्तदेषामस्तीति (व्रीह्यादिभ्यस्तौ) ७-२-५ ) इति इक प्रत्ययः इकारलोपे ज्योतिष्काः । ते पञ्चविधाः तद्यथा-चन्द्राः १ सूर्याः २ ग्रहमण्डलादयोऽष्टाशीतिसङ्ख्याः ३ अनुचन्द्रं नक्षत्राण्यश्विन्यादीन्यष्टाविंशतिः ४ अनुचन्द्रं तारकाः षट्षष्टि सहस्राः कोटाकोटयो नव शतानि कोटाकोटयः पञ्चसप्तति-कोटयोऽनुचन्द्रं ज्ञेयाश्चेति ५ । एषामवस्थितिस्वरूपं प्रस्तावयति । उक्तं च सङ्ग्रहिण्यां-[१]समभूयलाउ अट्ठहिं, दसूणजोयणसएहि आरब्भ । उवरि दसुत्तरजोयण-सयम्मि चिट्ठंति जोइसिया ॥ १ ॥ तत्थ रवी दसजोयण, असीइ तदुवरि ससी य रिक्खेसु । अह भरणि साइ उवरिं, बहिं मूलोब्भितरे अभिई ॥ २ ॥ताररविचंदरिक्खा, बुहसुक्काजीवमंगलसणिया । सगसयनउ दस असीइ, चउ चउ कमसो तिया चउसु ॥३॥ एताः प्रकटार्था एव । तथैते द्विप्रकाराश्चराः स्थिराश्चेति । तत्र मनुष्यलोकान्तर्वर्तिनश्चराः, तद्-बहिस्तु स्थिराः । तेषां स्थिराणां मनुष्यलोकवर्तिभ्यो ज्योतिष्केभ्यो विमानान्यायामविष्कम्भाभ्यामुच्चत्वेन चार्धप्रमाणानि । विस्त-

---

१ समभूतलादष्टभिः दशनैर्योजनशतैरारभ्य उपरि दशोत्तरयोजनशते तिष्ठन्ति ज्योतिष्काः ॥१॥ तत्र रविर्दशसु योजनेषु अशीतौ तदुपरि शशी च ऋक्षेषु अधो भरणिः स्वातिरुपरि बहिर्मूलमभ्यन्तरेऽभिजित् ॥२॥ तारकारविचन्द्रनक्षत्राणि बुधशुक्रजीवमङ्गलशनैश्चराः सप्तशतानि नवत्यधिकानि दश अशीतिः चत्वारि चत्वारि क्रमशस्त्रिकाश्चतुर्षु ॥३॥

सास्वाभाव्याच्च सदावस्थाना (स्थिता) नीत्यर्थः । तेऽपि पञ्चप्रकारा एव सन्ति । तेषामायुःप्रमाणादि प्रकटत्वान्नोच्यते । इत्युक्तं ज्योतिष्काणां स्वरूपं । अथ क्रमायातं वैमानिकस्वरूपं निरूपयति–तथा दुविहा० तत्र विशिष्टपुण्यैर्जन्तुभिर्मान्यन्ते उपभुज्यन्त इति विमानानि तेषु भवा वैमानिकाः, ते च द्विधा कल्पोपपन्नाः कल्पातीताश्च । तत्र कल्पः स्थितिर्मर्यादा जीतमित्येकार्थाः । स चेन्द्रस्तत्सामानिकादिव्यवस्थारूपस्तं प्रतिपन्नाः कल्पोपपन्नाः । ते तु सौधर्म १ ईशान २ सनत्कुमार ३ माहेन्द्र ४ ब्रह्म ५ लान्तक ६ शुक्र ७ सहस्रार ८ आनत ९ प्राणत १० आरण ११ अच्युत १२ निवासिनः । परतस्तु ग्रैवेयकानुत्तरविमानवासिनः सर्वेषामपि तेषामहमिन्द्रत्वात्ते कल्पातीताः सामान्यतया । अथ नामतो ग्रैवेयकानां विशेषो निरूप्यते, तद्यथा–“सुदरिसण १ सुप्पबुद्धं २, मणोरमं ३ सव्वभद्द ४ सुविसालं ५ । सोमणस ६ सोमाणस ७, पियंकरं ८ चेव नंदिकरं ९ ॥ १ ॥ विजयं १ वेजयन्तं २, जयन्त ३, मपराजितं च ४ सव्वट्ठं । एएसु चेव गया, कप्पाईया मुणेयव्वा ॥ २ ॥ ” इत्युक्ता द्विधा अपि वैमानिका देवाः । एवं सर्वे पञ्चेन्द्रियाणां भेदा ज्ञेयाः ॥ २४ ॥

अथाद्याद्वितीयगाथायां जीवा द्विधा उक्ताः सिद्धाः सांसारिकाश्च । तत्र सांसारिकाणां जीवानां गणनिकामात्रं विशेषो दर्शितः । अथ सिद्धस्वरूपं निरूपयति । अत्र सूत्रकृता व्यत्ययः प्रदर्शितः । तत्तु[२] सर्वसांसारिकव्यवहारातीतत्वात्पूर्वं तेषां सिद्धानां विशेषो

---

१ सुदर्शनं सुप्रबुद्धं मनोरमं सर्वभद्रं सुविशालं सुमनसं सौमनस्यं प्रियङ्करं चैव नन्दिकरम् ॥ १ ॥ विजयं च वैजयन्तं जयन्तमपराजितं च सर्वार्थम् । एतेषु चैव गताः कल्पातीताः ज्ञातव्याः ॥ २ ॥

२ संसारवासादेव मुक्तिरिति हेतुरपि प्रोक्त एव प्राक्–



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न दर्शितः अधुना तद्व्यनक्ति—

**सिद्धा पनरसभेया, तित्थअतित्था य सिद्धभेएणं । एए संखेवेणं, जीवविगप्पा समक्खाया ॥ २५ ॥**

व्याख्या—सिद्धा निष्ठितार्थाः क्षीणाशेषकर्माणः । ते पञ्चदशधा । सूत्रे तु तीर्थकरातीर्थकरभेदावुक्तौ । चकारादन्येऽपि त्रयोदश भेदा ग्राह्याः । सूत्रत्वात्करलोपे सिध्यति । तद्यथा–तीर्थकराः सन्तो ये सिद्धास्ते तीर्थकरसिद्धाः १ । अतीर्थकराः–सामान्यकेवलिनः सन्तो ये सिद्धास्तेऽतीर्थ (कर) सिद्धाः २। इति सामान्यं, अथो विशेषं व्यनक्ति–तीर्यते संसारोऽनेनेति तीर्थं यथावस्थितजीवाजीवादि-पदार्थप्ररूपकं परमगुरुप्रणीतं प्रवचनं, तच्च निराधारं न भवतीति स संघः प्रथमगणधरो वा वेदितव्यः, तस्मिन्नुत्पन्ने ये सिद्धास्ते तीर्थसिद्धाः ३ । तथा च स्वलिङ्गे रजोहरणादिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते स्वलिङ्गसिद्धाः ४। तथाऽन्यलिङ्गे परिव्राजकादि-सम्बन्धिनि वल्कलकषायादिरूपे द्रव्यलिङ्गे व्यवस्थिताः सन्तो ये सिद्धास्तेऽन्यलिङ्गसिद्धाः । यदाऽन्यलिङ्गिनां भावतः सम्यक्त्वादि प्रतिपन्नानां केवलमुत्पद्यते, तत्समयं च कालं कुर्वन्ति, तदैवान्यलिङ्गसिद्धत्वं द्रष्टव्यं, अन्यथा यदि दीर्घमायुष्कमात्मनः पश्यन्ति ज्ञानेन ततः साधुलिङ्गमेव प्रतिपद्यन्ते ५। तथा स्त्रिया लिङ्गं स्त्रीलिङ्गं स्त्रीत्वस्योपलक्षणमित्यर्थः। (तच्च)वेदः शरीरनिर्वृत्तिर्नेपथ्यं च। तत्रेहशरीर-निर्वृत्त्या प्रयोजनं न वेदनेपथ्याभ्यां, वेदे सतिसिद्ध्या(ध्य)भावात्, नेपथ्यस्य चाप्रमाणत्वात्। तस्मिन्स्त्रीलिङ्गे वर्तमानाःसन्तोयेसिद्धाः प्रत्येकबुद्धवर्जिताः केचित् स्त्रीलिङ्गसिद्धाः६ । तथा पुरुषलिङ्गेशरीरनिर्वृत्तिरूपे व्यवस्थिताः सन्तो ये सिद्धास्तेपुरुषलिङ्गसिद्धाः ७। तथा नपुंसकलिङ्गे वर्तमानाः सन्तो ये सिद्धास्ते नपुंसकलिङ्गसिद्धाः८। गृहस्थाः सन्तो ये सिद्धास्ते गृहिलिङ्गसिद्धाः९। तथा तीर्थस्याभावोऽ-तीर्थं, तीर्थस्याभावस्तुअनुत्पादेऽपान्तराले वा व्यवच्छेदे तस्मिन् समये सिद्धाः जातिस्मरणादिना निर्दग्धकर्माणोऽतीर्थसिद्धाः । तत्र-



For Private and Personal Use Only

तीर्थस्यानुत्पादे सिद्धा मरुदेवीप्रभृतयः, न हि मरुदेव्याः सिद्धिगमनकाले तीर्थमुत्पन्नमासीत् । तीर्थव्यवच्छेदश्च सुविधिप्रभृतीनां तीर्थकृतां सप्तस्वन्तरेषु । यदाह–"[1]जिणंतरे साहुवुच्छेओ"त्ति । तत्रापि ये जातिस्मरणादिना प्राप्तापवर्गमार्गाः केवलिनो भूत्वा सिध्यन्ति ते तीर्थव्यवच्छेदे सिद्धाः १० । प्रतीत्यैकं किञ्चिद् वृषभादिकं अनित्यतादिभावनाकारणं वस्तु बुद्धाः–बुद्धवन्तः परमार्थमिति प्रत्येकबुद्धाः (तथा) सन्तो ये सिद्धास्ते प्रत्येकबु(द्धसिद्धाः)द्धाः ११ । स्वयमात्मना बुद्धास्तत्त्वं ज्ञातवन्तःस्वयंबुद्धा तथा सन्तो ये सिद्धास्ते स्वयंबुद्धसिद्धाः १२ । स्वयंबुद्धप्रत्येकबुद्धानां च बोध्युपधिश्रुतलिङ्गकृतो विशेषः । तथाहि–स्वयंबुद्धानां बाह्यनिमित्तमन्तरेणैव बोधिः, प्रत्येकबुद्धानां तदपेक्षया । श्रूयते च–"[2]वसभे य इंदकेऊवलए अंबे य पुप्फिए बोही । करकंडुदुम्मुहस्सा नमिस्सगंधाररण्णे य ॥१॥" इति सूत्रे बाह्यवृषभादिप्रत्ययसापेक्षतया करकण्ड्वादीनां प्रत्येकबुद्धानां बोधिरिति । उपधिः स्वयंबुद्धानां पात्रादिर्द्वादशविधः । तद्यथा–"[3]पत्तं १ पत्ताबंधो ३, पायट्ठवणं ३ च पायकेसरिया ४ । पडलाइ ५ रयत्ताणं ६, गोच्छओ ७ पायनिज्जोगो ॥१॥ तिन्नेव य पच्छागा १०, रयहरणं चेव ११ होइ मुहपोत्ती १३ ।" प्रत्येकबुद्धानां तु जघन्येन रजोहरणमुखपोतिकारूपो द्विविध उपधिः । उत्कृष्टतस्तु पुनश्चोलपट्टकमात्रककल्पत्रिकवर्जो नवविध उपधिः । स्वयंबुद्धानां पूर्वाधीतं श्रुतं संभवति न वा, प्रत्येक बुद्धानां तु पुनस्तन्नियमाद्भवति जघन्येनैकादशाङ्गान्युत्कृष्टतोऽभिन्नदशपूर्वाणीति । लिङ्गप्रतिपत्तिस्तु स्वयंबुद्धानां यदि पूर्वाधीतश्रुतंनास्ति

---

१ जिनान्तरे साधुविच्छेदः । २ वृषभश्च इन्द्रकेतुर्वलयं आम्रश्च पुष्पिता । बोधिः करकण्डोर्दुर्मुखस्य, नमेर्गान्धारराज्ञश्च ॥ १ ॥

३ पात्रं पात्रबन्धः पात्रस्थापनं च पात्र प्रमार्जनिका । पटलानि रजस्त्राणं गोच्छकः पात्रनिर्योगः ॥ १ ॥ त्रय एव प्रच्छादका रजोहरणं चैव मुखवस्त्रिका भवति ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो नियमाद् गुरुसमीपे भवन्ति, गच्छे च विहरन्ति, अथ श्रुतं भवति ततो देवता लिङ्गं प्रयच्छति गुरु समीपे वा तत्प्रतिपद्यन्ते। यदि चैकाकिविहारेच्छावन्तस्तदैकाकिन एव विहरन्ति, अन्यथा गच्छ एवासते इति। प्रत्येकबुद्धानां पुनर्लिङ्गं देवतैव ददाति, लिङ्गवर्जिता वा भवन्ति १२। तथैकैकस्मिन् समये एकैका एव सन्तो ये सिद्धास्त एकसिद्धाः १३। एकसमये द्व्यादीनामष्टशतानांसेधनादनेकसिद्धाः। तत्रानेकसमयसिद्धानां प्ररूपणार्था गाथा–"बत्तीसा अडयाला, सट्ठी बावत्तरी य बोद्धव्वा। चुलसीई छन्नउई, दुरहियमट्ठुत्तरसयं च ॥ १ ॥" एतद्विवरणं–यदैकस्मिन्समये एकादिर्वा उत्कर्षेण द्वात्रिंशत्सिध्यन्ति तदा द्वितीयसमयेऽपि द्वात्रिंशत्, एवं नैरन्तर्येणाष्टौ समयान् यावद्द्वात्रिंशत्सिध्यन्ति, तत ऊर्ध्वमवश्यमेवान्तरं भवति। एवं यदा पुनस्त्रयस्त्रिंशत आरभ्याष्टचत्वारिंशदन्ता एकसमयेन सिध्यन्ति तदा निरन्तरं सप्त समयान् सिध्यन्ति, ततोऽवश्यमेवान्तरं भवति। एवंयदैकोनपञ्चाशतमादिं कृत्वा यावत् षष्टिः एकेन समयेन सिध्यन्ति तदा निरन्तरं षट् समयान् सिध्यन्ति, तदुपरि अन्तरं समयादि भवति, एवमन्यत्रापि योज्यं। यावदष्टशतमेकसमयेन सिध्यन्ति तदाऽवश्यमेव समयाद्यन्तरं भवति इति १४ ॥ तथा बुद्धा आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते बुद्धबोधितसिद्धाः १५॥ इत्युक्तास्तीर्थकरत्वादिभेदैः सिद्धानां पञ्चदशभेदाः ननु तीर्थकरसिद्धातीर्थकरसिद्धरूपभेदद्वयेऽवशेषाः सिद्धभेदाः सर्वेऽप्यन्तर्भवन्ति, तत्किमर्थं शेषभेदोपादानमुच्यते? सत्यं अन्तर्भवन्ति, परं न विवक्षितभेदद्वयोपादानमात्रात् शेष भेदपरिज्ञानं भवति विशेषपरिज्ञानार्थं चैष शास्त्रारम्भप्रयासोऽतः शेषभेदोपानामिति। इत्येते जीवविकल्पाः सांसारिका असांसारिका एकेन्द्रियादयो वा संक्षेपणेति–तेषां जीवानामसङ्ख्यातानन्तत्वान्नामजातिकथनद्वारेण समाख्याता–भणिता इति गाथार्थः ॥२५॥

अथैकेन्द्रियादिजीवानां शरीरायुःस्वकायस्थितिप्राणयोनि प्रमाणानि प्रकटयन्नाह



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**एएसिं जीवाणं, सरीरमाउं ठिई सकायम्मि । पाणा जोणिपमाणं, जेसिं जं अत्थि तं भणिमो ॥२६॥**

व्याख्या–एतेषां पूर्वव्यावर्णितस्वरूपाणामेकेन्द्रियादीनां जीवानां येषां यावत्प्रमाणं शरीरं । प्रमाणशब्दः सर्वत्राभिसम्बध्यते, ततो येषां यज्जघन्योत्कृष्टायुःप्रमाणं । तथा येषां यावती स्वकायस्थितिः, किमुच्यते ? यथैकेन्द्रियाः पृथ्व्यादयो मृत्वा पुनः पृथ्व्यादिषु कियत्कालमुत्पद्यन्ते सा स्वकायस्थितिः, तस्याः प्रमाणं । तथा प्राणाः–जीवधारणलक्षणा येषां जीवानां दशसु प्राणेषु ( मध्ये ) यावन्तः प्राणास्तत्प्रमाणं । तथा चतुरशीतिलक्षप्रमाणा योनयो येषु जीवेषु यावत्प्रमाणाः । अत्थीत्यत्र प्राकृतत्वादेकत्वद्वित्वबहुत्वे न कश्चिद्विशेषः, यद्वाऽस्तिशब्दोऽव्ययेषु सर्ववचनवाची वर्तते, अतोऽत्र न कश्चिद्दोषः । ततो यच्छब्देनापेक्षितमर्थं तच्छब्देनाह-"तं भणिमो" तद्भणाम इति गाथार्थः ॥ २६ ॥

पूर्वोक्तकथनद्वारेणैकेन्द्रियादीनां शरीरद्वारं व्याकुर्वन्नाह––

**अंगुलअसंखभागो, सरीरमेगिंदियाण सव्वेसिं । जोयणसहस्समहियं, नवरं पत्तेयरुक्खाणं ॥ २७ ॥**

व्याख्या–शीर्यत इति शरीरं । ततोऽङ्गुलासङ्ख्यभागं सर्वेषामप्येकेन्द्रिया ( णां ) दीनां शरीरप्रमाणं । नवरं विशेषश्चायं-प्रत्येकवनस्पतीनां योजनसहस्रमधिकं शरीरमिति । तथेह सूत्रे पृथ्व्यादीनां शरीरप्रमाणे सामान्यतयोक्तेऽपि विशेषो दर्श्यते । उक्तं च सङ्ग्रहिण्यां-"अंगुलअसंखभागो, सुहुमनिगोओ असंखगुण वाऊ । तो अगणि तओ आऊ, तत्तो सुहुमा भवे पुढवी ॥१॥ तो वाय-

---

१ अङ्गुलासंख्यभागः सूक्ष्मनिगोदोऽसंख्यगुणो वायुः । ततोऽग्निस्तत आपस्ततः सूक्ष्मा पृथ्वी । १ । ततो बादरवाय्वग्न्यप्पृथ्वीनिगोदा अनुक्रमशः । प्रत्येकवनस्पतिशरीरं अधिकं योजनसहस्रं तु ।२।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खाउगणी आऊ–पुढवीनिगोय अणुकमसो । पत्तेयवणसरीरं, अहियं जोयणसहस्सं तु ॥२॥'' द्विधा वनस्पतिः–प्रत्येकःसाधारणश्च । साधारणो निगोदोऽनन्तकायिक इत्येकार्थाः। तत्र प्रत्येको बादर एव, पृथिव्यप्तेजोवायुनिगोदास्तु सूक्ष्मा बादराश्च । तत्राद्यन्तयोर्निगोदपृथिव्योःसूक्ष्मविशेषणात्तदन्तर्वर्तिनां वाय्वग्निजलानामपि सूक्ष्माणां ग्रहणादयमर्थःसूक्ष्मनिगोदशरीरमङ्गुलस्यासङ्ख्यो भागोऽङ्गुलासङ्ख्यातभागमित्यर्थः १ । तदसङ्ख्यातगुणमेकंसूक्ष्मवायुकायशरीरं २। ततोऽसङ्ख्यातगुणमेकं सूक्ष्मतेजस्कायिकशरीरं ३। ततोऽसङ्ख्यातगुणमेकं सूक्ष्ममप्कायिकशरीरं ४। ततोऽप्यसङ्ख्यातगुणमेकं सूक्ष्मपृथ्वीकायिकशरीरं ५ । ततोऽप्यसङ्ख्यातगुणमेकं बादरवायुशरीरं ६ । ततोऽप्यसङ्ख्यातगुणमेकं बादराग्निशरीरं ७। ततोऽप्यसङ्ख्यातगुणमेकं बादराप्कायशरीरं ८। ततोऽप्यसङ्ख्यातगुणमेकं बादरपृथ्वीकायिकशरीरं ९। तस्मादसङ्ख्यातगुणमेकं बादरनिगोदशरीरं १० ।स्वस्थाने तु सर्वाण्यप्यङ्गुलासङ्ख्येयभागमात्राणीति । तथा च भगवत्यामेकोनविंशतितमे शतके तृतीयोद्देशके–''के[1] महालए णं भंते ! पुढविसरीरे पण्णत्ते ? गोयमा ! अणंताणं सुहुमवणस्सइकाइयाणं जावइया सरीरा से एगे सुहुमवाउसरीरे, असंखेज्जाणं सुहुमवाउकाइयाणं सरीरा से एगे सुहुमतेउसरीरे, असंखेज्जाणं सुहुमतेउकाइयाणं जावइया सरीरा से एगे पुढवीसरीरे, असंखिज्जाणं सुहुमपुढविकाइयाणं जावइया

---

१ कियन्महत् पृथ्वीशरीरं भदन्त ! प्रज्ञप्तम् ? गौतम ! अनन्तानां सूक्ष्मवनस्पतिकायिकानां यावच्छरीरं तावत् एकं सूक्ष्मवायुशरीरं, असंख्यानां सूक्ष्मवायुकायिकानां शरीराणि तावत् एकं सूक्ष्मतेजःशरीरं, असंख्येयानां सूक्ष्मतेजस्कायिकानां यावन्ति शरीराणि तावदेकं पृथ्वीशरीरं, असंख्येयानां सूक्ष्मपृथ्वीकायिकानां यावन्ति शरीराणि तावत् बादराप्छरीरं, असंख्येयानां बादराप्कायिकानां यावन्ति शरीराणि तावदेकं बादरपृथ्वीशरीरं, इयन्महत् गौतम ! पृथ्वीशरीरं प्रज्ञप्तम् ।



For Private and Personal Use Only

सरीरा से एगे बायरतेउसरीरे, असंखिज्जाणं बायरतेउकाइया जावइया सरीरा से एगे बायरआउसरीरे, असंखिज्जाणं बायरआउकाइयाणं जावइया सरीरा से एगे बायरपुढविसरीरे एवंमहालए णं गोयमा! पुढविसरीरे पण्णत्ते" । अत्र "अणंताणं सुहुमवणस्सइकाइयाणं जावइया सरीरा" इति यावद्ग्रहणादसङ्ख्यातानि ग्राह्याणि, अनन्तानामपि वनस्पतीनामेकाद्यसङ्ख्येयान्तशरीरत्वेनानन्तानां शरीराणामभावात् । सूक्ष्मवनस्पत्यवगाहनापेक्षया सूक्ष्मवाय्ववगाहनाया असङ्ख्यातगुणत्वेन चागमेऽभिधानात् । यदुक्तमन्यत्राप्यागमे–"गोयमा[1] ! सव्वत्थोवा सुहुमनिगोयस्स अपज्जत्तगस्स जहण्णिया ओगाहणा असंखिज्जगुणा जाव बायरपुढविअपज्जत्त जहण्णिया असंखिज्जगुणा पत्तेयसरीरबायरवणस्सइकाइयस्स बायरनिगोयस्स य एएसि णं अपज्जत्तगाणं जहण्णिया ओगाहणा दोण्ण वि तुल्लाऽसंखेज्जगुणा" इत्यादि । प्रत्येकवनस्पतीनां तु समुद्रादिगतपद्मनालादीनां शरीरं किञ्चिदधिकं योजनसहस्रं । ननु शरीरस्य मानमुत्सेधाङ्गुलेन समुद्रह्रदादीनां तु प्रमाणाङ्गुलेन, ततः समुद्रादीनां योजनसहस्रावगाहनात्तद्गतपद्मनालादीनामुत्सेधाङ्गुलापेक्षयाऽत्यन्तं दैर्ध्यं स्यादत आह विशेषणवत्यां–"जोयणसहस्समइ (हियं) वणस्सई देहमाणमुक्किट्ठं । तं च

१ गौतम ! सर्वस्तोका सूक्ष्मनिगोदस्य अपर्याप्तकस्य जघन्या अवगाहना असंख्येयगुणा यावत् बादरपृथ्व्यापर्याप्तानां जघन्या असंख्येयगुणा प्रत्येकशरीर बादरवनस्पतिकायिकस्य बादरनिगोदस्य च एतेषां अपर्याप्तानां जघन्या अवगाहना द्वयोरपि तुल्याऽसंख्येयगुणा ।

२ योजनसहस्रमधिकं वनस्पतेर्देहमानमुत्कृष्टम् । तच्च किल समुद्रगतजलरुहनालं भवति भूम्ना ॥ १ ॥ उत्सेधाङ्गुलेन तद्भवति प्रमाणाङ्गुलेन च समुद्रः । परस्परतो द्वे अपि कथमविरोधिनी भवतः ? ॥ २ ॥ पृथ्वीपरिणामानि तानि तु श्रीनिवासपद्मवत् । गोतीर्थेषु वनस्पतिपरिणामानि च भवेयुरपि ॥ ३ ॥ यत्रोत्सेधाङ्गुलतः सहस्रमवशेषेषु च जलेषु । वल्लीलतादयोऽपि च सहस्रमायामतो भवन्ति ॥ ४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गि (कि) ल समुद्दगयजलरुहनालं हवइ रत्ता (भूमा) ॥ १ ॥ उस्सेहंगुलओ तं, होइ पमाणंगुलेण य समुद्दो । अवरोप्परओ दुन्नि वि, कहमविरोहिणी हुज्जाहि ? ॥ ३ ॥ पुढवीपरिणामाइं, ताइं ( तु ) सिरिनिवासपउमं य । गोतित्थेसु वणस्सइपरिणामाइं ( च ) होज्जाहि ॥३॥ जत्थुस्सेहंगुलओ, सहस्समवसेसएसु य जलेसु । वल्लीलयाइओवि य, सहस्समायामओ हौंति ॥ ४ ॥" तथा सूक्ष्माणां पञ्चानामपि पृथ्व्यादीनामसङ्ख्यातान्यपि शरीराण्येकत्रीभूतानि, न चर्मचक्षुषां गोचराणि भवन्ति । तथा पुनर्बादराणां चतुर्णामपि पृथ्व्यादीनां शरीराण्यसङ्ख्यातानि पिण्डीभूतानि दृष्टिगोचरतां भवन्ति । यतः-अद्दामलयपमाणे, पुढविकायम्मि हुंति जे जीवा । ते जइ सरिसवमित्ता, जंबुद्दीवे न मायंति ॥ १ ॥" तथा-"एगम्मि उदगबिंदुम्मि जे जीवा जिणवरेहिं पण्णत्ता । ते पारेवयतुल्ला, जंबुद्दीवे न मायंति ॥२॥" यथा वनस्पतिकायस्य जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रमुत्कृष्टतस्तु योजनसहस्रमधिकमतः परं तत्पृथ्वीकायमिति गाथार्थः ॥ २७ ॥

अथ द्वीन्द्रियादीनां शरीरप्रमाणं यथाक्रमं व्याचिकीर्षुराह--

**बारस जोयण तिन्नेव गाउयाइं जोयणं च अणुकमसो । बेइंदिय तेइंदिय, चउरिंदिय देहमुच्चत्तं ॥२८॥**

व्याख्या-देहसहस्रशब्दौ पुंनपुंसकौ, अथ प्राकृते लिङ्गव्यत्ययमि(इ)ति प्रतीतमेव । तथा द्वादश योजनानि, त्रीणि गव्यूतानि,

---

१ आर्द्रामलकप्रमाणे पृथ्वीकाये भवन्ति ये जीवाः ते यदि सर्षपमात्राः ( स्युः ) जम्बूद्वीपे न मान्ति ॥ १ ॥ एकस्मिन्नुदकबिन्दौ ये जीवाः जिनवरैः प्रज्ञप्ताः । ते पारापतमात्रा जम्बूद्वीपे न मान्ति ॥ २ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योजनं च । अनुक्रमशोऽनुक्रमेण । समासाद्विभक्तिलोपे सूत्रत्वात्पुंस्त्वनिर्देशे योजनादिषु शब्देषु, द्वीन्द्रियाणां त्रीन्द्रियाणां चतुरिन्द्रियाणां, इहापि विभक्तिलोपो । देहं शरीरमुच्चत्वेन भगवता भणितं । तृतीयार्थे द्वितीया । तथा चोक्तं सङ्ग्रहिण्यां–"बारसे जोयण संखो, तिकोस गुम्मी य जोयणं भमरो" इतिवचनात् ॥ तत्र द्वीन्द्रियपदे द्वादश योजनानि शरीरावगाहना स्वयम्भूरमणादिशङ्खादिनामवसेया । एवं त्रीन्द्रियेष्वप्यवगाहना भावनीया । नवरं गव्यूतत्रयं शरीरावगाहना बहिर्द्वीपवर्तिकर्णश्रृगाल्यादीनामवगन्तव्या । एवं चतुरिन्द्रियेष्वपि । नवरं गव्यूतचतुष्टयं शरीरमानं बहिर्द्वीपवर्तिनां भ्रमरादीनामित्यनुयोगद्वारवृत्तावुक्तं । तथा पञ्चेन्द्रियाणां तिर्यङ्नराणां शरीरमानं पुरतो व्याकरिष्यतीति गाथार्थः ॥ २८ ॥

अथ पञ्चेन्द्रियेषु पूर्वं नारकाणां शरीरप्रमाणं बिभणिषुराह--

**धणुसयपंचपमाणा, नेरइया सत्तमाइ पुढवीए । तत्तो अद्धद्धूणा, नेया रयणप्पहा जाव ॥ २९ ॥**

व्याख्या–धनुःशतपञ्चप्रमाणशरीरा नारकाः तमस्तमःप्रभायां नरकपृथिव्यां ज्ञेयाः । ततो व्युत्क्रमेणार्धार्धोना देहप्रमाणा नारका रत्नप्रभां यावज्ज्ञेयाः । तद्यथा–तमस्तमःप्रभायां पञ्चधनुःशतानि देहप्रमाणं ७ । तमःप्रभायां सार्धे द्वे धनुःशते देहप्रमाणं ६ । धूमायां पञ्चविंशं शतं धनुषां देहप्रमाणं ५ । पङ्कायां द्वाषष्टिर्धनूंषि द्वौ हस्तौ देहप्रमाणं ४ । वालुकायामेकत्रिंशद्धनूंषि एको हस्तो शरीरप्रमाणं ३ । शर्करायां पञ्चदश धनूंषि द्वौ हस्तौ द्वादशाङ्गुलानि देहप्रमाणं २ । रत्नप्रभायां सप्त धनूंषि त्रयो हस्ताः षडङ्गुलानि देहप्रमाणं १ ।

१ द्वादशयोजनःशङ्खः त्रिक्रोशो गुल्मी च योजनं भ्रमरः



For Private and Personal Use Only

इह हि शरीरप्रमाणमुत्सेधाङ्गुलि(ल)निष्पन्नं, यच्च धनुःपञ्चतुर्हस्तप्रमाणं निष्पन्नं, तेषां नारकाणां शरीरप्रमाणं प्रतिपृथिवि विज्ञेयं। एतत्स्वाभाविकं शरीरप्रमाणं। उत्तरवैक्रियं तु स्वाभाविकशरीरप्रमाणात्सप्तस्वपि पृथिवीषु द्विगुणं ज्ञेयं। अथ जघन्यतस्तु सप्तस्वपि पृथिवीषु द्विविधोऽपि स्वाभाविक उत्तरवैक्रियश्च क्रमादङ्गुलस्याङ्ख्यातांशः सङ्ख्यातांशश्च, इयं द्विधाऽप्यवगाहना उत्पत्तिसमये नान्यदा। केचित्तु जघन्यमुत्तरवैक्रियमप्यङ्गुलासङ्ख्यातभागप्रमाणमाहुः। यदागमः "जहण्णं भवधारणिज्जा अंगुलस्स असंखे-ज्जइभागं, उत्तर वेउव्विया वि अंगुलस्स असंखेज्जइभागं" इति। इह ग्रन्थकृता जघन्याऽवगाहना नोक्ता तथापि प्रस्तावादुक्ता। तथा प्रतिप्रस्तटं जघन्यमध्यमोत्कृष्टदेहप्रमाणविशेषो ग्रन्थगौरवभयान्नोच्यते, तच्चान्यशास्त्रेभ्योऽवसेयमि(इ)ति गाथार्थः ॥२९॥

अथ प्रस्तावान्नारकाणां शरीरप्रमाणमुक्त्वा पञ्चानामपि गर्भजसंमूर्छिमपञ्चेन्द्रियतिरश्चां शरीरप्रमाणमाह –

**जोयणसहस्समाणा, मच्छा उरगा य गब्भया हुंति। धणुहपुहुत्तं पक्खी, भुयचारी गाउयपुहुत्तं ॥३०॥**

व्याख्या––योजनसहस्रप्रमाणशरीरा मत्स्या उरगाश्च गर्भजा भवन्ति। तत्र योजनसहस्रमानं स्वयम्भूरमणमत्स्यानामवसेयं। तथैव उरगाणां गर्भजानां बहिर्द्वीपवर्तिनामुत्कृष्टतो देहप्रमाणमवसेयमिति। मत्स्यशब्देन जलचरा ग्राह्याः। चकारात्संमूर्छिमा अपि मत्स्यास्तत्प्रमाणशरीरा भवन्ति। तथा पक्षिणो गर्भजा धनुःपृथक्त्वं। पृथक्त्वसंज्ञा पूर्वोक्तैवात्र ज्ञेया। प्राकृतत्वाद्वचनव्यत्ययः।

---

१ जघन्येन भवधारणीयमङ्गुलस्याङ्ख्येयभागः उत्तरवैक्रियमप्यसङ्गुलस्यासंख्येयभागः

२ मत्स्या द्विप्रकारा इति पञ्चानामिति



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

:तथा भुजचारिणो गृहगोधादयो गव्यूतपृथक्त्वशरीरप्रमाणेन भवन्तीति गाथाक्षरार्थः ॥ ३० ॥

इति गर्भजतिरश्चां चतुष्पदवर्जानां विशेष उक्तः अथान्येषां संमूर्छिमतिरश्चां संमूर्छिमचतुष्पदानां च देहमानविशेषं विवक्षुराह—

**खयरा धणुहपुहुत्तं, भुयगा उरगा य जोयणपुहुत्तं । गाउयपुहुत्तमित्ता, समुच्छिमा चउप्पया भणिया ॥३१॥**

व्याख्या—खचराः पक्षिणो गृध्रादयो धनुःपृथक्त्वं शरीरेण भवन्ति । उरगा भुजगाश्च संमूर्छिमा योजनपृथक्त्वं देहप्रमाणेन भवन्ति । संमूर्छिमचतुष्पदा अपि गव्यूतपृथक्त्वमात्रं । मात्राशब्दोऽत्र प्रमाणवाची । तत्प्रमाणशरीरा इत्यर्थः । क्वापि भुजपरिसर्पाणां धनुःपृथक्त्वमप्युक्तं । तथाहि—"मुच्छिमचउपयभुयगुरगा(ग)गाऊअधणुजोयणपुहुत्तमितिवचनात् । इति गाथाक्षरार्थः ॥३१॥

अथ गर्भजचतुष्पदानां देहप्रमाणविशेषं गाथापूर्वार्धेन व्याकुर्वन्नाह—

**छच्चेव गाउआइं, चउप्पया गब्भया मुणेयव्वा । कोसतिगुच्च मणुस्सा, उक्कोससरीरमाणेणं ॥ ३२ ॥**

व्याख्या—षड्गव्यूतानि गर्भजाश्चतुष्पदाः "मुणेयव्वेति" देहप्रमाणेन ज्ञातव्याः। तद्देहप्रमाणमुत्कर्षतो देवकुर्वादिगतगर्भजद्विरदानाश्रित्य निश्चेतव्यमिति । चकारोऽनुक्तसमुच्चयार्थः । एवेति निश्चयार्थः । इति तिरश्चामुत्कृष्टशरीरप्रमाणं व्याख्याय क्रमागतं मनुष्याणामुत्कृष्टदेहप्रमाणं गाथोत्तरार्धेनाह—क्रोशत्रिकोच्चा मनुष्याः समासाद्विभक्तिलोपे उत्कृष्टशरीरप्रमाणेनेति । एतत्प्रमाणं प्रथमे सुषमसुषमारके युग्मिनां नृणामवसेयमिति गाथाक्षरार्थः ॥ ३२ ॥

---

१ संमूर्छिमचतुष्पदभुजपरिसर्पोरःपरिसर्पाणां गव्यूतधनुर्योजनपृथक्त्वम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नारकतिर्यग्नराणां शरीरप्रमाणं सूत्रकृद्व्याख्याय देवानामुत्कृष्टं देहप्रमाणं पार्थक्येन व्याचिकीर्षुराह--

**ईसाणंतसुराणं, रयणीओ सत्त हुंति उच्चत्तं। दुग दुग दुग चउ गेवि-ज्जणुत्तरेक्किक्कपरिहाणी ॥ ३३ ॥**

व्याख्या--ईशानान्तम्-ईशानदेवलोकं यावत्सुराणां-देवानां सप्त रत्नयः-सप्त हस्ता उच्चत्वं शरीरस्य भवन्ति (ति)। अन्तमिति प्राकृतत्वाद्‌बिन्दुलोपो मात्राभङ्गभयात्। ईशानान्तग्रहणेनोपलक्षणाद्भवनपतिव्यन्तरज्योतिष्कसौधर्मेशाना ग्राह्याः। तदग्रतस्त्रिकयुगले एकैकहस्तहान्या शरीरप्रमाणं। एवमष्टौ देवलोकाः। किमुक्तं भवति? सनत्कुमारमाहेन्द्रयोः षड् हस्ताः,ब्रह्मलान्तकयोः पञ्च, शुक्रसहस्रारयोश्चत्वारो हस्ता देहमानं। तदग्रतो देवलोकचतुष्टये नवग्रैवेयकानुत्तरसुरेष्वेकहस्तहान्योत्कृष्टशरीरप्रमाणं भवति। कथं? तदुच्यते-आनतप्राणतारणाच्युतेषु त्रयो हस्ताः, नवग्रैवेयकेषु द्वौ हस्तौ, अनुत्तरेषु हस्तप्रमाणं शरीरमिति। तच्च शरीरप्रमाणं प्रमाणाङ्गुलेभ्योऽथवोत्सेधाङ्गुलेभ्यः केन मिनुयात्? तद्व्याचष्टे, तद्यथा-"सरीरमुस्सेहमंगुलेण तहा" इतिवचनाच्छरीरप्रमाणमुत्सेधाङ्गुलेन ग्राह्यं। उत्सेधाङ्गुलप्रमाणं त्विदं, यथा-"परमाणू तसरेणू, रहरेणू वालअग्ग लिक्खा य। जूआ जवो अट्ठगुणा, कमेण उस्सेहमंगुलयं ॥१॥" इति। स्पष्टैव। एतच्च शरीरप्रमाणं भवधारणीयं। उत्तरवैक्रियं तु लक्षयोजनप्रमाणं, यदुक्तं-"भवधारणिज्ज

---

१ शरीरोत्सेध उत्सेधाङ्गुलेन.

२ परमाणुस्त्रसरेणुः रथरेणुर्वालाग्रं लिक्षा च। यूका यवः अष्टगुणाः क्रमेण औत्सेधमङ्गुलकम्

३ भवधारणीया एषा उत्कृष्टा वैक्रियं (औत्तरं) योजनानि लक्षम। ग्रैवेयकानुत्तरेषु उत्तरवैक्रियाणि न सन्ति।



For Private and Personal Use Only

एसा, उक्कोस विउव्वि जोयणा लक्खं । गेविज्जणुत्तरेसु, उत्तरवेउव्विया णत्थि ॥ १ ॥" प्रकटार्थौ । तथा ग्रैवेयकेष्वनुत्तरेषूत्तरवैक्रियं नास्ति । तत्सत्यामपि शक्तौ प्रयोजनाभावे तदकरणादिति संटंकः, ( एतच्च ) ग्रन्थकृता नोक्तं तथापि प्रक्रमादुक्तमित्यर्थः ॥

एतावतैकेन्द्रियादीनां शरीरप्रमाणद्वारं व्याख्यातं, अथायुर्द्वारं विवरीषुराह--

**बावीसा पुढवीए, सत्त य आउस्स तिन्नि वाउस्स। वाससहस्सा दस तरुगणाण तेऊ तिरत्ताऊ ॥ ३४ ॥**

व्याख्या-आयाति भवाद्भवान्तरं सङ्क्रमतां जन्तूनां निश्चयेनोदयमित्यायुः। आयुपिना(चा)यं न्यायः, तस्यतद्भवेऽवे(व एव वे)दनात्। तथा तेजस्कायं विहाय चतुर्षु कायेषु उत्कृष्टायुःस्थित्या सह सहस्रशब्दोऽभिसम्बध्यते। बावीसेति स्त्रीत्वाच्च निर्देशः। तथाहि द्वाविंशतिर्वर्ष सहस्राः पृथ्वीकायिकानामुत्कृष्टायुःस्थितिः। एवमप्कायिकानां सप्त वर्षसहस्राः उत्कृष्टायुःस्थितिः। वायुकायिकानां त्रयो वर्षसहस्रा उत्कृष्टायुःस्थितिः। "तरुगणाणं ति" तरुग्रहणात्प्रत्येकवनस्पतिकायिकानां दश वर्षसहस्रा उत्कृष्टायुःस्थितिः। "तेऊ तिरत्ताउत्ति" विभक्तिव्यत्ययात् षष्ठयर्थे प्रथमा, ततस्तेजःकायिकानां त्रीण्यहोरात्राण्युत्कृष्टायुः स्थितिः। इत्युक्ता पञ्चानामपि स्थावराणामुत्कृष्टायुः स्थितिः। जघन्या तु सर्वेषामपि आन्तर्मौहूर्त्तिकी। जघन्योत्कृष्टान्तर्वर्तिनी स्थितिर्मध्यमा। जघन्यमध्यमस्थिती अनुक्ते अप्यवसेये। तथा यद्यपि सूत्रकारेण पृथ्वीकायभेदेषूत्कृष्टस्थितविशेषो विशेषेण नोक्तः, तथापि प्रपञ्च्यते, तथाहि-"सण्हा य १ सुद्ध २ वालुय ३, मणोसिला ४ सक्करा य ५ खरपुढवी ६। इग बार चउद सोलसट्ठार बावीस

१ श्लक्ष्णा शुद्धपृथ्वी च वालुका मनःशिला शर्करा च खरपृथ्वी । एकद्वादशचतुर्दशषोडशाष्टादशद्वाविंशतिसहस्रवर्षाणि ( यथाक्रमं पूर्वासां ) १ ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समसहस्सा ॥ १ ॥" श्लक्ष्णा-मरुस्थल्यादिगता पृथ्वी १, शुद्धा-कुमारमृत्तिका २, वालुकाः-सिकताः ३, मनःशिला-प्रसिद्धा ४, शर्करा-दृषत्कर्करिका ५, खरपृथ्वी-शिलापाषाणरूपा ६, आसां षण्णामपि क्रमादुत्कृष्टस्थितिरेको द्वादश चतुर्दश षोडशाष्टादश द्वाविंशतिः वर्षाः-समाः सहस्रास्तावन्मितवर्षसहस्रा इत्यर्थः ॥ ३४ ॥

इत्युदिता पृथ्व्यादीनामुत्कृष्टायुःस्थितिः, द्वीन्द्रियादीनामथोत्कृष्टायुःस्थितिं स्पष्टयन्नाह—

**वासाणि बारसाऊ, बेइंदियाणं तेइंदियाणं च । अउणापन्नदिणाणं, चउरिंदीणं तु छम्मासा ॥ ३५ ॥**

व्याख्या-आयुःशब्दः प्रत्येकमभिसम्बध्यते । वर्षाणि द्वादश द्वीन्द्रियाणामुत्कृष्टायुःस्थितिः । त्रीन्द्रियाणां त्वेकोनपञ्चाशद्दिनान्युत्कृष्टायुःस्थितिः । अत्र च्छन्दोभङ्गभयात् ह्स्वत्वस्य पृथगभिधानं । चः पृथगभिधाने । चतुरिन्द्रियाणां तु षण्मासा उत्कृष्टायुःस्थितिः। तुरेवार्थे । इति गाथाक्षरार्थः ॥ ३५ ॥

द्वीन्द्रियादीनामुत्कृष्टायुःस्थितिमभिधाय देवादीनां चतुर्णामपि पञ्चेन्द्रियाणामुत्कृष्टायुःस्थितिं विवृण्वन्नाह--

**सुरनेरइयाण ठिई, उक्कोसा सागराणि तित्तीसं । चउपयतिरियमणुस्सा, तिन्नि य पलिओवमा हुंति ॥३६॥**

व्याख्या-सुरनारकाणामुत्कृष्टायुःस्थितिस्त्रयस्त्रिंशत्सागरोपमाणि । उभयोस्तुल्यस्थितिकत्वादुत्कृष्टस्थितावित्येकत्राभिधानं । तथा (चतुष्पदतिर्यग्मनुष्याणां त्रीणि पल्योपमानि)यदुक्तं-"मणुआण सम गयाई, हयाई चउरंसऽजाइ अट्ठंसा । गोमहिसुट्टखराई, पणंससाणाइदसमंसा ॥१॥ इच्चाइ तिरिच्छाण वि, पायं सव्वारएसु सारिच्छं" इति।प्रायो बाहुल्येन सर्वारकेषु मनुजायुःसमायुषो गजसिंह-



For Private and Personal Use Only

सर्पादयः, मनुजायुश्चतुर्थांशायुषस्तुरगवेसरादयः । अष्टांशायुषोऽजोरणकादयः । पञ्चमांशायुषो गोमहिष्युष्ट्रखरादयः । दशमांशायुषश्च वृकचित्रकादयः । इत्यादि तिरश्चां सर्वारकेषु सादृश्यं दृश्यते । उत्कृष्टस्थितेरधो मध्यमजघन्यस्थिती अवसेये । अत्र षष्ठ्यर्थे प्रथमा । तथेह पल्योपमसागरोपमयोः स्वरूपं सूत्रेऽनुक्तमपि प्रदर्श्यते, तद्यथा–तत्र धान्यपल्यवत्पल्यस्तेनोपमा यस्य कालप्रमाणस्य तत्पल्योपमं । तत्त्रिधा–उद्धारपल्योपमं, अद्धापल्योपमं, क्षेत्रपल्योपमं च । तत्र वालग्राणां तत्खण्डानां वा प्रतिसमयमुद्धारस्तद्विषयं तत्प्रधानं वा पल्योपममुद्धारपल्योपमं १ । अद्धाः–कालः, स च कालं प्रस्तावाद्वालग्राणां तत्खण्डानां वा प्रत्येकं वर्षशतलक्ष(णः)णं तत्प्रधानमद्धापल्योपमं २ । क्षेत्रमाकाशप्रदेशरूपं तत्प्रधानं क्षेत्रपल्योपमं ३ । तत्पल्योपमं पुनरेकैकं द्विधा–बादरं सूक्ष्मं च । तत्रायामविस्ताराभ्यामवगाहेनोत्सेधाङ्गुलनिष्पन्नैकयोजनप्रमाणो वृत्तत्वाच्च परिधिना किञ्चिन्न्यूनषड्भागाधिकयोजनत्रयमानः पल्यो मुण्डिते शिरसि एकेनाह्ना द्वाभ्यामहोभ्यां यावदुत्कर्षतः सप्तभिरहोभिः प्ररूढानि यानि वालाग्राणि तानि प्रचयविशेषान्निविडतरमाकर्णं तथा भ्रियते यथा तानि वालाग्राणि वह्निर्न दहति वायुर्नापहरति जलं न कोथयति । यदुक्तम्–" तेणं वालग्गा नो अग्गी डहेज्जा नो वाऊ हरेज्जा नो सलिलं कुत्थिज्जा " इत्यादि । ततः किमित्याह–"तत्तो समए समए, इक्किक्के अवहियम्मि जो कालोत्ति" ततः समये समये एकैकवालाग्रापहारेण यावता कालेन स पल्यः सकलोऽपि सर्वात्मना निर्लेपो भवति, तावत्कालः सङ्ख्येयसमयमानो बादरमुद्धारपल्योपमो भवति । एतेषां च दश कोटीकोटयो बादरमुद्धारसागरोपमं, महत्त्वात्सागरेण समुद्रेणोपमा यस्येतिकृत्वा, बादरे च प्ररूपिते सूक्ष्मं सुखावसेयं स्यादिति बादरोद्धारपल्योपमसागरोपमयोः प्ररूपणं । न पुनरेतत्प्ररूपणेऽन्यद्विशिष्टं फलमस्तीति । एवं बादरेष्वद्धाक्षेत्रपल्योपमसागरोपमेष्वपि वक्तव्यं । एकैकं वालाग्रं असङ्ख्येयानि खण्डानि कृत्वा पूर्ववत्पल्यो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म्रियते । तानि खण्डानि द्रव्यतः प्रत्येकमत्यन्तशुद्धलोचनछद्मस्थो यदतीव सूक्ष्मपुद्गलद्रव्यं चक्षुषा पश्यति तदसङ्ख्येयभागमात्राणि, क्षेत्रतस्तु सूक्ष्मपनकशरीरं यावति क्षेत्रेऽवगाहते ततोऽसङ्ख्येयगुणानि, बादरपर्याप्तपृथ्वीकायिकशरीरतुल्यानीति वृद्धाः । ततः प्रतिसमयं एकैकखण्डापहारेण सर्वो निर्लेपनाकालः सङ्ख्येयवर्षकोटीप्रमाणः सूक्ष्ममुद्धारपल्योपमं तद्दश कोटीकोटयः सूक्ष्ममुद्धारसागरोपमं । आभ्यां च सूक्ष्मोद्धारपल्योपमसागरोपमाभ्यां द्वीपसमुद्राश्च मीयन्ते । तथा वर्षशते वर्षशतेऽतिक्रान्ते पूर्वोक्तपल्यादेकैकवालाग्रापहारेण सकलो निर्लेपनाकालः सङ्ख्येयवर्षमानो बादरमद्धापल्योपमं । तद्दश कोटीकोटयो बादरमद्धासागरोपमं । तथैव वर्षशते वर्षशते एकैकवालाग्रासङ्ख्येयतमखण्डापहारेण निर्लेपनाकालोऽसङ्ख्यातवर्षकोटीमानः सूक्ष्ममद्धापल्योपमं । तद्दश कोटीकोटयः सूक्ष्ममद्धासागरोपमं । तद्दश कोटीकोटयोऽवसर्पिणी । एतावत्प्रमाणैव चोत्सर्पिणी । उत्सर्पिण्योऽनन्ताः पुद्गलपरावर्तः । अनन्ताः पुद्गलपरावर्ता अतीताद्धा, तथैवानागताद्धा । अत्रातीताद्धातोऽनागताद्धाया अनन्तगुणत्वं समयावलिकादिभिरनवरतं क्षीयमाणाया अप्यनागताद्धाया अक्षयात्, एतच्च मतान्तरं । तथा च भगवतीविवरणे वृद्धगाथा—
"अहवा पडुच्च कालं, न सव्वभव्वाण होइ वुच्छित्ती । जं तीयाणागयाओ, अद्धाओ दोन्नि तुल्लाओ ॥ १ ॥" अयमभिप्रायः—यथाऽनागताद्धाया अन्तो नास्ति एवमतीताद्धाया आदिरिति व्यक्तं समत्वमिति । तथाऽऽभ्यां च सूक्ष्माद्धापल्योपमसागरोपमाभ्यां सुरनारकनरतिरश्चां कर्मस्थितिः कायस्थितिः भवस्थितिश्च मीयते । तथा प्राग्वत्पल्यो वालाग्रस्पृष्टनभःप्रदेशानां प्रतिसमयमेकैकापहारेण निर्लेपनाकालोऽसङ्ख्येयोत्सर्पिणीमानो बादरं क्षेत्रपल्योपमं । तद्दश कोटीकोटयो बादरं क्षेत्रसागरोपमं ।

१ अथवा प्रतीत्य कालं न सर्वभव्यानां भवति व्युच्छित्तिः । यदतीतानागते अद्धे द्वे अपि तुल्ये ॥ १ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथैवासङ्ख्यातखण्डीकृतवालाग्रैः स्पृष्टानामस्पृष्टानां च नभःप्रदेशानां प्रतिसमयमेकैकनभःप्रदेशानामपहारेण निर्लेपनाद्बादराद्-सङ्ख्येयगुणकालमानं सूक्ष्मं क्षेत्रपल्योपमं, प्राग्वत्सागरोपमं च। एताभ्यां सूक्ष्मक्षेत्रपल्योपमसागरोपमाभ्यां पृथिव्युदकाग्निवायुवनस्पतित्रसजीवानां प्रमाणं ज्ञातव्यं, एतच्च प्राचुर्येण, प्रायो दृष्टिवादे द्रव्यप्रमाणचिन्तायां प्रयोजनं सकृदेव, अन्यत्र चोद्धाराद्धाक्षेत्रपल्योपमानामप्येतान्येव प्रयोजनानि द्रष्टव्यानि, इह हि सूक्ष्माद्धापल्योपमेन प्रयोजनं ॥ ३६ ॥

ततः सुरनारकमनुष्यचतुष्पदतिरश्चामुत्कृष्टायुःस्थितिं ब्रुवन्नाह-

**जलयरउरभुयगाणं, परमाऊ होइ पुव्वकोडीओ। पक्खीणं पुण भणिओ, असंखभागो य पलियस्स ॥३७॥**

व्याख्या-जलचरग्रहणेन गर्भजसंमूर्छिमजलचरग्रहणमेकस्थितिकत्वात्। जलचरोरगभुजगानां परमायुः-उत्कृष्टायुःस्थितिः पूर्वकोटिः। मकारोऽलाक्षणिकः। इह हि पूर्वप्रमाणमेतत् "पुव्वस्स य परिमाणं, सयरिं खलु वासकोडिलक्खाओ। छप्पन्नं च सहस्सा, बोद्धव्वा वासकोडीणं ॥ १ ॥" इत्येकपूर्वप्रमाणं। एतादृक्पूर्वकोटीप्रमाणमुत्कृष्टायुरिति तात्पर्यं। तथा पक्षिणां पुनः पल्योपमस्यासङ्ख्यातभागमुत्कृष्टायुरिति। इत्युक्ता जलचरोरगभुजगानामुत्कृष्टायुःस्थितिः। इह हि सूत्रकृता संमूर्छिमपञ्चेन्द्रियाणां स्थलचराणामुत्कृष्टायुःस्थितिर्नोक्ता तथापि प्रक्रमादुच्यते--" संमुच्छिमपणिंदियथलखयरुरगभुयगजिट्ठठिइ कमसो। वाससहस्सा चुलसी, बिसत्तरि तिपण्ण बायाला ॥१॥" इति संमूर्छिमपञ्चेन्द्रिया ये स्थलचरा गवादयः १। खचराः पक्षिणो बककाकादयः २।

१ पूर्वस्य च प्रमाणं सप्ततिः खलु वर्षकोटीलक्षाः। षट्पञ्चाशच्च सहस्राणि बोद्धव्या वर्षकोटीनाम्। १ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उरगाः सर्पादयः ३ । भुजगा गृहगोधादयः ४ । क्रमाच्चेषां ज्येष्ठा स्थितिश्चतुरशीतिः १ द्वासप्ततिः २ त्रिपञ्चाशत् ३ द्विचत्वारिंशच्च४ वर्षसहस्रा इत्यर्थः ॥ ३७ ॥

इयता पञ्चानामपि संमूर्छिमपञ्चेन्द्रियतिरश्चामुत्कृष्टायुःस्थितिमुक्त्वा सामान्येन जघन्योत्कृष्टैकस्थितिकानां सूक्ष्मसाधारण- पञ्चेन्द्रियमनुष्याणां विशेषं प्रकटयन्नाह–

**सव्वे सुहुमा साहारणा य संमुच्छिमा मणुस्सा य। उक्कोसजहन्नेणं, अंतमुहुत्तं चिय जियंति ॥ ३८ ॥**

व्याख्या–सर्वे सूक्ष्माः पृथिव्यप्तेजोवायुवनस्पतिरूपाः, साधारणा अनन्तकायिकाः । चः समुच्चये । संमूर्छिमा मनुष्याः । चः पुनरर्थे । तत्र के ते संमूर्छिममनुष्याः ? एकोत्तरशतक्षेत्रसमुत्पन्नगर्भजमनुष्याणां वान्तादिषूत्पन्नाः, यदुक्तमागमे–"कहिणं भंते ! संमुच्छिमा मणुस्सा संमुच्छंति ? गोयमा ! अंतोमणुस्सखेत्ते पणयालीसाए जोयणसयसहस्सेसु गब्भवक्कंतियमणुस्साणं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा संघाणेसु वा वंतेसु वा पित्तेसु वा सुक्केसु वा सोणिएसु वा सुक्कपुग्गलपरिसाडेसु वा विगयजीवकडेवरेसु वा थीपुरिससंगमेसु वा नगरनिद्धमणेसु वा सव्वेसु चेव असुइट्ठाणेसु इत्थ णं संमुच्छिममणुस्सा संमुच्छंति अंगुलस्स असंखिज्जभाग-

१ क्व भदन्त ! संमूर्च्छिमा मनुष्याः संमूर्च्छन्ति ? गौतम ! अन्तर्मनुष्यक्षेत्रस्य पञ्चचत्वारिंशति योजनशतसहस्रेषु गर्भव्युत्क्रान्तिकमनुष्या- मेव उच्चारेषु वा प्रश्रवणेषु वा श्लेष्मसु वा सिङ्घाणकेषु वा वान्तेषु वा शुक्रेषु वा शोणितेषु वा शुक्रपुद्गलपरिशाटेषु वा विगतजीवकलेवरेषु वा स्त्रीपुरुषसंगमेषु वा नगरनिर्धमनेषु वा सर्वेष्वेवाशुचिस्थानेषु अत्र संमूर्च्छिममनुष्याः संमूर्च्छन्ति । अङ्गुलस्य असंख्यभागमात्रया अवगाहनया असंज्ञिमिथ्यादृष्टिः सर्वाभिः पर्याप्तिभिरपर्याप्तः अन्तर्मुहूर्तायुष एव कालं कुर्वन्ति ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मित्ताए ओगाहणाए असन्निमिच्छादिट्ठी सव्वाहिं पज्जत्तीहिं अपज्जत्ते अंतोमुहुत्तोउयं चेव कालं करेंति"। तथा बादरनिगोदविशेषं पुनरागमाद्दर्शयति, तथा चोक्तं-"[१]निगोयपज्जत्तए बायरनिगोयपज्जत्तए य पुच्छा? गोयमा! दोण्ह वि जहन्नेण वि उक्कोसेण वि अंतोमुहुत्ताउअमिति"।अथैते सर्वे पूर्वोक्ता उत्कृष्टतो जघन्यतोऽप्यन्तर्मुहूर्त्तायुषस्तत्किम्? उच्यते,मुहूर्त्तस्यासङ्ख्यातभेदत्वादितिगाथार्थः ३८

पूर्वोक्तद्वारद्वयं निगमयन्नाह—

ओगाहणाउमाणं एवं संखेवओ समक्खायं। जे पुण इत्थ विसेसा, विसेससुत्ताउ ते णेया ॥ ३९ ॥

व्याख्या—मानशब्द उभयत्र योज्यते। तत्रौगाहनेति-अवगाहन्तेऽवतिष्ठन्ते जीवा अस्यामित्योगाहनाऽवगाहना वा शरीरमानमायुर्मानं च पूर्वोक्तप्रकारेण। संक्षेपेणेति सर्वजीवाश्रयणात् सर्वेषामेकेन्द्रियादिपञ्चेन्द्रियपर्यन्तानां। समाख्यातमुत्कृष्टतया। तथौगाहना सर्वजघन्याऽङ्गुलासङ्ख्येयभागमात्रा। जघन्यमायुरन्तर्मुहूर्त्तमेव सामान्यतयोक्तं। ये पुनरोगाहनायुर्विशेषा उत्कृष्टमध्यमजघन्यप्रमाणरूपा जात्यादिविशेषाश्रयेण नोक्ताः ते विशेषसूत्रात् प्रज्ञापनोपाङ्गरूपादेरवसेया इति गाथार्थः॥ ३९ ॥

अथ स्वकायस्थितिद्वारं विवृणोति—

एगिंदिया य सव्वे असंखउस्सप्पिणी सकायम्मि। उववज्जंति चयंति य, अणंतकाया अणंताओ ॥४०॥

व्याख्या-एकेन्द्रियाः सर्वे पृथिव्यप्तेजोवायवोऽसङ्ख्येयोत्सर्पिण्यवसर्पिण्यः स्वकाये मृत्वा तत्रैवोत्पद्यन्ते विपद्यन्ते च एत-

१ निगोदपर्याप्ते बादरनिगोदपर्याप्ते च पृच्छा ? गौतम ! द्वयोरपि जघन्येनाप्युत्कर्षेणापि अन्तर्मुहूर्त्तायुरिति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्कायस्थितिमान। यदुक्तं प्रज्ञापनायां स्वकायस्थित्यष्टादशे पदे-"[1]पुढविकाइए णं पुढविकायत्ताए कालओ केवच्चिरं होइ पुच्छा ? गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं असंखिज्जाओ उस्सप्पिणिओसप्पिणीओ कालओ खेत्तओ असंखेज्जालोगा"।इदमुक्तं भवति-असङ्ख्येयेषु लोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारेण सर्वप्रदेशापहारे यावत्योऽसङ्ख्येयोत्सर्पिण्यवसर्पिण्यो भवन्ति, एवं आउतेउवाउकाइया वि। चतुर्णां कायानां पृथगभिधानं। तथाऽनन्तकायिकास्ता एवोत्सर्पिण्योऽनन्ताः। यदुक्तमन्यत्राप्यागमे-"[2]वणस्सइकाइयाणं पुच्छा ? गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अणंतं कालं अणंताओ उस्सप्पिणीओसप्पिणीओ कालओ खेत्तओ अणंता लोगा असंखेज्जा पोग्गलपरियट्टा आवलियाए असंखेज्जइभागे।" इयं स्थितिः सांव्यवहारिकानाश्रित्य द्रष्टव्या, असांव्यवहारिकजीवानां त्वनादिरवसेया, ततो न मरुदेव्यादिभिर्व्यभिचारः। तथा च क्षमाश्रमणः-"[3]तह काल(य)ट्ठिईकालादओ विसेसे पडुच्च किर जीवे। नाणाइवणस्सइणो, जे संववहारबाहिरिया ॥ १ ॥ इति गाथार्थः ॥ ४० ॥

---

१ पृथ्वीकायिकः पृथ्वीकायिकतया कालतः कियच्चिरं भवति पृच्छा ? गौतम ! जघन्येन अन्तर्मुहूर्तमुत्कर्षतः असंख्येया उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतः असंख्येया लोकाः।

२ वनस्पतिकायिकानां पृच्छा ? गौतम ! जघन्येनान्तर्मुहूर्त्तमुत्कर्षतोऽनन्तं कालं अनन्ता उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽनन्ता लोका असंख्येयाः पुद्गलपरावर्त्ता आवलिकाया असंख्येयतमभागः

३ तथा कायस्थितिकालादयोऽपि विशेषान्प्रतीत्य किल जीवान्। नानादिवनस्पतीन् ये संव्यवहारबाह्याः ॥ १ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्युक्तमेकेन्द्रियाणां स्वकायस्थितिद्वारं, अथ विकलादीनां स्वकायस्थितिद्वारं निरूपयन्नाह--

**संखिज्जसमा विगला, सत्तट्ठभवा पणिंदितिरिमणुआ। उववज्जंति सकाए, नारय देवा य णो चेव ॥४१॥**

व्याख्या-सङ्ख्यातसमाः सङ्ख्यातवर्षसहस्राः "विगलाइए वाससहस्ससंखेज्ज त्ति" पञ्चसङ्ग्रहवचनात् विकलाः स्वकाये उत्पद्यन्ते । तथा संज्ञिनः पर्याप्ताः पञ्चेन्द्रियतिर्यङ्मनुष्याः सप्ताष्टौ भवाः । तत्र सप्त भवाः सङ्ख्येयवर्षायुषोऽष्टमस्त्वसङ्ख्यातवर्षायुरेव । तथाहि-पर्याप्तसंज्ञिमनुष्याः पर्याप्तसंज्ञिपञ्चेन्द्रियतिर्यञ्चो वा निरन्तरं यथासङ्ख्यं सप्त नरभवांस्तिर्यग्भवांश्चानुभूय यद्यष्टमे भवे भूयस्तेष्वेवोत्पद्यन्ते, ततो नियमादसङ्ख्यातवर्षायुष्केष्वेवोत्पद्यन्ते, असङ्ख्यातायुष्कश्च मृत्वा सुरेष्वेवोत्पद्यते, ततो नवमोऽपि नरभवस्तिर्यग्भवो वा, परं निरन्तरं न लभ्यते । अष्टभवेषूत्कर्षतः कालमानं त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वाधिकानि, जघन्या तु सर्वत्रापि कायस्थितिरन्तर्मुहूर्त्तमिति । नारकदेवाश्च स्वकाय नोत्पद्यन्ते । इति गाथार्थः ॥ ४१ ॥

इत्युक्तं स्वकायस्थितिद्वारं, अथ प्रक्रमात्केषां कति प्राणास्तद्गाथाद्वयेन दर्शयन्नाह-

**दसहा जियाण पाणा, इंदिउसासाउजोगबलरूवा। एगिंदिएसु चउरो, विगलेसु छ सत्त अट्ठेव ॥ ४२ ॥**
**असन्निसन्निपंचिंदि-एसु नव दस कमेण बोद्धव्वा। तेहिं सह विप्पओगो, जीवाणं भण्णए मरणं ॥ ४३ ॥**

व्याख्या-दशधा दशप्रकारा जीवानां प्राणाः । ते के ? पूर्वं पञ्चेन्द्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्ररूपाणि । तथोच्छ्वासशब्देनाविनाभावित्वान्निःश्वासोऽपि गृह्यते । तत उच्छ्वासनिःश्वासरूप एकः प्राणः आयुश्च प्राग्व्यावर्णितस्वरूपं, तथा त्रयाणां मनोवाक्कायलक्षणानां योगानां बलरूपा इत्येते दश प्राणाः । अस्यां व्याख्यायामयं पाठो ग्राह्यः "इंदिउसासाउजोगबलरूवत्ति" ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथवा योगाः पूर्वोक्ता एव बलग्रहणेनायुर्बलं, शेषं तथैव। अथ केषां कति प्राणास्तदाह–एकेन्द्रियेषु पृथिव्यादिषु चत्वारः प्राणाः स्पर्शनेन्द्रियोच्छ्वासायुःकायबलरूपाः। द्वीन्द्रियेषु चत्वारस्त एव वाग्बलरसनेन्द्रिययुताः षट् प्राणा भवन्ति। तथा त्रीन्द्रियेषु षट् प्राणास्त एव घ्राणेन्द्रियान्विताः सप्त भवन्ति। तथा चतुरिन्द्रियेषु सप्तैव चक्षुरिन्द्रियसहिता अष्टौ प्राणा भवन्ति। तथाऽसंज्ञिपञ्चेन्द्रियेषु अष्टौ त एव श्रोत्रेन्द्रिययुता नव प्राणा भवन्ति। तथा संज्ञिपञ्चेन्द्रियेषु नव त एव मनोयुक्ता दश प्राणा भवन्ति। तैः सह विप्रयोगे जीवानां मरणं भण्यते। इति गाथाक्षरार्थः। तथाऽसंज्ञिसंज्ञिनोर्विशेषो निर्दिश्यते, तद्यथा–संज्ञाऽस्यास्तीति संज्ञी, न संज्ञी असंज्ञी, तत्रासंज्ञिनः पृथिव्यादयःसंमूर्च्छिमपञ्चेन्द्रियान्ताः इतरे संज्ञिनः पञ्चेन्द्रिया मनःपर्याप्त्या पर्याप्ताः। ननुप्रज्ञापनायामेकेन्द्रियादीनामपि आहार १ भय २ मैथुन ३ परिग्रह ४ क्रोध ५ मान ६ माया ७ लोभ ८ ओघ ९ शोक १० रूपा दश संज्ञा उक्ताः ततस्तेऽपि संज्ञिनः ? उच्यते–दशविधाऽपीयमोघसंज्ञारूपत्वात्स्तोका तथा मोहोदयजन्यत्वादशोभनाऽतो नानया संज्ञयाऽधिकारः, किंतु महत्या शोभनया च विशिष्टज्ञानावरणीयकर्मक्षयोपशमजन्यया मनोज्ञानसंज्ञया चेति। तथाऽमुमेवार्थं भगवान् क्षमाश्रमण आह–"जइ [1]सन्ना संबंधेण, सन्निणो तेण सन्निणो सव्वे। एगिंदियाइयाण वि, जं सन्ना दसविहा भणिया ॥ १ ॥ थोवा न सोहणाऽविय, जं सन्ना नाहिगार घिप्पइ य त्ति"। अथवा संज्ञा त्रिविधा दीर्घकालिक्युपदेशेन १ हेतुवादोपदेशेन २ दृष्टिवादोपदेशेन ३ च। तत्र यः सुदीर्घकालमतीतमर्थं स्मरति भविष्यच्च वस्तु चिन्तयति कथं नु कर्तव्यमिति त्रिकालविषया संज्ञा यस्य स

---

१ यदि संज्ञ संबन्धेन संज्ञिनस्तेन संज्ञिनः सर्वे। एकेन्द्रियादिकानामपि यत्संज्ञा दशविधा भणिता। १ ॥ स्तोका न शोभनाऽपि च या संज्ञा (तया) नाधिकारः गृह्यते च.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रथमसंज्ञी । यदुक्तं-"[1]इह दीहकालिगी कालिगि त्ति सन्ना जया सुदीहंपि । संभरइ भूयमेस्सं, चिंतेइ य कहं णु कायव्वं ? ॥१॥" इति । तथा यः संचिन्त्येष्टानिष्टेषु छायातपादिवस्तुषु स्वदेहपालनाहेतोः प्रवृत्तिनिवृत्ती विधत्ते सा द्वितीया संज्ञा, तद्वान् द्वितीयसंज्ञी । यदाह-" जे [2]पुग संचिंतेउं, इट्ठाणिट्ठेसु विसयवत्थूसुं । वट्टंति नियत्तंति य, सदेहपरिपालणाहेउं ॥ १ ॥ पाएण संपए च्चिय, कालम्मि नयाइ(वि)दीहकालन्ना(न्नू)। हेऊवएससन्नी, णिचिट्ठा हुंति हु अस्सण्णी ॥२॥"तृतीयस्तुसंज्ञीसम्यग्दृष्टिरेव,शेषास्त्वसंज्ञिनः हिताहितप्राप्तिपरिवर्जनसंज्ञिलक्षणसंज्ञिसाध्यप्रयोजनाकरणात् । उक्तंच-"[3]सम्मदिट्ठी सण्णी, संते णाणे खओवसमयम्मि । अस्सन्नी मिच्छत्ती, दिट्ठिवाओवएसेगं ॥१॥" अथैतासां मध्ये कस्य जन्तोः का संज्ञा भवतीति व्यक्ताभ्यां क्षमाश्रमणगाथाभ्यामेव प्रदर्शयति, तथाहि--"[4]पंचण्ह मू (मो)ह सन्ना, हेऊसन्ना बिइंदियाईणं । सुरनारयगब्भुब्भवजीवाणं कालिगीसन्ना ॥ १ ॥ सन्ना सम्मदिट्ठीण, होइ इह दिट्ठिवाउ सुयनाणं । मइवावाररविमुक्काण, सन्नाईवा(या)उ केवलिणो ॥२॥ " इत्यसंज्ञिसंज्ञिविशेषमभिधाय पुनः सूत्रोक्तमे-

---

१ इह दीर्घकालिकी कालिकीति संज्ञा यया सुदीर्घमपि । संस्मरति भूतमेष्यन्तं चिन्तयति च कथं नु कर्त्तव्यम् ॥ १ ॥

२ ये पुनः संचिन्त्येष्टानिष्टेषु विषयवस्तुषु । प्रवर्त्तन्ते च स्वदेहपरिपालनाहेतोः ॥ १ ॥ प्रायेण साम्प्रत एव काले न चापि दीर्घकालज्ञः । हेतुवादोपदेशसंज्ञिनः निश्चेष्टा भवन्ति असंज्ञिनः ॥ २ ॥

३ सम्यग्दृष्टयः संज्ञिनः सति ज्ञाने क्षायोपशमिके । असंज्ञिनः मिथ्यात्विनः दृष्टिवादोपदेशेन । १ ।

४ पञ्चानां ओघसंज्ञा हेतुसंज्ञा द्वीन्द्रियादीनाम् । सुरनारकगर्भोद्भवजीवानां कालिकीसंज्ञा ।१। संज्ञा सम्यग्दृष्टीनां भवतीह दृष्टिवादः श्रुतज्ञानम् । मतिव्यापारविमुक्ताः संज्ञातीताः केवलिनः ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वान्यक्रमेण प्राणस्वरूपं व्यनक्ति, यत उक्तं-"पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिःश्वासमथान्यदायुः प्राणा दशैते भगवद्भिरुक्ता एषां वियोगीकरणं तु हिंसा ॥ १ ॥" इति गाथाद्वयार्थः ॥ ४२-४३ ॥

सर्वजीवप्राणद्वारमभिधाय क्रमप्राप्तमपि योनिद्वारमुपरिष्टाद्वक्ष्यति, ततोऽत्र संसारे स्वरूपग्राहकजीवस्वभावं व्याकुर्वन्नाह-

**एवं अणोरपारे, संसारे सायरम्मि भीमम्मि । पत्तो अणंतखुत्तो, जीवेहिं अपत्तधम्मेहिं ॥ ४४ ॥**

व्याख्या-एवमिति प्राणवियोगलक्षणेन अणोरपारेऽप्राप्तपर्यन्ते दुस्तरत्वात्संसारे सागरे इवशब्दलोपात्समुद्रोपमेयत्वेनभीमे-रौद्रे जन्मजरामरणरोगशोकादिभिः कारणभूतैः प्राप्तमुपलक्षणान्मरणं । "अणंतखुत्तो त्ति" अनन्तशोऽनन्तवारान् । कैः ? -जीवैः । कीदृशैः ?-अप्राप्तजिनधर्मैरिति ॥ उक्तं च-"कोटिशो विषयाः प्राप्ताः, संपदश्च सहस्रशः । राज्यं तु शतशः प्राप्तं, न तु धर्मः कदाचन ॥ १ ॥ इति गाथार्थः ॥ ४४ ॥

क्रमप्राप्तं योनिद्वारमभिधित्सुराह--

**तह चउरासी लक्खा संखा जोणीण होइ जीवाणं । पुढवाईण चउण्हं, पत्तेयं सत्त सत्तेव ॥ ४५ ॥**

व्याख्या-इह योनिरिति कः शब्दार्थः ? पूर्वं तदुच्यते-यु मिश्रणे,युवन्ति तैजसकार्मणशरीरवन्तः सन्तः औदारिकादिशरीरप्रायोग्यपुद्गलस्कन्धसमुदायेन मिश्रीभवन्त्यस्यामिति योनिरुत्पत्तिस्थानं, औणादिको निः प्रत्ययः । तथेति गणनाद्वारप्रकारेण चतुरशीतिर्लक्षा योनीनां । विभक्तिव्यत्ययात्तृतीयार्थे प्रथमा । सङ्ख्यया । केषां ? जीवानां । द्वितीयार्थे सप्तम्यर्थे वा षष्ठी । इति सामा-



For Private and Personal Use Only

न्यतयाऽभिधाय विशेषं दर्शयति–पृथिव्यप्तेजोवायुषु चतुर्षु प्रत्येकं सप्त सप्त लक्षा इति गाथाक्षरार्थः ॥ ४५ ॥

इत्येतावताऽष्टाविंशतिर्लक्षा योनीनामुक्ताः अन्यासां योनीनां स्थानविशेषं गाथाद्वयेन दर्शयन्नाह—

दस पत्तेयतरूणं, चउदस लक्खा हवंति इयरेसु । विगलिंदियाण दो दो, चउरो पंचिंदितिरियाणं ॥ ४६ ॥
चउरो चउरो नारय–सुरेसु मणुआण चउदस हवंति । संपिंडिया उ सव्वे, चुलसी लक्खा उ जोणीणं ॥ ४७ ॥

व्याख्या—सप्तम्यर्थे षष्ठी । प्रत्येकतरुषु दश योनिलक्षाः । इतरेषु सूत्रत्वात्कायग्रहणेन वा पुंस्त्वं । साधारणवनस्पतिषु चतुर्दश लक्षा योनयो भवेयुः । तथा विकलेन्द्रियेषु द्वित्रिचतुरिन्द्रियेषु द्वे द्वे लक्षे भवेतां । तथा पञ्चेन्द्रियतिर्यक्षु चतुर्लक्षा योनीनां भवेयुः ॥ ४६ ॥ तथा चतस्रश्चतस्रो लक्षा योनयो नारकेषु सुरेषु । समासेन विभक्तिलोपः । तथा मनुष्येषु चतुर्दश लक्षा योनयः । तुः पूरणार्थे । चः समुच्चये । एवं संपिण्डिता एकराशीकृताः । "सव्वे त्ति" प्राकृतत्वाल्लिङ्गव्यत्यये सर्वाश्चतुरशीतिर्लक्षा योनीनां भवन्ति । इति निर्दिष्टं योनिद्वारमिति गाथार्थः ॥ ४७ ॥

तथेह ग्रन्थे पूर्वं ग्रन्थकारेणादौ द्वितीयगाथायाः पूर्वार्द्धे जीवानां भेदकथने प्राक् सिद्धस्वरूपं दर्शितं, तच्चेषामव्ययत्वान्निष्ठितार्थत्वात्सांसारिककृत्यानुपयोगित्वात्प्राक् सिद्धानां पञ्चदशभेदव्यावर्णनप्रस्तावेऽपि शरीरादिविशेषो न दर्शितः, तद्विचित्रगतिकत्वात्सूत्रस्येति, इह तं व्यावर्णयन्नाह—

सिद्धाण नत्थि देहो, न आउकम्मं न पाणजोणीओ । साइअणंता तेसिं, ठिई जिणंदागमे भणिया ॥४८॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—सिद्धानां नास्ति देहः । यत उक्तं श्रीआचाराङ्गे–"*सिद्धाणं इगतीसगुणा पण्णत्ता, तंजहा–गोयमा ! से न दीहे १ न हस्से २ न वट्टे ३ न तंसे ४ न चउरंसे ५ न परिमंडले ६ न लोहिए ७ न हालिद्दे ८ न सुक्किल्ले ९ किण्हे १० न नीले ११ न दुरभिगंधे १२ न सुरभिगंधे १३ न तित्ते १४ न कडुए १५ न कसाइले १६ न अंबिले १७ न महुरे १८ न कक्खडे १९ न मउए २० न गुरुए २१ न लहुए २२ न सीए २३ न उण्हे २४ न निद्धे २५ न लुक्खे २६ न कायसंगे २७ न रुहे २८ न इत्थी २९ न पुरिसे ३० न नपुंसए ३१ इत्येकत्रिंशत्सिद्धगुणाः । अथ सूत्रव्याख्या–आश्रयाश्रयिणोरभेदाद्यस्माद्देहो न, अत एवायुरपि न, यस्मादायुर्न अत एव मरणमपि न । ततो निमित्तनिमित्तवतोरभेदात्सप्तापि कर्माणि न, बन्धोदयोदीरणासत्तानामभावात् । यतः कर्माणि न अत एव प्राणा योनयोऽपि न, पुनः संसारेऽनुत्पादात् । अथ तेषां स्थितिं व्याचष्टे । ततस्तेषां सिद्धानां स्थितिः कीदृशी ? सादिरनन्ता, यतस्तत्रोत्पत्तिकालात्सादिस्ततश्च्यवनाभावादनन्तैव । यदुक्तं शक्रस्तवे–" [1]सिवमयलमरुअमणंतमक्खयमव्वाबाहमपुणरावित्ति सिद्धिगइनामधेयं ठाणं संपत्ताणं" इति वचनात् जिनेन्द्रागमे स्थितिर्भणिता–प्रोक्ता । यथा संसारिणां जीवानां प्राणयोन्यायुःकर्मस्थित्यादयस्तथा सिद्धानां न भवन्तीति गाथार्थः ॥ ४८ ॥

इत्येतावता सिद्धानां स्वरूपमभिधाय पुनः संसारिणां जीवानां स्वभावं व्याकुर्वन्नाह—

---

* सिद्धानामेकत्रिंशद्गुणाः प्रज्ञप्ताः तद्यथा–गौतम ! स न दीर्घः न ह्रस्वः न वृत्तः न त्र्यस्रः न चतुरस्रः न परिमण्डलः न लोहितः न हारिद्रः न शुक्लः न कृष्णः न नीलः न दुर्गन्धः न सुरभिगन्धः न तिक्तः न कटुकः न कषायः नाम्लः न मधुरः न कर्कशः न मृदुः न गुरुः न लघुः न शीतः नोष्णः न स्निग्धः न रुक्षः न कायसङ्गः न रोहकः न स्त्रीः न पुरुषः न नपुंसकः

१ शिवमचलमरुजमनन्तमव्याबाधमपुनरावृत्ति सिद्धिगतिनामधेयं स्थानं संप्राप्तेभ्यः



For Private and Personal Use Only

काले अणाइनिहणे, जोणीगहणम्मि भीसणे इत्थ। भमिया भमिहिंति चिरं, जीवा जिणवयणमलहंता ॥४९॥

व्याख्या–कालेऽतीतानागतलक्षणे वर्तमानस्यैकसामयिकत्वात्स्वल्पत्वान्नात्र विवक्षितं(सत्त्वं)कथंभूते काले ?–अनादिनिधनेऽनाद्यपर्यवसिते । तथा पुनः कथंभूते ? "जोणीगहणम्मि भीसणे त्ति" चतुरशीतिलक्षयोनिग्रहणेतत्तदाश्रयणेनानवस्थानात् । अथवाकीदृशे संसारे ? योनिगहने-उपलक्षणादुत्पत्तिविपत्तिरोगशोकादिभिर्गहने विचित्रकर्मगत्याऽतिगुपिले जीवानां कर्मविपाककारणभूतत्वाद्भीषणे –भयकारिणि तस्मिन्नधिकरणभूते जीवा भ्रान्ता भ्रमिष्यन्ति चिरं–प्रभूतं कालं । कीदृशाः सन्तः ?–जिनवचनं–भगवद्वचनं हितोपदेशमलभमानाः–अप्राप्नुवन्तः । तथा क्वचिदित्यपि पाठः–"भमिया भमंति भमिहिंति त्ति" तत्र त्रिकालाश्रयणेन धातोरर्थविशेषो ज्ञेय इति गाथाक्षरार्थः ॥ ४९ ॥

अथ ग्रन्थकारः सम्यग्ज्ञानाद्धर्मफलं विधेयं चाविष्कुर्वन्ग्रन्थमुपसंहर्तुं शिक्षारूपं स्वनामगर्भितं च सूत्रं व्याख्यानयन्नाह—

ता संपइ संपत्ते, मणुअत्ते दुलहे य सम्मत्ते। सिरिसंतिसूरिसिट्ठे, करेह भो उज्जमं धम्मे ॥ ५० ॥

व्याख्या—तावद्भो भव्याः ! साम्प्रतं मनुजत्वे दशभिर्दृष्टान्तैर्दुर्लभे संप्राप्ते तत्रापि सम्यक्त्वेऽचिन्तितफलप्रदे चिन्तारत्नप्राये । चकारात्सम्यग्ज्ञानचारित्रे। संप्राप्तशब्दो मनुजत्वसम्यक्त्वयोरुभयत्र संबध्यते। ततश्चिन्तारत्नमिव प्राप्ते सम्यक्त्वे। यत्करणीयं तदाह-धर्मे उद्यमं कुरुत । किंविशिष्टे ? "सिरिसंतिसूरिसिट्ठेत्ति" सिरि त्ति श्रीः उपलक्षणात् ज्ञानश्रीः, तथा शमनं शान्तिः रागादीनामुपशमः, ताभ्यां सूरयः पूज्याः, गुणगुणिनोरभेदात्तीर्थकरा गणधरा वा, तैः शिष्टेऽर्थादुपदिष्टे। इयता ग्रन्थकृता स्वनामाप्याविष्कृतं।

तत्र कर्तृपदं शान्तिसूरिः उपदिशति-शिष्टे प्रशस्तेऽनुपमे जिनधर्मे । क्रियासंबन्धस्तथैव योज्य इत्यक्षरार्थः ॥ ५० ॥

अथ सूत्रं निगमयन्नाह—

**एसो जीववियारो, संखेवरुईण जागणाहेऊ। संखित्तो उद्धरिओ, रुंदाओ सुयसमुद्दाओ ॥ ५१ ॥**

व्याख्या—जीवानां विचारो जीवविचारः त्रसस्थावरैकेन्द्रियादिविचारवान् । रूपरूपिणोरभेदाद् ग्रन्थनामापि जीवविचार इति समर्थितं । एष आत्मनाऽविनाभावेनेति । ततः श्रीशान्तिसूरिणाऽयं संक्षेपरुचीनामर्थात्स्वल्पमतीनां प्राणिविशेषजिज्ञासायै संक्षिप्यानुग्रहबुद्धया रुद्राद्-अनवगाहविस्तारात् श्रुतसमुद्रादुद्धृतः । इयता न स्वमनीषिकया, किंतु परम्परया जिनैरुपदिष्टं श्रुतं महार्थं तस्मादित्यक्षरार्थः ॥ ५१ ॥

अत्र अद्यावधि मुद्रितेषु पुस्तकादिषु 'रुद्दाओ' इति पाठो दृश्यते, परं प्राचीनादर्शेषु 'रुंदाओ' इति पाठो लभ्यते स एव पाठः अर्थदृष्ट्या समीचीनः प्रतिभाति इति ध्येयम् ।

## ॥ अथ प्रशस्तिः ॥

बुद्धेर्मन्दतयाऽथ बालिशतया वाचालताया वशा-दालस्यादनुपासनान्निजगुरोस्तत्त्वानभिज्ञेन ह (हा) ।
उत्सूत्रं यदवाचि किञ्चिदधिकं श्रीभागवत्या गिर-स्तत्तत्त्वार्थविशारदैः करुणया ग्रन्थेऽत्र शोध्यं बुधैः ॥ १ ॥
यावन्मेरुमहीधरः क्षितितले तस्मिम् वनं नन्दनं, यावच्छेषफणी दधाति धरणीं सप्ताष्त्र(सप्तर्ष)यो यावता ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यावच्चन्द्रदिवाकरौ सुरसरित् खे तारका यावता, तावन्नदतु पठ्यमानमिमकं शास्त्रं हि विद्वज्जनैः ॥ २ ॥

स्वस्तिश्रीर्जयताद्वीरो नाम्ना तपसां श्रिया । वर्धमानतया ख्यातो, वर्धमानो दिने दिने ॥ ३ ॥

तच्छिष्या एकादश, गौतममुख्या गणाधिपा आसन् । आद्यो गुणिषु गणे यो, पञ्चम(०णे च पञ्चमक) स्तेषु च सुधर्मा ॥४॥

तत्पट्टानुक्रमतो रत्नत्रयधारिणोऽम्बुधीयन्ते । भूरिगुणाः सूरिगणास्तावद्यावच्च चन्द्रकुलम् ॥ ५ ॥

जिनशासनसुरशिखरिणि, चन्द्रकुलं नन्दनायते तत्र । खरतरगणेन सुगणेन, कल्पतरूयितमभिमतार्थे ॥ ६ ॥

तस्मिन् प्रद्योतन इव, सूरिरु (श्रो) द्योतनो गुणनिधानम् । पट्टक्रमेण जिनभद्रसूरिराष्टदशोऽथासीत् ॥ ७ ॥

तच्छिष्योऽजनि वाचकेषु विदुरो भानुप्रभः सुप्रभः, चत्वारोऽन्तिपदो बभूवुरमलप्रज्ञाश्रयं तस्य तु ।

आद्यो वाचकसेनधीनपटुधीर्यो मन्त्रविद्याग्रणी-रन्योऽभून्महिमाग्रलाभसहितः पुण्यश्रिया संहितः ॥ ८ ॥

सुगुणगणिस्तृतीयः सरलमतिः कुशलसिंहनामान्यः । विख्यातचन्द्रवर्धनगणिरप्यासीत्क्रमेण ततः ॥ ९ ॥

तेषां शिष्यत्रितयं समजनि जगतीतले विदितविद्यम् । श्रीमेघनन्दनदयानन्दनजयविजयनामानः ॥ १० ॥

श्रेष्ठश्रेष्ठिकुलोत्तंसा, वाचका मेघनन्दनाः । वृत्तिं जीवविचारस्याकार्षीद्रत्नस्तदन्तिषत् ॥ ११ ॥

वृत्तिं जीवविचारस्य, कुर्वता यन्मयाऽर्जितम् । पुण्यं तेनैष भव्यौघः, शिवसौख्यमथाश्नुताम् ॥ १२ ॥

नृपविक्रमवत्सरतः, प्राणकायेन्दु (१६१०) शरदि नभसि सोमे । कृष्णाष्टम्यश्विन्यां, वृत्तिर्घल्लूस्थितेन कृता ॥ १३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्ये सलेमसाहेः, सूरान्वयकमलबोधनखरांशोः गणनायके विजयवति, श्रीजिनमाणिक्यसूरिवरे ॥ १४ ॥
प्राकृतवृत्तेः संस्कृतवृत्तिमकार्षं यथागमं शिष्यैः । अभ्यर्थितोऽलमहमिति, पाठकरत्नाकरः सुगमम् ॥ १५ ॥

॥ इति जीवविचारप्रकरणस्य वृत्तिः ॥

## संसारी जीवोना ५६३ भेद

(१) **नारकीना**........रत्नप्रभादि–७ तेना ७ पर्याप्ता अने ७ अपर्याप्ता........१४

(२) **तिर्यंचगतिना** .... .... .... .... .... ....४८

पृथ्वी–अप्–तेउ–वायु–साधा० वनस्पति ए ५ सूक्ष्म अने
५ बादर=१०, प्रत्येक वन० बादर–१. एटले एकेन्द्रियना
११ पर्याप्ता अने ११ अपर्याप्ता=२२

**विकलेन्द्रियना**–बेइंद्रिय–तेइन्द्रिय–चउरिंद्रिय–३, तेना
पर्याप्ता–३ अने अपर्याप्ता–३=६

(एकेन्द्रिय अने विकलेन्द्रिय संमूर्च्छिम ज छे.)

**तिर्यंच पञ्चेन्द्रिय**–जलचर–स्थलचर–खेचर–उरःपरिसर्प–भुजपरिसर्प ए ५ गर्भज



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अने ५ संमूर्च्छिम कुल=१० तेना पर्याप्ता-१० अने अपर्याप्ता-१०=२०
(एकेन्द्रियना-२२, विकलेन्द्रियना-६, तिर्यञ्च पञ्चे०-२०=४८)

(३) **मनुष्यगतिना** .... ... ... ... .... ....३०३

**कर्मभूमि-५-भरत, ५-ऐरवत, ५-महाविदेह=१५**
**अकर्मभूमि-५-हैमवत, ५ ऐरण्यवत, ५-हरिवर्ष**
**५-रम्यक्, ५-देवकुरु, ५-उत्तरकुरु=३०**
**अन्तर्द्वीप-८ दाढा उपर ७ अन्तर्द्वीप................५६**

**१०१**

(गर्भज पर्याप्ता-१०१, गर्भज अपर्याप्ता-१०१, संमूर्च्छिम अपर्याप्ता-१०१=३०३)
ता. क. संमू० मनुष्य अपर्याप्ता ज छे, ते गर्भज मनुष्यना मल-मूत्रादि
अशुचि पदार्थोमां ज उत्पन्न थाय छे.

(४) **देवगतिना** ... .... .... .... .... ....१९८

१. भवनपति १० तेना १० भेद }
परमाधामी १५ तेना १५ भेद } २५

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२. व्यंतर-८, वाणव्यंतर-८=१६ भेद } २६
तिर्यग्जृम्भक-१० तेना १० भेद }
३. ज्योतिषी-१० (चर-५, स्थिर-५) तेना १० भेद
४. वैमानिक-३८ (कल्पोपपन्न-२४ जेमां सौधर्मादि १२ देवलोक, सारस्वतादि ९ लोकान्तिक देवलोक, किल्बिषि-३ नो समावेश थाय छे तथा कल्पातीत-१४ जेमां सुदर्शनादि ९ ग्रैवेयक अने विजयादि ५ अनुत्तरनो समावेश थाय छे) २५+२६+१०+३८=९९.
९९ पर्याप्ता अने ९९ अपर्याप्ता=१९८
(नरकगतिना-१४, तिर्यञ्च गतिना-४८, मनुष्य गतिना-३०३, देवगतिना-१९८=५६३)

## इति श्रीजीवविचारप्रकरणं सटीकं समाप्तम्.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ॐ ह्रीँ अर्हं नमः ॥

॥ राजनगर मंडन श्रीमूलेवा पार्श्वनाथाय नमः ॥

॥ शासनरत्न श्री वृद्धि-नेमि-उदय-मेरुप्रभसूरीश्वरेभ्यो नमः ॥

सावचूरीकम्

# श्री नवतत्त्व प्रकरणम्

-: सं...पा...द...क :-

प्रशान्तमूर्ति पू० आ० भ० श्री विजय उदयसूरीश्वरजी म० सा०

पट्टालंकार निडरवक्ता पू० आ० भ० श्री विजयमेरुप्रभ-

सूरीश्वरजी म० सा० आजीवन अन्तेवासी पू० पं० श्री इन्द्रसेनविजयजीगणि०

संकलन-पू० गणि० श्री सिंहसेन विजयजी म०

प्रकाशक-श्री जैन ग्रन्थ प्रकाशक सभा-अहमदाबाद

वि० सं० २०४२ 卐 वीर सं० २५१२ 卐 नेमि सं० ३७.

१

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवाऽजीवा पुण्णं पावासवसंवरो अ निज्जरणा । बंधो मुक्खो अ तहा, नवतत्ता हुंति नायव्वा ॥१॥

(अव०) जयति श्रीमहावीरः श्रेयः श्रीश्रेणिसंश्रयः । सम्यग् जीवादितत्त्वानामवबोधनिबंधनम् ॥१॥

नवतत्त्वस्य परिमितपरिमाणस्य प्रभूततरार्थस्य अतीवगंभीरार्थस्य मुग्धजनाववोधाय विचारः किंचिदुच्यते । तथाहि जीवेति-एतानि नवानां तत्त्वानां नामान्युक्तानि । तथाहि-जीवतत्त्वं १ अजीवतत्त्वं २ पुण्यतत्त्वं ३ पापतत्त्वं ४ आश्रवतत्त्वं ५ संवरतत्त्वं ६ निर्जरातत्त्वं ७ बंधतत्त्वं ८ मोक्षतत्त्वं ९ तत्त्वमिति कोऽर्थः स तत्त्वं स्वरूपमिति यावत् । तत्र प्रथमं जीवतत्त्वं । जीवः कीदृश उच्यते । जीवति दशविधान् प्राणान् धारयतीति जीवः । दशविधप्राणाश्च कीदृशाः । "पंचेंद्रियाणि त्रिविधं बलं च उच्छ्वासनिःश्वासमथान्यदायुः । प्राणा दशैते भगवद्भिरुक्ता स्तेषां वियोजीकरणं तु हिंसा ॥१॥"

एवंविधदशप्राणधारको जीवः तस्य स्वरूपं यद्विचार्यते तज्जीवतत्त्वं । द्वितीयं अजीवतत्त्वं जीवादन्योऽजीवः प्राणचेतना-रहित इतिभावः तस्य तत्त्वं स्वरूपं यत्तदजीवतत्त्वम् । तृतीयं पुण्यतत्त्वं पुण्यं कीदृशं यत् शुभप्रकृत्यात्मकं कर्म जीवानां सौख्यं ददाति तत्पुण्यं तस्य तत्त्वं पुण्यतत्त्वं । चतुर्थं पापतत्त्वं पापं किमुच्यते यद् अशुभप्रकृत्यात्मकं कर्म जीवानां दुःखं ददाति तत्पापं तस्य तत्त्वं पापतत्त्वम् । पंचमं आश्रवतत्त्वं आश्रवंति आगच्छंति यस्मात्पापानि जीवेषु स आश्रवः तस्य तत्त्वं स्वरूपं आश्रवतत्त्वं । षष्ठं संवरतत्त्वं संव्रियंते निवार्यंते कर्माणि यस्मात्स संवरः तस्य तत्त्वं स्वरूपं संवरतत्त्वं । सप्तमं निर्जरातत्त्वं नितरां अतिशयेन जीर्यंते क्षीयंते कर्माणि यया सा निर्जरा द्वादशधा तपोरूपा तस्यास्तत्त्वं स्वरूपं निर्जरातत्त्वं । अष्टमं बंधतत्त्वं बध्यंते जीवेन



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सह संबद्धानि कर्माणि क्रियंते येन स बंधः तस्य तत्त्वं-स्वरूपं बंधतत्त्वं । नवमं मोक्षतत्त्वं सकलकर्मणां सर्वथा क्षयलक्षणो मोक्षः तस्य तत्त्वं मोक्षतत्त्वं । च शब्द एवार्थे । एतान्येव नव तत्त्वानि यथासिद्धांतोक्तप्रकारेण ज्ञेयानि न तु कुतीर्थिक कल्पितानि । कुत्रापि पुण्यपापयोर्बंधे अंतर्भावात् सप्तैव तत्त्वानि उक्तानि । एवं नवानां तत्त्वानां नामान्युक्तानि । इत्येकगाथा व्याख्याता ॥

## अथ नवतत्त्वानां भेदसंख्यानं कथयति

**चउदस चउदस बाया-लीसा बासीअ हुंति बायाला । सत्तावन्नं बारस, चउ नव भेया कमेणेसिं ॥२॥**

चउइति-एतेषां नवानां तत्त्वानां क्रमेण एते भेदा ज्ञातव्याः । यथा चतुर्दश भेदा जीवानां । चतुर्दश भेदा अजीवानां । द्विचत्वारिंशद्भेदाः पुण्यप्रकृतीनां । द्व्यशीतिभेदाः पापप्रकृतीनाम् । द्विचत्वारिंशद्भेदा आश्रवद्वाराणां । सप्तपंचाशद्भेदाः संवरस्य । द्वादशभेदा निर्जरायाः । चत्वारो भेदा बंधस्य । नवभेदा मोक्षस्य । एवं नवानां तत्त्वानां भेदसंख्यां २७६ निगद्य अथ एतेषां भेदानां क्रमेण विवरणं वक्ति--

**एगविह दुविह तिविहा, चउविहा पंचछविहा जीवा । चेयण तस ईयरेहिं, वेय गइ करण काएहिं ॥३॥**

**एगिंदिय सुहुमियरा, सन्नियर पणिंदिआ य स बि ति चउ । अपज्जत्ता पज्जत्ता चउदस जियठाणा ॥४॥**

(अव०) एगविहेति एगिंदियेति-इह अत्र जिनशासने चतुर्दश जीवस्थानानि ज्ञातव्यानि । यथा एकेंद्रियाः

For Private and Personal Use Only

एकं शरीरलक्षणं इंद्रियं येषां ते एकेंद्रियाः । ते च द्विधा सूक्ष्मा बादराश्च । तत्र सूक्ष्माश्चर्मचक्षुषा अदृश्याः । बादराः पुनर्दृश्याः ।
ते च द्वयेऽपि पृथिवीकाय-अप्काय-तेजःकाय वायुकाय-वनस्पतिकायरूपाः । तथा द्वींद्रियाः द्वे शरीररसनालक्षणे इंद्रिये येषां
ते द्वींद्रियाः । शंख-कपर्दक-गंडोल-जलूका-कृमि-पूतरक प्रमुखाः । तथा त्रींद्रियाः त्रीणि शरीररसनाघ्राणलक्षणानि इंद्रियाणि
येषां ते त्रींद्रियाः । पिपीलिका-यूका-मत्कूणोपदेहिका-मत्कोटकगर्दभक-गोकीटक-धान्यकीटक-कुंथुकप्रमुखा ज्ञातव्याः ।
तथा चतुरिंद्रियाः चत्वारि शरीररसनाघ्राणचक्षुर्लक्षणानि इंद्रियाणि येषां ते चतुरिंद्रियाः । मक्षिका-भ्रमर-दंश-मशक-कंसारिका
शलभ-पतंग-वृश्चिकप्रमुखा ज्ञातव्याः । तथा पंचेंद्रियाः पंच शरीर-रसना-घ्राण-चक्षुः कर्णलक्षणानि इंद्रियाणि येषां ते
पंचेंद्रियाः । ते च द्विधा संज्ञिनः असंज्ञिनश्च । तत्र असंज्ञिनः संमूर्छिमाः खंजन-दर्दुर-मत्स्य सर्प-प्रमुखाः वांतपित्तश्लेष्म-
शुक्रमूत्ररुधिरादिप्रभवजंतवश्च मनोरहिता ज्ञेयाः । संज्ञिनःपुनर्गर्भजाः ते च तिर्यंच जलचराः खेचराः स्थलचरास्तथा मनुष्या
देवा नारकाः सर्वेप्येते संज्ञिनो मनः संयुक्ताः । एवं एकेंद्रिया द्विभेदाः । द्वींद्रियाः त्रींद्रिया चतुरिंद्रियाः, पंचेंद्रिया द्विभेदाः ।
इत्येते सप्तभेदा जीवाः सर्वेऽपि पर्याप्ता अपर्याप्ताश्च भवन्ति । ततश्चतुर्दशभेदा जीवाः संजाताः । तत्र पर्याप्तास्ते कथ्यन्ते ये
स्वकीयपर्याप्तिभिः सर्वाभिः संपूर्णा भवंति । पर्याप्तयः पुनः षट् भवंति । आहारपर्याप्तिः १ शरीरपर्याप्तिः २ इंद्रियपर्याप्तिः ३
उच्छ्वासपर्याप्तिः ४ भाषापर्याप्तिः ५ मनः पर्याप्तिः । ६ पर्याप्तिशब्देन शक्तिरुच्यते । तत्र एकेंद्रियाणां आहार- शरीर-इंद्रिय-
उच्छ्वास-निःश्वास लक्षणाश्चतस्रः पर्याप्तयो भवंति । द्वींद्रियत्रींद्रियाणां आहार-शरीर-इंद्रिय-उच्छ्वास निश्वास-भाषालक्षणाः
पंचपर्याप्तयः स्युः । पंचेंद्रियाणां पुनः आहार-शरीर-इंद्रिय-उच्छ्वासनिःश्वास-भाषा-मनोलक्षणाः षट्पर्याप्तयः स्युः । एवं

येषां जीवानां यावन्मात्राः पर्याप्तयो भवंति ते जीवास्तावन्मात्राभिः पर्याप्तिभिः पर्याप्ताः कथ्यंते । तद्विपरीता पुनः अपर्याप्ता मंतव्याः । सूक्ष्मैकेंन्द्रियपर्याप्ता सूक्ष्मैकेंद्रियापर्याप्ताः बादरैकेंद्रियपर्याप्ता बादरैकेंद्रियापर्याप्ताः । एवं द्वित्रिचतुः पंचेंद्रियसंज्ञ्यसंज्ञिनः पर्याप्तापर्याप्ताः सर्वे जीवाश्चतुर्दशभेदा ज्ञातव्याः । इति जीवतत्त्वं प्ररूपितम् ।

## अथ अजीवतत्त्वम्

**धम्माधम्मागासा, तिय तिय भेया तहेव अद्धाय । खंधा देस पएसा, परमाणु अजीव चउदसहा ॥ ५ ॥**

धम्माधम्मेति—एते चतुर्दशभेदा अजीवानां । धर्मास्तिकायः अधर्मास्तिकायः आकाशास्तिकायः एते प्रत्येकं त्रिधा । तथाहि- स्कंधः देशः प्रदेशः धर्मास्तिकायस्य तथा अधर्मास्तिकायस्य त्रयः तथा आकाशास्तिकायस्य त्रयः । एवं नवभेदा अभूवन् । तत्र अस्तीनां प्रदेशानां कायः समूहः अस्तिकायः । तत्रस्कंधः कीदृगुच्यते । चतुर्दशरज्ज्वात्मके लोके सकलोऽपि यो धर्माऽस्तिकायः स सर्वोऽपि स्कंधः कथ्यते । तस्य धर्मास्तिकायस्य कियन्मात्रो भागो देश उच्यते । तस्य धर्मास्तिकायस्य निर्विभागो भागः प्रदेशः । एवं अधर्मास्तिकायाऽऽकाशास्तिकाययोरपि स्कंध-देश-प्रदेशा ज्ञेयाः । तथा ऽद्धाकालः समयादि-लक्षणः स च दशमो भेदः । तथा पुद्गलानां चत्वारो भेदाः स्कंध-देश-प्रदेश-परमाणवश्च । तत्र द्व्यणुकादयः क्रमेण एकादिवृद्ध्या अनंताणुकावसानाः स्कंधाः । तेषां कियन्मात्रा भागा देशाः प्रोच्यंते । तेषां निर्विभागा भागाः पुनः प्रदेशा उच्यंते । परमाणवः पुनः परस्परमसंबद्धा अतीव सूक्ष्माः स्कंधादिकारण रूपा निर्विभागा एव ज्ञातव्याः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं अजीवाः चतुर्दशभेदा भवंति । अथ एतेषां विशेषस्वरूपं प्ररूपयंति ।

धम्माधम्मापुग्गल, नह कालो पंच हुंति अज्जीवा । चलणसहावो धम्मो थिरसंठाणो अहम्मो अ ॥६॥

धम्मेति—धर्मास्तिकायःधर्मास्तिकायपुद्गलास्तिकायाः नभ आकाशास्तिकायः कालः समयादिः एतानि पंचद्रव्याणि अजीवाः प्रोच्यन्ते षष्ठं जीवद्रव्यं एवं जिनशासने षट् द्रव्याणि कथ्यन्ते । अथ क्रमेण धर्मास्तिकायादीनां लक्षणमाह । चलणेति चलनस्वभावो धर्मास्तिकायः । जीवानां पुद्गलानां च गमनं कुर्वतां यद्द्रव्यं साहाय्यं ददाति तद्धर्मास्तिकायः । यथा मत्स्यानां जलं धर्मास्तिकायः (अपेक्षा कारणरूपं) इत्यर्थः । स्थिरसंस्थानः पुनः अधर्मास्तिकायः । स्थिरसंस्थान इति किमुच्यते । यद् द्रव्यं जीवपुद्गलानां स्थितिं कुर्वतां सान्निध्यं ददाति सः अधर्मास्तिकाय इति भावः । एतौ धर्माधर्मास्तिकायौ यत्र वर्त्तेते स लोकाकाशः । चतुर्दशरज्जुप्रमाणः । ततः परस्तु अलोकाकाशः । एवं धर्माधर्मास्तिकाययोर्विशेषस्वरूपं प्ररूपितम् ॥६॥

अथ आकाशपुद्गलयोः स्वरूपमाह ।

अवगाहो आगासं, पुग्गलजीवाण पुग्गला चउहा । खंधा देस पएसा, परमाणु अ चेव नायव्वा ॥७॥

अवगाहो—इति जीवपुद्गलानां अवकाशः जीवानां पुद्गलानां च यद् अवकाशं, ददाति तत् आकाशं तत् आकाशद्रव्यमिति भावः । पुद्गलाश्चतुर्विधाः स्कंध–देश–प्रदेश–परमाणु भेदैर्ज्ञातव्याः । स्कंधादीनां स्वरूपं पूर्वमेवोक्तं ज्ञातव्यं ॥७॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ कालस्वरूपमाह ।

एगाकोडी सतसट्ठि लक्खा सतहुत्तरीसहस्या य । दोयसया सोलहिया आवलिया इग मुहुत्तम्मि ॥ ८ ॥

समयावली मुहुत्ता, दीहा पक्खा य मास वरिसा य ।
भणिओ पलिआ सागर, उस्सप्पिणी सप्पिणी कालो ॥ ९ ॥

समयावलीति—समयोऽत्यंतसूक्ष्मकालः । आवलिका असंख्यातसमयप्रमाणा । निगोदजीवानां एकश्वासोच्छ्वासमध्ये सप्तदशवारान् यावन्मरणं अष्टादशसंख्योत्पत्तिरपि भवति तेषां आयुः (२५६) आवलिका । मुहूर्त्तं घटीद्वयप्रमाणं । दिवसो-अहोरात्ररूपः त्रिंशन्मुहूर्त्तप्रमाण । पक्ष पंचदशाहोरात्ररूपः । मासः पक्षद्वयप्रमाणः । वर्षं द्वादशमासप्रमाणं । पल्योपमं कूपदृष्टांतेन प्रसिद्धम् । सागरोपमं दशकोटाकोटी पल्योपमप्रमाणम् । उत्सर्पिणी प्रमाणा एव अवसर्पिणी । एष सर्वोऽपि कालः सूर्यगति-क्रियापरिच्छिन्नो ज्ञातव्यः । एवं अजीवतत्त्वस्य चतुर्दशभेदाः प्रोक्ताः । ॥ इति अजीवतत्त्वम् ॥

अथ पुण्यतत्त्वभेदान् द्विचत्वारिंशत् विवृणोति

सा उच्चगोअ मणुदुग, सुरदुग पंचेंदि जाइ पणदेहा । आइ तितणूणु वंगा, आइमसंघयण संठाणा ॥१०॥

वण्ण चउक्काऽगुरुलहु, परघा ऊसास आयवुज्जोअं ।
सुभ खगइ निमिण तसदस, सुरनर तिरिआउ तित्थयरं ॥ ११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साउच्चगोअ इति, वण्णचउक्क इति पुण्य तत्त्वस्य एते द्विचत्वारिंशद्भेदा भवंति। यथा-सातं सातावेदनीयं कर्म येन जीवः सौख्यानि लभते ॥१॥ उच्चैर्गोत्रं यस्मिन्नुत्पन्नो जीवः सर्वजन मान्यः स्यात् ॥२॥ मनुष्यद्विकं मनुष्यगति-मनुष्यानुपूर्वीरूपम् ॥३-४॥ यया कर्मप्रकृत्या जीवो मनुष्यगतित्वं लभते सा मनुष्यगतिः। यया कर्मप्रकृत्या मनुष्यगतिबद्धायुः जीवोऽन्यत्र गच्छन् मनुष्यगतौ आनीयते सा मनुष्यानुपूर्वी। सुरद्विकं सुरगति-सुरानुपूर्वीरूपं ॥४॥ सा मनुष्यगति-मनुष्यानुपूर्वीवत् ज्ञेया। पंचेंद्रियजातिः यया जीवस्य पंचेंद्रियत्वं स्यात् ॥७॥ पंच देहाः शरीराणि। औदारिकं वैक्रियं आहारकं तैजसं कार्मणं च। औदारिकं उदारैः स्फारैः पुद्गलैः निष्पन्नं तत् औदारिकम् ॥८॥ तिर्यग्मनुष्याणां योग्यं शरीरम् ॥८॥ वैक्रियं विविध-क्रियाया निष्पन्नं ॥९॥ देवनारकाणां शरीरं वैक्रियलब्धिकृतं शरीरं ज्ञेयम्। आहारकशरीरं यत्र चतुर्दशपूर्वधरैः संदेहोच्छेदाय तीर्थंकरऋद्धिदर्शनाय वा महाविदेहगमनार्थं एकहस्तप्रमाणात्यंतविशिष्टरूपसंपन्नं विधीयते शरीरं तत आहारकशरीरम् ॥१०॥ तैजसशरीरं तत् येन शरीरेण जीवैः आहारो गृहीतः खलु रसादिधातुरूपतया परिणतिं नीयते यद्वशात्तपोलब्ध्या तेजोलेश्या-निर्गमश्च क्रियते तत्तैजसं ॥११॥ कार्मणशरीरं अष्टविधकर्मविकाररूपं सर्वशरीरकारणभूतं ॥१२॥ तैजसकार्मणशरीरे संसारिजीवानां अनादिकाल संबद्धे भवतः। मोक्षगमनं विना तयोः कदापि वियोगो न स्यात्। एवं द्वादशपुण्य प्रकृतयोऽभूवन्। आदिशरीर-त्रयस्य उपांगानि। औदारिकस्य १३ वैक्रियस्य १४ आहारकस्य १५ तैजसकार्मणयोर्न भवति। आदिसंहननं वज्ररिषभ-नाराचसंहननलक्षणं १६ संस्थानं समचतुरस्ररूपं १७ वर्णचतुष्कं वर्ण १८ गंध १९ रस २० स्पर्श २१ रूपम्। अत्र पुण्यप्रकृत्यधिकारे प्रशस्तं ग्राह्यं अप्रशस्तं पुनः पापप्रकृत्यधिकारे कथयिष्यते। अगुरुलघुनामकर्म येन कर्मणा जीवानां शरीरं



For Private and Personal Use Only

न गुरुलघु स्यात् किंतु समताभावे स्यात् २२ पराघातनामकर्म येन परेषां बलवतामपि जीवः अनाकलनीयः स्यात् २३ उच्छ्वासनामकर्म येन जीवः श्वासोच्छ्वासलब्धि युक्तः स्यात् ।२४। आतपनामकर्म येन जीवस्यस्वयमनुष्णमपि उष्ण-प्रकाशसंयुक्तं शरीरं स्यात् यथा सूर्यमंडले पृथ्वीकायजीवानां इदं सूर्यमंडले एव नान्यत्र ।२५। उद्योतनामकर्म यत्र जीवानां अनुष्णप्रकाशयुक्तं शरीरं स्यात् यथाचंद्रमंडले ज्योतिश्चक्रादिषु ।२६। शुभखगति शुभविहायोगति नामकर्म विहायसा नभसा-गतिः गमनं विहायोगतिः ।२७। विहायोग्रहणं चतुर्गतिव्यामोहविच्छेदार्थं । यया जीवानां शुभा गतिः स्यात् यथा हंसगज वृषभादीनाम् । निर्माण नामकर्म येन जीवशरीरे अंगप्रत्यंगानां नियतप्रदेशव्यवस्थापनं क्रियते यथा सूत्रधारेण पुत्तलिकादौ ।२८। त्रसदशकं अग्रेतनगाथाया व्याख्यास्यते ।२९ थी ३८। सुरनरतिर्यगायुस्त्रितयं यैः कर्मभिः देवमनुष्यतिर्यग्भवेषु जीव्यते ३९ थी ४१ । तीर्थंकर नामकर्म येन चतुस्त्रिंशदतिशयादि तीर्थंकरऋद्धिसंयुक्तो जीवः त्रिभुवनस्यापि पूज्यः स्यात् ४२ । केवल्य-वस्थायां तस्योदयः स्यात् ॥ इति द्विचत्वारिंशत् भेदाः पुण्यप्रकृतिनां ज्ञेयाः ॥

## अथ पूर्वोक्तं त्रसदशकं व्याख्यानयति

**तस बायर पज्जतं, पत्तेअ थिरं सुभं च सुभगं च । सुस्सर आइज्ज जसं, तसादिदसगं इमं होइ ॥१२॥**

तसइति गाथाव्याख्या—त्रसनाम कर्म येन "त्रस्यंति उष्णाद्यभितप्ताः छायादौ गच्छंतीति त्रसाः" द्वींद्रियादिनाम-कर्मोदयः । १ बादर नामकर्म येन जीवा बादरा स्थुलाश्चक्षुर्ग्राह्या भवंति येन मनुष्यैर्जीवशरीरं दृश्यते इति भावः । २ पर्याप्ति



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नामकर्म येन जीवा निजपर्याप्तियुक्ता भवंति । ३ प्रत्येक नामकर्म येन एकस्मिन् जीवशरीरे एक एव जीवः । ४ येन बहवो जीवा एकशरीरे भवंति तत्साधारणं नामकर्म पापप्रकृतिमध्ये कथयिष्यते । स्थिरनामकर्म येन जीवानां दंतास्थ्यादि स्थिरं स्यात् । ५ शुभनामकर्म येन जीवानां नाभेरूर्ध्वंशरीरं शुभं स्यात् । ६ सुभग नामकर्म येन जीवः सर्वजनवल्लभः स्यात् । ७ सुस्वरनामकर्म येन जीवानां माधुर्यादिगुणः सुस्वरः स्यात् । ८ आदेयनामकर्म येन जीवः सर्वजनमान्यवचनः स्यात् । ९ यशःकीर्तिनामकर्म येन जीवो यशःकीर्ति युक्तो भवति । १० एवं द्विचत्वारिंशद्भेदभिन्नं तृतीयं पुण्यतत्त्वं प्ररूपितम् ।

इति पुण्यतत्त्वम्

अथ चतुर्थं पापतत्त्वं कथ्यते

**नाणंतरायदसगं, नव बीए नीअ साय मिच्छत्तं । थावरदस नरयतिगं, कसायपणवीस तिरियदुगं ॥१३॥**
**इग बि ति चउ जाईओ, कुखगइ उवघाय हुंति पावस्स । अपसत्थं वण्णचउ, अपढम संघयण संठाणा ॥१४॥**

नाणंतरायदसगं इति इगबितिइति-ज्ञानावरणीयपंचकं, पंचकं अंतराय च एवं दशकं ज्ञातव्यं । ज्ञानावरणपंचकं उच्यते- मतिज्ञानावरणं १ श्रुतज्ञानावरणं २ अवधिज्ञानावरणं ३ मनःपर्यायज्ञानावरणं ४ केवलज्ञानावरणं ५ । तत्र मतिज्ञानावरणं पंचभिः इंद्रियैः षष्ठेन मनसा जीवस्य यद् ज्ञानं स्यात् तन्मतिज्ञानम् । तस्य आवरणं मतिज्ञानावरणं ।१। श्रुतं द्विधा द्रव्यश्रुतं भावश्रुतं च द्रव्यश्रुतं द्वादशांगीलक्षणं । भावश्रुतं द्वादशांगीसमुत्पन्नोपयोगरूपं तस्य श्रुतज्ञानस्य आवरणं श्रुतज्ञानावरणं ।२। अवधिज्ञानं द्विप्रकारं



For Private and Personal Use Only

गुणहेतुकं भवहेतुकं च। देवनारकाणां भवहेतुकं, श्राद्धसाधूनां गुणहेतुकं स्यात्। तस्य आवरणं अवधिज्ञानावरणं।३। मनःपर्यवज्ञानावरणं मनःपर्यायज्ञानं सार्द्धद्वितीय द्वीपसमुद्रस्थितसंज्ञिपंचेंद्रियमनोविषयं द्विभेदं ऋजुमति विपुलमति रूपं साधूनामेव भवति। तस्य आवरणं मनःपर्यवज्ञानावरणं।४। केवलज्ञानावरणं घनघातिचतुष्टयक्षयसमुत्पन्नं सकललोकालोकविषयं केवलज्ञानं तस्य आवरणं केवलज्ञानावरणं।५। तथा अंतरायपंचकं व्याख्यायते। तच्च दानांतराय–लाभांतराय–भोगांतराय–उपभोगांतराय–वीर्यांतराय रूपं। येन कर्मणा वित्ते पात्रे च प्राप्ते सति दानफलं जानन्नपि न ददाति तद्दानांतराय।१ येन सामग्रीसमायोगेऽपि लाभो न स्यात् तल्लाभांतरायं।२ येन भोग्यवस्तुप्राप्तावपि भोक्तुं न लभते तद्भोगांतरायं।३ येन उपभोग्यवस्तुषु विद्यमानेष्वपि भोक्तुं न शक्नोति तत् उपभोगांतरायम्।४ येन नीरोगोऽपि वयस्थो हीनबलः स्यात् तद्वीर्यांतरायं।५ पंचकद्वयमीलने दशकं ज्ञातव्यम्। अथ द्वितीये कर्मणि नवभेदाः। ते चेत्थं। चत्वारि दर्शनावरणानि पंच निद्राश्च। तत्र दर्शनावरणानि चक्षुर्दर्शनावरणं–अचक्षुर्दर्शनावरणं–अवधिदर्शनावरणं केवलदर्शनावरणं। येन चक्षुर्दर्शनमाव्रियते तच्चक्षुर्दर्शनावरणम् ११ येन अपरेंद्रियदर्शनमाव्रियते तत् अचक्षुर्दर्शनावरणम् १२ येन अवधिदर्शनमाव्रियते तत् अवधिदर्शनावरणं। १३ येन केवलदर्शनमाव्रियते तत् केवलदर्शनावरणम्। १४ घटपटादिसार्थसामान्याकारपरिज्ञानं दर्शनं ज्ञातव्यम्। पदार्थविशेषाकार परिज्ञानंपुनर्ज्ञानं ज्ञातव्यं। अयमेव च ज्ञानदर्शनयोर्भेदः। अथ निद्रापंचकं निद्रा-निद्रानिद्रा-प्रचला-प्रचलाप्रचला-स्त्यानर्द्धि लक्षणं। तत्र यस्यांसत्यां सुखेन जागर्त्ति सा निद्रा। १५ यस्यां पुनर्दुःखेन जागर्त्ति सा निद्रानिद्रा। १६ स्थितस्य उपविष्टस्य वा या (निद्रा) समागच्छति सा प्रचला। १७ मार्गे गच्छतः स्वतः या समागच्छति सा प्रचला–प्रचला। १८ या दिनर्चिंतितं कार्यं रात्रौ

करोति वासुदेवार्द्धबला च स्यात् सा स्त्यानर्द्धिः । १९ एवं दर्शनचतुष्कनिद्रापंचकमीलने नव भेदाः पूर्वोक्तसहिता एकोनविंशतिर्जाता । नीचैर्गोत्रं यदुदयाज्जीवानां नीचकुले जन्मस्यात् । २० असातावेदनीयं येन जीवा दुःक्खपरंपरां लभते तच्च प्रायस्तिर्यग्नरकेषु स्यात् । २१ मिथ्यात्वं–"अदेवे देवबुद्धिर्या गुरुधीरगुरौ च या । अधर्मेधर्मबुद्धिश्च मिथ्यात्वंतन्निगद्यते" ॥१॥ इत्यादि लक्षणम् । २२ स्थावरदशकं अग्रेतनगाथायां व्याख्यास्यते । २३ थी ३२ नरकत्रिकं नरकगति–नरकायु–नरकानुपूर्वीलक्षणं । यया जीवो नरके याति सा नरकगतिः । ३३ येन जीवो नारके तिष्ठति तन्नरकायुः । ३४ यया जीवो बलान्नरकेनीयते सा नरकानुपूर्वी । ३५ कषायाः पंचविंशतिः ते चैवं षोडश कषायाः नव नोकषायाः । तत्र कषायाः क्रोध-मान-माया-लोभरूपाः । प्रत्येकं चतुः प्रकाराः । अनंतानुबंधिक–अप्रत्याख्यानक–प्रत्याख्यानक–संज्वलनभेदैर्बोद्धव्याः । तत्र अनंतानुबंधिका आजन्मावधिभाविनः नरकगतिप्रदायिनः सम्यक्त्वघातिनो ज्ञेयाः । अप्रत्याख्याना वर्षावधिभाविनः तिर्यग्गतिदायिनः देशविरतिघातिनः । प्रत्याख्याना मासचतुष्टयभाविनः मनुष्यगतिदायिनः साधुधर्मघातिनः । संज्वलनाः पुनः पक्षावधयो देवगतिप्रदाः केवलज्ञानघातिनः । एवं क्रोधादयः प्रत्येकं चतुर्भेदाः षोडशाऽभुवन् । नोकषाया नव हास्यादिषट्कवेदत्रयरूपाः । तत्र हास्यषट्क हास्य–रति–अरति–शोक–भय जुगुप्सालक्षणं ज्ञातव्यम् । तत्र येन सनिमित्तं निर्निमित्तं वा हास्य स्यात् तत् हास्य मोहनीयं । येन मनोहरेषु शब्दरूपादिपदार्थेषु रागः स्यात्तत् रतिमोहनीयम् । येन पुनः अमनोहरेषु तेषु उद्वेगः स्यात् तत् अरतिमोहनीयं । येन अभीष्ट वियोगादिदुःखं ध्रियते तत् शोकमोहनीयं । येन जीवानां नानाविधनिमित्तैर्भयमुत्पद्यते तत् भयमोहनीयं । येन बिभत्सवस्तुदर्शनेन निंदादिकं करोति तत् जुगुप्सामोहनीयं । अथ वेदत्रयं पुंवेद–स्त्रीवेद–नपुंसकवेदरूपं ।

तत्र येन स्त्रियं प्रति अभिलाषः स्यात् स पुंवेदः तृणदाहतुल्यः। येन पुरुषं प्रत्यभिलाषः स्यात्स स्त्रीवेदः करीषदाहतुल्यः। येन पुंस्त्रीविषये अभिलाषः स्यात् स नपुंसकवेदः नगरदाहतुल्यः। एवं षोडशकषायैः नव नोकषायैः कषायपंचविंशतिर्व्याख्याता। एवं पूर्वोक्तपंचत्रिंशत्कषायपंचविंशतिमीलने षष्टिर्भेदाः। ६०। तिर्यग्द्विकं तिर्यग्गति तिर्यगानुपूर्वीरूपं। येन तिर्यग्गतौ गम्यते सा तिर्यग्गतिः। ६१। येन तिर्यग्गतौ बलान्नीयते सा तिर्यगानुपूर्वी। ६२। एकेंद्रियजातिः यथा जीवानां एकेंद्रियत्वं भवति सा एकेंद्रियजातिः। ६३। एवं द्वि-त्रि-चतुरिंद्रियजातयो ज्ञेयाः। ६४-६५-६६। कुखगतिः यया जीवानां अशुभगतिः यथा खरोष्ट्रादीनाम्। ६७। उपघातनामकर्म येन स्वशरीरावयवः प्रतिजिह्वा-गलकंठिका-चोरदंतादिभिः उपहन्यते तत् उपघातनाम कर्म। ६८। अप्रशस्तं वर्ण-गंध-रस-स्पर्शस्वरूपं। ६९-७०-७१-७२। प्रथमं संहननं संस्थानं वर्जयित्वा शेषाणि पंच संहननानि पंच संस्थानानि च पापप्रकृतिमध्ये ज्ञातव्यानि। प्रथमं संहनन प्रथमं संस्थानं पुण्यप्रकृतिमध्ये पूर्वमेव कथितं। तत्र संहननानि वज्रऋषभनाराच १ ऋषभनाराच २ नाराच ३ अर्द्धनाराच ४ कीलिका ५ सेवार्त्त-रूपाणि। यस्मिन् अस्थिसंधौ उभयतो मर्कटबंधः पट्टकीलिका च स्यात् तत् वज्रऋषभनाराचं तत्पुण्यप्रकृतिमध्ये ज्ञातव्यम्। कीलिकारहितं ऋषभनाराचं। ७३। अस्थिसंधौ उभयतो मर्कटबंधः स्यात् तन्नाराच। ७४। यत्रैकपार्श्वे मर्कटबंधोऽपरपार्श्वे च कीलिका स्यात् तत् अर्द्धनाराचं। ७५। यत्रास्थीनि कीलिकामात्रबद्धानि स्युः तत्कीलिकाख्यं। ७६। यत्र पुनः अस्थीनि पृथक् स्थितानि परस्परं संलग्नानि भवंति तत् सेवार्त्तं। ७७। नित्यं स्नेहाभ्यंगादिसेवया ऋतं व्याप्तं सेवार्त्तं इति नामार्थः। एवं पंचसंहननानि पापप्रकृतिमध्ये गतानि व्याख्यातानि। अथ संस्थानानि तान्या-



For Private and Personal Use Only

कारविशेषरूपाणि समचतुरस्रपर्यंक–न्यग्रोधपरिमंडल–सादि–कुब्जक–वामन–हुंडाख्यानि । तत्र समचतुरस्रपर्यंकं पर्यंकासनोपविष्टजिनबिंबानामिव ज्ञातव्यं तच्च पुण्यप्रकृति पूर्वोक्तं । न्यग्रोधं यथा न्यग्रोधो वटः उपरि संपूर्णावयवः अधस्तु हीनः तथा नाभेरुपरिलक्षणोपेततया संपूर्णं अधस्तु हीनं यत्संस्थानं तन्न्यग्रोधपरिमंडलं । ७८ । सादि संस्थानं सह आदिना वर्त्तते तत्सादि । नाभेरधस्तात् यथोक्तलक्षणप्रमाणोपेतं पुनः उपरिहीनं इति भावः । ७९ । कुब्जसंस्थानं यत्र पादपाणिशिरोग्रीवादिकं प्रमाणलक्षणोपेतं उरउदरादि च हीनं तत् कुब्जं । ८० । तद्विपरीतं वामनसंस्थानं । ८१ । सर्वावयवैरशुभं हुंडसंस्थानं । ८२ । सांप्रतं प्रायो मनुष्याणां तदेव । एवं द्व्यशीतिः पापप्रकृतयो व्याख्याः ।

## अथ पूर्वमुक्तं स्थावरदशकं व्याख्यानयति

**थावर सुहुम अपज्जं, साहारणमथिर मसुभदुभगाणि । दुस्सरणाइज्जजसं, थावर दसगं विवज्जत्थं ॥ १५ ॥**

थावर० इति—गाथा–तिष्ठंति उष्णादितापिता अपि तत्परिहारासमर्था भवंति ते स्थावराः ते सर्वेऽप्येकेंद्रिया ज्ञातव्याः । स्थावरत्व प्रदायकंकर्म स्थावरनामकर्म । १ सूक्ष्मनामकर्म येन जीवाश्चर्मचक्षुषामदृश्या भवंति यथा निगोदादयः । २ अपर्याप्तनामकर्म–येन जीवा पर्याप्ति विना म्रियंते । यथा सर्वकालं निगोदाः ३ साधारणनामकर्म–येन एकस्मिन् शरीरे अनंतानां जीवानां अवस्थानं भवति यथा कंदाद्यनंतकायमध्ये । ४ अस्थिरनामकर्म–येन जीवानां ओष्ठजिह्वादयोऽवयवा अस्थिराः स्युः । ५ अशुभनामकर्म–येन नाभेः अधः शरीरं अशुभं स्यात् । ६ दुर्भगनामकर्म–येन जीवा दौर्भाग्यवंतो भवन्ति । ७ दुःस्वरनामकर्म–



For Private and Personal Use Only

येन जीवानां अमनोज्ञः स्वरः स्यात् । ८ अनादेयनामकर्म-येन जीवानां वचनं केनापि न मन्यते । ९ अयशःकीर्त्तिनामकर्म-येन जीवानां लोके अयशःकीर्त्तिः स्यात् । १० एवं स्थावरदशकं व्याख्यातं । इति चतुर्थं पापतत्त्वं प्ररूपितम् ।

### अथ पंचमं आश्रवतत्त्वं व्याख्यानयति

इंदिय कसाय अव्वय, जोगा पंच चउ पंच तिन्नि कमा ।
किरियाओ पणवीसं, इमा उ ताओ अणुक्कमसो ॥१६॥

इंदिअ० इति—इंद्रियाणि कषायाः अव्रतानि योगाः एतेषां क्रमेण पंच चत्वारः पंच त्रयः भेदा भवंति । तत्र इंद्रियाणि पंच श्रोत्रादीनि प्रसिद्धान्येव सामान्यतः । विशेषतः पुनस्तानि द्विधा द्रव्येंद्रियाणि भावेंद्रियाणि । तत्र द्रव्येंद्रियाणि पुद्गलद्रव्यरूपाणि भावेंद्रियाणि लब्ध्युपयोगलक्षणानि । पुनःद्रव्येंद्रियाणि निर्वृत्तिउपकरणभेदात् द्विधा । निर्वृत्तिरपि द्विधा अंतःबहिश्च । तत्र श्रोत्रेंद्रियमध्ये कदंबकुसुमाकारा देहावयवरूपा निर्वृत्तिरस्ति या शब्दप्रकारग्रहणे वर्त्तते । चक्षुरिंद्रियस्य धान्यमसूराकारा, घ्राणेंद्रियस्य अतिमुक्तकपुष्पाकारा, काहलिकासदृशी वा रसनेंद्रियस्य क्षुरप्राकारा, स्पर्शनेंद्रियस्य नानाकारा अभ्यंतरा निर्वृत्तिः । बाह्या निर्वृत्तिः पुनः सर्वेषां इंद्रियाणां या दृश्यमानास्ति सैव ज्ञातव्या । उपकरणं तेषामेव पुनः कदंबाकारादीनां खड्गस्य छेदनशक्तिरिव स्वस्वविषयग्रहणशक्तिः तद्रूपं ज्ञातव्यं । एवं द्रव्येंद्रियस्वरूपं प्रोक्तं । भावेंद्रियाणि लब्ध्युपयोगरूपाणि । जीवस्य ज्ञानावरणादिकर्मक्षयोपशमभावात् या शब्दादिग्रहणशक्तिः सा लब्धिः । येन पुनः शब्दादीनां ग्रहण-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिणामः स उपयोगः । एतद् द्वयरूपाणि भावेंद्रियाणि । इति पंचापि इंद्रियाणि व्याख्यातानि । चत्वारः कषायाः पंच अव्रतानि त्रयो योगाः इति सप्तदशभेदा आश्रवस्य व्याख्याताः । शेषाः पंचविंशतिक्रियारूपाः प्रोच्यन्ते । क्रियाः पंचविंशतिः ताः पुनः इमा वक्ष्यमाण लक्षणानुक्रमेण ज्ञातव्याः । तासामेव लक्षणमाह ।

काइअ अहिगरणीया, पाउसिया पारितावणी किरिया। पाणाइवायरंभिअ, परिग्गहिया मायवत्तीया ॥१७॥
मिच्छादंसणवती, अप्पच्चक्खाणा य दिट्ठी पुट्ठी अ। पाडुच्चि य सामंतो, वणीअ नेसत्थि साहत्थि ॥१८॥
आणवणि विआरणिआ, अणभोगा अणवकंख पच्चइआ ।
अन्नापओगसमुदाण, पिज्जदोसेरिआ वहिआ ॥१९॥

काइअ, इति मिच्छादंसण इति आणवणि इति—कायेन अयतमानेन निर्वृत्ता सा कायिकी कथ्यते ।१। अधिकारणिकी पशुवधादिप्रवर्त्तनेन खड्गादि निर्वर्त्तनेन चाधिकरणेन निर्वृत्ता अधिकरणिकी । २ । जीवाजीवयोरुपरि प्रद्वेषेण प्राद्वेषिकी ।३। क्रोधादेः स्वपरयोः परितापेन पारितापनिकी ।४। प्राणातिपातेन प्राणातिपातिकी ।५। कृष्याधारंभनेन आरंभिकी ।६। धान्यादिपरिग्रहेण परिग्रहिकी ।७। मायया परवंचनेन संजाता मायाप्रत्ययिकी । ८। जिनवचनविपरीतपरिणामेन मिथ्यादर्शनेन संजाता मिथ्यादर्शनप्रत्ययिकी ।९। अप्रत्याख्यानेन अविरत्या जाता अप्रत्याख्यानिकी ।१०। कौतुकान्निरीक्षणेन दृष्टिकी ।११। रागाद् द्वेषाद्वा जीवाजीवयोः स्वरूप पृच्छनेन अथवा रागादेश्ववृषभबालकादिविशिष्टवस्तूनां हस्त स्पर्शनेन



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्वृत्ता पृष्ठिकी तथा स्पृष्टिकी वा ।१२। जीवाजीवादौ प्रतीत्य—आश्रित्य कर्मबंधनेन संजाता प्रातित्यकी ।१३। स्वकीयगजाश्ववृषभादिविशिष्टपदार्थं विलोकयितुं लोकं सर्वतः समागच्छंतं प्रशंसां कुर्वंतं दृष्ट्वा हर्षकरणेन अथवा अनाच्छादितस्नेहादि भाजने त्रसाणां जीवानां निपातनेन संजाता सामंतोपनिपातिकी ।१४। राजाद्यादेशान्नितरां यंत्रशस्त्राद्याकर्षणेन संजाता नैशस्त्रिकी ।१५। जीवेन श्वानादिना अजीवेन शस्त्रादिना शशकादिकं स्वहस्तेन मारयतः स्वाहस्तिकी ।१६। जीवाजीवयोराज्ञापनेन स्वेच्छया व्यापाररूपेण आनयनेन वा आज्ञापनिकी आनयनिकी वा ।१७। जीवाजीवयोर्विदारणेन स्फोटनेन वैदारणिकी ।१८। शून्यचित्ततया वस्तूनामादान-ग्रहणेन अनाभोगिकी ।१९। इह परलोकविरुद्धाचरणेन अनवकांक्ष प्रत्ययिकी ।२०। अन्या अपरा एकविंशतितमा । मनोवचनकाययोगदुःप्रणिधानेन निर्वृत्ता प्रायोगिकी ।२१। अष्टानां कर्मणां समुदायेन या भवति सा सामुदायिकी ।२२। मायालोभाश्रिता प्रेमिकी ।२३। क्रोधमानाश्रिता द्वेषिकी ।२४। केवलिनां केवलकाययोगजनितबंधेन संजाता ऐर्यापथिकी ।२५। एवं क्रियाः पंचविंशतिः । एवं पूर्वोक्त सप्तदशभेदानां पंचविंशतिक्रियाणां च मीलने द्विचत्वारिंशत् भेदा आश्रवस्य ज्ञातव्याः । इत्थं पंचमं आश्रवतत्त्वम् ।

## ❋ षष्ठं संवरतत्त्वं विवृणोति ❋

**समिइ गुत्ति परीसह, जइधम्मो भावणा चरित्ताणि । पण ति दुवीस दस बार, पंच भेएहिं सगवन्ना ॥२०॥**

समिइ इति—संवरतत्त्वस्य सप्तपंचाशत् भेदाः । ते च एवं ज्ञातव्याः । यथा समितयः पंच, गुप्तयस्तिस्रः, परीषहाः



For Private and Personal Use Only

द्वात्रिंशतिः यतिधर्मो दशभेदः भावना द्वादशधा चारित्राणि पंच एवं क्रमेण समित्यादीनां षण्णां उत्तरभेदप्रोक्तभेदसंख्यायोजने सर्वाग्रे सप्तपंचाशद् भेदा ज्ञातव्याः। तत्र समितयः पंच ईर्यासमितिः १ भाषासमितिः २ एषणासमितिः ३ आदाननिक्षेपणासमितिः ४ पारिष्ठापनिका समितिः ५ तत्र सम्यक् प्रशस्तार्हत्प्रवचनानुसारेण इतिःगमनं चेष्टासमितिः। ईर्यायाः गमनस्य समितिः ईर्यासमितिः। मार्गे गच्छत् धूसर-युग प्रमाणभूमौ दत्तदृष्टिः साधुः समस्तजीवानां रक्षां कुर्वन् याति सा ईर्यासमितिः इतिभावः ।१। भाषासमितिः भाषाया निरवद्यवचनस्य समितिः ।२। एषणासमितिः या द्विचत्वारिंशद्दोषविवर्जितः आहारः साधुभिः गृह्यते सा एषणासमितिः ।३। आदाननिक्षेपसमितिः आदानं वस्तूनां ग्रहणं निक्षेपो वस्तूनां स्थापनं तयोः आदाननिक्षेपयोः समिति यद् वस्तूनां ग्रहणं मोचनं च प्रथमं चक्षुषा निरीक्ष्य ततो रजोहरणादिना प्रमार्ज्य विधीयते सा आदाननिक्षेपसमितिः इति भावः ।४। पारिष्ठापनिकासमितिः परिष्ठाप्यते परित्यज्यते सदोषादि वस्तु सा पारिष्ठापनिका समितिः ।५। यत्र कफमूत्रमलादि निर्जीवस्थाने यतनया परिष्ठाप्यते सा पारिष्ठापनिकासमितिः। एवं पंच समितयः व्याख्याताः अथ गुप्तयः तिस्रः मनोगुप्तिः १ वचनगुप्तिः २ कायगुप्तिः ।३। तत्र मनोगुप्तिः त्रिधा आर्त्तरौद्रध्यानानुबंधिकल्पनाजालपरिहारः १ धर्मध्यानानुबंधिनी माध्यस्थ्यपरिणतिः २ केवलज्ञानयोगनिरोधावस्थायां सकलमनोद्रव्यनिरोधश्च ३ इति मनोगुप्तिः। वचनगुप्तिः द्विधा-भ्रूसंज्ञादिपरिहारात् मौनाभिग्रहः ।१। वाचनापृच्छनादिषु मुखवस्त्रिकाच्छादित वक्त्रस्य भाषमाणस्यापि वाग्नियंत्रणं ।२। वचनगुप्तिः सर्वथा वचननिरोधः निरवद्यसम्यक्वचनभाषणाभ्यां कृत्वा द्विभेदा भाषासमिति पुनः सम्यक्वचनप्रवृत्तिरूपतया एकभेदा एव इति वचनगुप्ति भाषा समित्योर्भेदः। कायगुप्तिः



For Private and Personal Use Only

द्विधा उपसर्गादिसद्भावे कायोत्सर्गाद्चलनं, केवलिनां योगनिरोधावस्थायां सर्वथा शरीरचेष्टापरिहारः वा ।१। तथा सिद्धांतोक्तविधिना मुनीनां कायव्यापारस्य ।२। एवं तिस्रो गुप्तयः व्याख्याताः ।२०।

अथ परीषहाः द्वाविंशतिः

खुहा पिवासा सी उण्हं, दंसा चेला रइत्थिओ । चरिआ निसिहियासिज्जा, अक्कोस वह जायणा ॥२१॥
अलाभ रोग तण फासा, मल सक्कार परीसहा । पन्ना अन्नाण सम्मत्तं, इअ बावीस परीसहा ॥ २२ ॥

खुहा इति अलाभ—इति क्षुधापरीषहः निरवद्याहारालाभे क्षुधा सहनीया न पुनः सावद्याहार ग्रहणं कार्यं इत्येवंस्वरूपः ।१। पिपासापरीषहः तृषा सहनीया न पुनः गाढ तृषापीडितैरपि सचित्तजलं पेयं ।२। शीतपरीषहः कायोत्सर्गं विहारादि कुर्वतां शीतं लगति तत् सहनीयं अग्निसेवादि न चिंतनीयं ।३। उष्णपरीषहः ग्रीष्मतापाक्रांतैरपि स्नानवायुव्यंजन वातायनश्रयणादि न विधेयं आतापनादि कष्टं सहनीयं ।४। दंशमशकपरीषहः कायोत्सर्गादिषु दंशमशककृता विघाताः सहनीयाः ।५। चेलपरीषहः मानप्रमाणोपेतैर्वस्त्रैर्मलिनजीर्णशीर्णैरपि खेदो मनसि न कार्यः ।६। अरतिपरीषहः अमनोज्ञोपाश्रयाहारादिषु अरतिः न कार्या ।७। स्त्रीपरीषहः स्त्रीणां मनोहररूपविभूषाविलास वाक्यहावभावादिकं दृष्ट्वा चित्तक्षोभो न कार्यः ।८। चर्यापरीषहः वायुवत् अप्रतिबद्धतया विहारः कार्यः न पुनः एकत्र वासः ।९। नैषेधिकीपरीषहः स्मशाने शून्यागारे सर्पबले सिंहगुहादिषु कायोत्सर्गस्थैः नानाविधोपसर्गसद्भावेऽपि

अशिष्टा चेष्टा न कार्या ।१०। शय्यापरीषहः उच्चावचासु शय्यासु शीतोष्णकालादौ मनसि उद्वेगो न विधेयः ।११। आक्रोशपरीषहः अज्ञानलोकप्रोक्तवैभाष्यवाक्य श्रवणे कोपो न कार्यः दृढप्रहारिवत् ।१२। वधपरीषहः कोऽपि दुरात्मा साधूनां वधं करोति तथापि साधुभिः क्रोधो न विधेयः स्कंदकसूरिशिष्यवत् ।१३। याञ्चापरीषहः भिक्षावृत्तिकाले परगृहेषु याचने दुःखं मनसि न धार्यं ।१४। अलाभपरीषहः अंतरायकर्मोदयात् निर्दोषभिक्षालाभाभावेऽपि चित्ते उद्वेगो न कार्यः ढंढणकुमारवत् ।१५। रोगपरीषहः उग्ररोगसंभवेपि आर्त्तध्यानं न कार्यं सम्यक् सह्यं सनत्कुमारवत् ।१६। तृणपरीषहः संस्तारकादौ दर्भादितृणव्यापारे देहपीडायामपि दुःखं न चिंत्यं ।१७। मलपरीषहः मलस्वेदादि शरीरात् न स्फेटनीयं किंतु यावज्जीवं सम्यक् सहनीयं ।१८। सत्कारपुरस्कारपरीषहः बहुलोकनरेश्वरादिकृत स्तुतिवंदनादेः चित्तोन्मादो न कार्यः उत्कर्षो मनसि न कार्यः ।१९। प्रज्ञापरीषहः बहुज्ञान संभवेऽपि आत्मीयचित्ते गर्वो न कार्यः ।२०। अज्ञानपरीषहः ज्ञानावरणीय-कर्मोदयात् पठतामपि पाठो नागच्छति तथापि दुःखं मनसि न कार्यं किंतु कर्मविपाक एव चिंत्यः ।२१। सम्यक्त्वपरीषहः जिनशासनविषये देवगुरुधर्म विषये च संदेहो न विधेयः ।२२। एवं द्वाविंशतिः परीषहा व्याख्याताः ।२१-२२।

## अथ यतिधर्मो दशधा-दशप्रकारः

**खंति मद्दव अज्जव, मुत्ती तव संजमे अ बोधव्वे । सच्चं सोअं आकिं-चणं च बंभं च जइधम्मो ॥२३॥**

खंति इति-क्षमा-मार्दव-आर्जव-निर्लोभता-तपः-संयम-सत्य-शौच-अकिंचनत्व-ब्रह्मस्वरूपः । तत्र क्षमा क्रोधजयः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स च उपशमेन स्यात् ।१। मार्दवं मृदोर्भावः मार्दवं अहंकारपरिहारः ।२। आर्जवं ऋजोर्भावः मायात्यागः ।३। निर्लोभता लोभपरिहारः ।४। तपः बाह्यांतरभेदैर्द्वादशधा ।५। संयमः प्राणातिपातविरमणरूपः ।६। सत्यं सद्भ्यो जीवेभ्यो हितं पथ्यं सत्यं ।७। शौचं सर्वजीवेषु सुखकारि वर्त्तनं शौचं अदत्तादानपरिहारः ।८। अकिंचनत्वं न विद्यते किंचन यस्य सः अकिंचनः अकिंचनस्यभावः अकिंचनत्वं सर्वपरिग्रह त्यागः ।९। ब्रह्म औदारिकवैक्रियसंबंधमैथुनपरिहारः ।१०। (२३)

## ❀ अथ द्वादश भावना ❀

**पढममणिच्चमसरणं, संसारो एगया य अण्णत्तं। असुइत्तं आसव, संवरो, अ तह णिज्जरा नवमी ॥२४॥**
**लोगसहावो बोही, दुल्लहा धम्मस्स साहगा अरिहा। एआओ भावणाओ, भावेअव्वा पयत्तेणं ॥२५॥**

**पढम इति लोग सहावोइति**–अनित्यभावना १ अशरणभावना २ भवभावना ३ एकत्वभावना ४ अन्यत्वभावना ५ अशौचभावना ६ आश्रवभावना ७ संवरभावना ८ निर्जराभावना ९ धर्मभावना १० लोकभावना ११ बोधिभावना १२ तत्र संसारे सर्वपदार्थानां अनित्यता यत्चिंत्यते सा अनित्यभावना ।१। अशरणं देहिनां मरणादिभये संसारे शरणं किमपि नास्ति इत्यादिर्चिंतनं अशरणभावना ।२। जीवानां चतुरशीतिलक्षजीवयोनिपरिभ्रमण चिंतनं भवभावना ।३। एकाक्येव जीवः उत्पद्यते विपद्यते कर्माण्युपार्जयति भुंक्ते चेत्यादिर्चिंतनं एकत्वभावना ।४। जीवानां देहात् पृथक्त्वे सति पुत्रकलत्रादिधनादि-पदार्थेभ्यः अत्यंतभेद एकत्वं अतः तत्त्ववृत्त्या कोऽपि कस्यापि संबंधी नास्ति–इत्यादि चिंतनं अन्यत्वभावना ।५। देहस्य सप्त-



For Private and Personal Use Only

धातुमयस्य नव स्रोतांसि निरंतरं स्रवंति मलमूत्रश्लेष्मादि-वस्तूनि बीभत्सानि सहचारीणि संति अतः शुचित्वं कुतः स्यादिति चिंतनं अशौचभावना ।६। संसारमध्यस्थितसमस्तजीवानां मिथ्यात्वकषायाविरतिप्रमादार्त्तरौद्रध्यानादिहेतुभिः निरंतरंकर्माणि बध्यमानानि संति इतिर्चिंतनं आश्रवभावना ।७। मिथ्यात्वादीना बंधहेतुभूतानां संवरणोपायाः सम्यक्त्वादयः तेषां चिंतनं संवरभावना ।८। निर्जराभावना कर्मनिर्जराख्या द्विधा सकामा अकामा च । तत्र सकामा साधूनां । अकामा च अज्ञानकष्ट-जनिताजीवानां । तत्र सकामा द्वादशप्रकारतपोहितकर्मक्षयरूपा ।१। अकामा पुनः तिर्यगादिजीवानां तृषाबुभुक्षा छेदनभेदनभारो द्वारसावद्यकामकष्टसहनेन या कर्मक्षयः तद्रूपा ज्ञातव्या । एवंविधा या निर्जरायाः चिंतनं निर्जराभावना ।९। दुस्तरसंसारसागरसमु-त्तारणप्रवहणप्राय श्रीजिनप्रणीतश्रीधर्मभावचिंतनं धर्मभावना ।१०। चतुर्दशरज्ज्वात्मकलोकस्य कटिसंस्थापितकर तिर्यक्प्रसारित पादपुरुषाकारस्य धर्माधर्मास्तिकायादिषट्द्रव्यैः परिपूर्णस्य लोकस्य चिंतनं लोकभावना ।११। अनंतानंतकालदुर्लभमनुष्यादिसामग्री-योगेऽपि दुःप्रापं प्रायो बोधिबीजं जीवानां इत्यादि चिंतनं बोधिभावना ।१५। एवं द्वादशभावनाः व्याख्याताः

## ❈ अथ पंच चारित्राणि ❈

सामाइअत्थ पढमं, छेओवठावणं भवे बीअं। परिहारविसुद्धीअं, सुहुमं तह संपरायं च ॥ २६ ॥
तत्तोअ अहक्खायं, खायं सव्वंमि जीवलोगंमि । जं चरिऊण सुविहिया, वच्चंति अयरामरं ठाणं ॥२७॥

सामाइ इति तत्तोअ इति-चारित्राणि पंच सामायिक १ छेदोपस्थापनीय २ परिहारविशुद्धिक ३ सूक्ष्मसंपराय ४



For Private and Personal Use Only

यथाख्यात ५ नामानि । तत्र सामायिकं सर्वसावद्यव्यापारपरित्याग निरवद्यव्यापारासेवनरूपं ज्ञातव्यं ।१। छेदोपस्थापनीयं गणाधिपेन प्रदत्तं प्राणातिपात विरमणादिपंचमहाव्रतरूपं ।२। परिहारविशुद्धिकं नव साधवो गच्छात् पृथग् भूत्वा अष्टादश-मासान् यावत्यत्सिद्धांतप्रोक्तरीत्या तपः कुर्वंति तत्परिहारविशुद्धिकं ज्ञेयं ।३। सूक्ष्मसंपरायं सूक्ष्मसंपरायाख्यदशमगुणस्थानक प्राप्तानां साधूनां यच्चारित्रं तत् सूक्ष्मसंपरायं ।४। यथाख्यातं सर्वेषु कषायेषु सर्वक्षयं प्राप्तेषु साधूनां यच्चारित्रं तत् यथाख्यातं ।५। एतेषां चारित्राणां मध्ये सांप्रतं प्रथमचारित्रद्वयं विद्यमानमस्ति शेषाणि त्रीणि चारित्राणि व्युच्छिन्नानि । एवं चारित्रपंचकं व्याख्यातं । एवं समितीनां पंच भेदाः गुप्तीनां त्रयः परीषहानां द्वाविंशतिः यतिधर्मस्य दश भावनानां द्वादश चारित्राणां पंच भेदाः इति सप्तपंचाशद्भेदाः संवरतत्त्वस्य संजाताः । इति षष्ठं संवरतत्त्वं संक्षेपतो व्याख्यातम् ।२६-२७।

## अथ सप्तमं निर्जरातत्त्वं व्याख्यानयति

अणसण मूणोअरिया, वित्ती संखेवणं रसच्चाओ । कायकिलेसो संली-णया य बज्झो तवो होइ ॥२८॥
पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ । झाणं उस्सग्गो विअ, अब्भितरओ तवो होई ॥२९॥
बारसविहं तवो णि ज्जरा य बंधो चउ विगप्पो अ। पयई ठिइ अणुभागो, पएस भेएहिं नायव्वो ॥३०॥

अणसण इति पायच्छित्तं इति-बारसविहं इति । तत्र बारसविहं इति-गाथामध्यात् पदमेकं । ( व्याख्यानयति ) द्वादशप्रकारं तपो निर्जरा प्रोच्यते । तत् तपो बाह्याभ्यंतरभेदाभ्यां द्विधा स्यात् । तत्र बाह्यं तपः षड्विधं अनशन १

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऊनोदरता २ वृत्तिसंक्षेप ३ रसत्याग ४ कायक्लेश ५ संलीनता ६ लक्षणं। तत्र अनशनं आहारपरित्यागरूपं द्विधा इत्वरं यावत्कथिकं च। १ इत्वरंचतुर्थषष्ठाष्टमादि यावत्कथिकं यावज्जीवमनशनग्रहणरूपं। ऊनोदरता एकद्वित्र्यादिकवलहान्या ज्ञेया।२। वृत्तिसंक्षेपः द्रव्यक्षेत्रकालभावविषयाभिग्रहण रूपः।३। यथा श्री महावीरस्य चतुर्विधाभिग्रहश्चंदनबालया पूरीतः। रसत्यागो विकृति परित्यागः।४। कायःक्लेशो लोचादिकष्टसहनं।५। संलीनता चतुर्विधा इंद्रियकषाययोगनिवारण स्त्र्यादि विवर्जितोपाश्रयनिवसनभेदैर्ज्ञातव्या।६। एवं बाह्यं तपः षड्विधं लोकप्रसिद्धं व्याख्यातम्।

अथ आभ्यंतरं तपः षड्विधं।

प्रायश्चित्त १ विनय २ वैयावृत्य ३ स्वाध्याय ४ ध्यान ५ उत्सर्ग ६ नामकं। तत्र प्रायश्चित्तं निजानि पातकानि यथालग्नानि गुरूणां पुरस्तात् यत् आलोच्यते गुरुप्रदत्तं च तपः समाचर्यते तत् प्रायश्चित्तम्।१। विनयः सप्तप्रकारः ज्ञान १ दर्शन २ चारित्र ३ मनो ४ वचन ५ काय ६ विवेककल्प प्रचारिक ७ भेदैर्ज्ञातव्यः।२। वैयावृत्यं आचार्योपाध्यायतपस्विग्लानादीनां अन्नपानादिसंपादन विश्रामणादिरूपं।३। स्वाध्यायःवाचना-पृच्छना-परावर्त्तना-ऽनुप्रेक्षा-धर्मकथालक्षणः पंचभेदः।४। ध्यानं आर्त्तरौद्रधर्मशुक्लरूपं।५। तत्र आर्त्तरौद्रयोः परिहारः धर्मशुक्लयोः स्वीकारः एतौ परिहारस्वीकारौ ध्यानं कथ्यते। उत्सर्गो द्रव्यभावभेदाद् द्विधा।६। तत्र आद्यःचतुर्धा गण १ देहो २ पधि ३ भक्त ४ त्याग भेदात्। भावतः पुनः क्रोधादिपरित्यागो ज्ञातव्यः। एवं षट् प्रकारं आभ्यंतरं तपः प्ररूपितं। आभ्यंतरं कस्मात्प्रोच्यते। यतो मोक्षप्राप्तौ अंतरंगकारणमिदं ततः आभ्यंतरं कथ्यते। इति सप्तमं निर्जरातत्त्वं व्याख्यातं।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## अथ अष्टमं बंधतत्त्वं प्ररूपयति

बंधो इति बंधः कर्मभिः सह जीवानां संश्लेषः यथा क्षीरनीरयोः अग्न्यःपिंडयोर्वा। स चतुर्धा प्रकृति १ स्थिति २ अनुभाग ३ प्रदेश ४ भेदैर्ज्ञातव्यः।

एतानेव चतुरो भेदान् प्रक्षेपगाथया व्याख्यानयति।

**पयइ सहावो वुत्तो, ठिई कालावहारणं। अणुभागो रसो णेओ, पएसो दलसंचओ ॥३१॥**

पयइ इति-प्रकृतिः स्वभावः परिणाम इतिभावः। स्थितिबंधः कालपरिमाणं। अनुभागो रसः कथ्यते। प्रदेशः पुद्गलपरिमाणरूपः। एते चत्वारोऽपि भेदा मोदकदृष्टांतेन ज्ञातव्याः। यथा कश्चिन्मोदकः तत्तद्द्रव्यसंयोगनिष्पन्नो वातं पित्तं श्लेष्माणं वा येन स्वरूपेण हंति स स्वभावः कथ्यते।१। यथा पुनः स एव मोदकः पक्षं मासं द्विमासं त्रिमासं चतुर्मासादि यावत् यत्तेनैव रूपेण तिष्ठति सा स्थितिः कथ्यते।२। यथा पुनः स एव मोदकः कश्चित्तीव्रोभवति यत् स रसः कथ्यते।३। यथा पुनः स एव मोदकः कश्चित् अल्पदलपरिमाणनिष्पन्नः कश्चित्पुनः बहुदलनिष्पन्नः कश्चिद् बहुतरदलनिष्पन्नः एवं मोदकेषु पुद्गलपरिमाणं स्यात् स प्रदेशः।४। एवं कर्मणां बंधोऽपि चतुः प्रकारो ज्ञातव्यः। तथाहि-कानिचित् ज्ञानावरणीयादीनि कर्माणि ज्ञानं दर्शनं चारित्रं वा घ्नंति येन स्वभावेन स प्रकृतिबंधः प्रोच्यते। तान्येव पुनः कर्माणि कानिचित् जघन्यतः अंतर्मुहूर्तस्थितिकानि भवंति उत्कृष्टतश्च कानिचित् विंशति कोटाकोटिसागरोपमप्रमाणस्थितिकानि भवंति।



For Private and Personal Use Only

कानिचित् त्रिंशत्कोटाकोटीसागरप्रमाणस्थितिकानि भवंति, कानि पुनः सप्ततिकोटाकोटीसागर प्रमाणस्थितिकानि भवंति। एवं यावंतं कालं बद्धानि कर्माणि तिष्ठंति स स्थितिबंधः कथ्यते। तेषामेव पुनः कर्मणां केषांचिन्मधुररसः स्यात् केषांचित् कटुकरसः स्यात् केषां पुनस्तीव्ररसः स्यात् स रसबंधः कथ्यते। तेषामेव पुनः कर्मणां तत्तत्पुद्गलपरिमाणं भवति स प्रदेशबंधः कथ्यते। एवमष्टमं बंधतत्त्वं व्याख्यातम्।

## अथ नवमं मोक्षतत्त्वं व्याख्यानयति

**संतपयपरूवणया, दव्वपमाणं च खित्तफुसणा य। कालो अ अंतरं भाग, भावे अप्पा बहुं चेव ॥३२॥**

संतपय इति मोक्षतत्त्वस्य नवभेदा भवंति। ते च एवं ज्ञातव्याः। सत्पद प्ररूपणा १ द्रव्यप्रमाणं २ क्षेत्रप्रमाणं ३ स्पर्शना ४ कालः ५ अंतरं ६ भागः ७ भावः ८ अल्पबहुत्वं ९।

### अथ एतेषांनवानां मोक्षतत्त्वभेदानां स्वरूपं प्ररूपयति।

**संतं सुद्धपयत्ता, विज्जंतं खकुसुमव्व न असंतं। मुक्खत्ति पयं तसउ, परूवणा मग्गणा ईहिं ॥ ३३ ॥**

संतं सुद्ध इति-सतमितिसत् विद्यमानंमोक्ष इति पदं। मोक्ष इति नाम कस्माद्धेतोः। शुद्ध पदत्वात् असंयुक्तपदत्वात् एकपदत्वादित्यर्थः। खकुसुमवत् आकाशपुष्पवत् न असंतं न असत् अविद्यमानं। अयं भावः सकलेऽपि जगति यस्य यस्य पदार्थस्य एकपदं नाम भवति स स पदार्थः अस्त्येव यथा घटपटलकुटादि। एवं मोक्षस्यापि मोक्षइति एकपदं नाम अतः ॥१३॥

कारणात् मोक्षोऽस्त्येव । (न) पुनः आकाशकुसुमस्य एकपदं नाम नास्ति किंतु द्विपदं नामास्ति । यत् यत् वस्तु द्विपदनाम वाच्यंभवति तत् तत् एकांतेन विद्यमानं न भवति । किंतु किंचित् गोश्रृंगमहिषश्रृंगादिवत् विद्यमानं किंचित् पुनः खरश्रृंग –अश्वश्रृंग–आकाशकुसुमादिवत् अविद्यमानं । मोक्षइति पदं पुनः एकपदत्वात् अस्त्येव । अनेन अनुमानप्रमाणेन मोक्षो विद्यमानोऽस्ति इति सिद्धयते । तत्र मोक्षस्य सत्पदरूपस्य प्ररूपणा विचारणा गत्यादिमार्गणाद्वारा एव विधीयते ।३३।

**तां सत्पदप्ररूपणां एतास्वेव प्ररूपयति ।**

**नरगइ पणिंदि तस भव, सन्नि अहक्खाय खइअ सम्मत्ते। मुक्खोणाहारकेवल, दंसणनाणे न सेसेसु ॥३४॥**

नरगइ इति–गतिः नरकगतिः तिर्यग्गतिः मनुष्यगतिः देवगतिः तत्र मनुष्यगतौ मोक्षो भवति न शेषगतित्रयेऽपि ।१। इंद्रियमार्गणास्थानं पंचधा एकेंद्रियादिभेदात् ज्ञातव्यं यत्र पंचेंद्रियद्वारे मोक्षो भवति एकेंद्रियादि चतुष्टये न भवति ।२। कायमार्गणास्थानं षड्विधं पृथ्वीकाय–अप्काय–तेजःकाय—वायुकाय—वनस्पतिकाय—त्रसकायभेदै ज्ञातव्यं । तत्र त्रसकायवर्त्तिनो जीवा योग्यतायां मोक्षं यांति शेषपंचकायस्था जीवा मोक्षं न यांति ।३। भवसिद्धिकमार्गणा स्थानं द्विधा ।४। भवसिद्धिका अभवसिद्धिकाश्च । तत्र भवसिद्धिकाः भव्या एतद्विपरीता अभवसिद्धिकाः । तत्र भवसिद्धिका मोक्षं यांति अभवसिद्धिकास्तु न सिद्धयंति । संज्ञिमार्गणा स्थानं द्विधा संज्ञिनः असंज्ञिनश्च ।५। तत्र संज्ञिनां मोक्षो भवति न असंज्ञिनां । चारित्रमार्गणास्थानं पंचधा–सामायिकचारित्रं १ छेदोपस्थापनीयं २ परिहारविशुद्धिकं ३ सूक्ष्मसंपरायं ४ यथाख्यातचारित्रं ५

तत्र प्रथमचरमतीर्थंकरतीर्थवर्त्तिसाधूनां सामायिकं द्विधा देशसामायिकं सर्वसामायिकं । तत्र देशसामायिकं श्रावकाणां भवति । सर्वसामायिकं यावज्जीवं सर्वसावद्यव्यापार निषेधरूपं । इदं सर्वं तीर्थवर्त्तिसाधूनां । १ द्वितीयं छेदोपस्थापनीयं तच्च प्रथमचरमतीर्थंकरतीर्थवर्त्तिसाधूनां पूर्वपर्यायच्छेदनं पंचमहाव्रतेषु उपस्थापनरूपं । २ तृतीयं परिहारविशुद्धिकं तत् नव साधूनां समुदायेऽष्टादशमासान् यावत्तपो विशेषरूपं पश्चात् जिनकल्पं प्रतिपद्यते स्थविरकल्पिकं वा । ३ चतुर्थं सूक्ष्मसंपरायं ईषन्मात्रसंज्वलनलोभाणुमात्रोपशमरूपं दशमगुणस्थानवर्ति साधूनां भवति । ४ पंचमं यथाख्यातं सर्वमोहनीयाष्टाविंशति प्रकृतीनां षोडशकषाय नवनोकषाय मिथ्यात्वमिश्र सम्यक्त्व त्रिपुंजरूपाणां उदयभावाद् भवति । ५ तत्र यथाख्यात-चारित्रेण मोक्षो भवति न शेषचतुश्चारित्रेषु । सम्यक्त्वमार्गणास्थानं पंचधा । औपशमिकं १ सास्वादनं २ क्षायोपशमिकं ३ वेदकं ४ क्षायिकं ५ । तत्र औपशमिकं सम्यक्त्वे एवं लाभः स्यात् । ज्ञानावरणीय–दर्शनावरणीय–वेदनीय–अंतरायकर्मणां त्रिंशत्कोटाकोटी सागरोपमस्थितिप्रमाणानां एकोनत्रिंशत्कोटाकोटीसागरोपमस्थितेः क्षयात् मोहनीयकर्मणः सप्ततिकोटाकोटीसागरोपमस्थिति-कस्य एकोनसप्ततिकोटाकोटीसागरोपमस्थितेः क्षयात् नामगोत्रयोर्विंशतिकोटाकोटीसागरोपमप्रमाणयोरेकोनविंशतिकोटाकोटी-सागरोपमस्थितेः क्षयात् तेषां एकैक कोटाकोटीसागरोपमस्थितिमध्यप्रतिष्ठानां यथाप्रवृत्तिकरणेन निबिडरागद्वेषपरिणामरूपौ दुर्भेदौ ग्रंथिदेशौ प्राप्तोजीवः अपूर्वकरणेन ग्रंथिदेशं भिनत्ति । समयं समयं प्रति अनंतविशुद्धया विशुद्धमानो जीवः तत्र अंतरकरणेन मिथ्यात्वस्थितिरेककोटाकोटिसागरोपमस्थितिप्रमाणस्य स्थितिद्वयं करोति । प्रथमा स्थितौः अंतर्मुहूर्त्तिकी द्वितीया तदूना शेषस्थितिः । प्रथमस्थितौ प्रतिसमयं मिथ्यात्वपुद्गलान् अनुभवन् क्षीणायां सत्यां अंतरकरणस्य आद्यसमय एव औपशमिक-



For Private and Personal Use Only

सम्यक्त्वं लभते जीवः। तत् अपौद्गलिकं ज्ञेयं अंतर्मुहूर्त्तकालं यावद्भवति। या द्वितीया स्थितिः मिथ्यात्वस्य वर्त्तते तत्र पुंजत्रयं करोति शुद्धं अर्द्धविशुद्धं अशुद्धं च। यथा कोद्रवाणां गोमयपानीयादिभिः उत्तारित मदनभावानां शुद्धपुंजं। अर्द्धोत्तारितः अर्द्धशुद्धपुंजः। अनुत्तारितमदनानां अशुद्धः पुंजः। एवं मिथ्यात्वदलिकस्यापि क्षपितमिथ्यात्वानुभावस्य यः पुंजः स शुद्धः। क्षायोपशमिकसम्यक्त्वरूपः कथ्यते। यः अर्द्धशुद्धपुंजः स मिश्रः कथ्यते। योऽशुद्धपुंजस्तन्मिथ्यात्वं। तत्र औपशमिक-सम्यक्त्वकालस्य जघन्यतः एकसमयशेषे उत्कृष्टतः षडावलिकाशेषे अनंतानुबंध्युदयो भवति। येन औपशमिकसम्यक्त्वं कलुषीभवति। तदा सम्यक्त्ववमनकाले सास्वादनं भवति। २ पूर्वोक्तपुंजत्रयमध्ये यदा शुद्धपुंजोदयस्तदा क्षायोपशमिकसम्य-क्त्वं भवति। ३ पुंजत्रयमध्ये क्षपणकाले क्षपणसमये वेदकसम्यक्त्वं भवति। ४ क्रोधमानमायालोभानां अनंतानुबंधिनां चतुर्णां क्षये मिथ्यात्वमिश्रपौद्गलिकसम्यक्त्वक्षयरूपपुंजत्रयक्षायिकं सम्यक्त्वं लभते जीवः तदपि अपौद्गलिकं। ५ तत्र क्षायिक सम्यक्त्वे भवति मोक्षः न शेषसम्यक्त्व चतुष्टये। अनाहार मार्गणा स्थानं द्विधा आहारक-अनाहारक भेदात्। तत्र अनाहारकस्य मोक्षो भवति न आहारकस्यापि। ज्ञानामार्गणास्थानं पंचधा मतिज्ञान १ श्रुतज्ञान २ अवधिज्ञान ३ मनःपर्यवज्ञान ४ केवलज्ञान ५ भेदात्। तत्र केवलज्ञाने मोक्षो भवति न शेष ज्ञानचतुष्टये। दर्शन मार्गणास्थानं चतुर्द्धा चक्षुर्दर्शन १ अचक्षुर्दर्शन २ अवधिदर्शन ३ केवलदर्शन ४ भेदात्। तत्र केवलज्ञाने मोक्षो भवति न शेषदर्शनत्रयेऽपि। इति सत्पद प्ररूपणाद्वारं व्याख्यातं।

अथातः परं द्रव्यप्रमाणं कथ्यते।

**दव्वपमाणे सिद्धा-णं जीव दव्वाणि हुंति णंताणि। लोगस्स असंखिज्जे, भागे इक्को य सव्वेवी ॥३५॥**



For Private and Personal Use Only

दव्व इति द्रव्यप्रमाण द्वारे चिंत्यमाने सिद्धानां जीवद्रव्याणि अनंतानि भवंति । इति द्रव्यप्रमाणं द्वारं समाप्तं ।

क्षेत्रद्वारे चिंत्यमाने लोकाकाशस्य असंख्येयतमे भागे एकः सिद्धो वर्त्तते । सर्वे वा सिद्धा लोकाकाशस्य असंख्येयतमे भागे वर्त्तंते । परं एकसिद्धव्याप्तक्षेत्रापेक्षयासर्वसिद्धव्याप्तक्षेत्रमधिकप्रमाणं । इति क्षेत्रद्वारं समाप्तम् ।

अथ स्पर्शनादि द्वारत्रयं कथ्यते ।

फुसणा अहिआ कालो, इग सिद्ध पडुच्च साइ ओणंतो । पडिवाया भावाओ, सिद्धाणं अंतरं नत्थि ॥३६॥

फुसणा इति क्षेत्रात् स्पर्शना अधिका । यथा एकस्मिन् आकाशप्रदेशे स्थितस्य परमाणोः सप्त आकाशप्रदेशस्य स्पर्शना भवंति । एवं सिद्धानामपि क्षेत्रात् स्पर्शना अधिका भवति । एवं स्पर्शनाद्वारं व्याख्यातं । अथ कालद्वारं व्याख्यायते । एकं सिद्धं प्रतित्य आश्रित्य कालः सादिः अनंतश्च वर्त्तते । सर्वं सिद्धानाश्रित्य कालः अनादिः अनंतः । यत्र ये केचन सिद्धाः यदा सिद्धा स्तदा तेषां आदिः तदनु प्रतिपाताभावात् अंतो न भवति । एवं कालद्वारं व्याख्यातं । अथ अंतरद्वारं कथयते । अप्रतिपातस्य अभावात् सिद्धानां अंतरं नास्ति । यतः अंतरं तदुच्यते यत् तं भावं प्राप्य पुनरन्यत्र गत्वा पुनरपि स एव भावः प्राप्यते । एवं विधं अंतरं सिद्धानां नास्ति । प्रतिपाताभावात् । एवं अंतरद्वारं समाप्तम् ।

अथ भागादिद्वारद्वयं लिख्यते ।

सव्वजियाणमणंते, भागे ते तेसिं दंसणं नाणं । खइएभावे परिणामिए अ पुण होइ जीवत्तं ॥३७॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सव्वजियाण इति सर्वजीवानां अनंततमे भागे वर्त्तते सर्वेऽपि द्वारसिद्धाः। एवं भागद्वारं समाप्तं। अथ भावद्वारं लिख्यते। तेषु सिद्धेषु केवलज्ञानं केवलदर्शनं च क्षायिके भावे वर्त्तते। पारिणामिके भावे जीवितव्यं वर्त्तते।

एवं भावद्वारं समाप्तं।

## अथ अल्पबहुत्वद्वारं लिख्यते

**थोवा नपुंससिद्धा, थी नर सिद्धा कमेण संखगुणा। इअ मुक्ख तत्तमेअं, नव तत्ता लेसओ भणिओ ॥३८॥**

थोवा इति—मोक्षगमनभवे नपुंसकत्वं अनुभूय ये सिद्धाः ते स्तोकाः, जन्म नपुंसकनां चारित्रमपि न भवति कुतो मोक्षगमनं। एते नपुंसका ये पश्चात् वर्द्धितादि विशेषेण कृतास्ते ज्ञेयाः। नपुंसकसिद्धेभ्यः स्त्रीवेदमनुभूय ये सिद्धास्ते संख्यातगुणाः। स्त्रीसिद्धेभ्योऽपि ये पुरुषवेदमनुभूय सिद्धास्ते संख्यातगुणाः। इति अल्पबहुत्वद्वारं समाप्तम्। एतावता ग्रंथेन संतपयपरूवणयेत्यादि गाथा सकलापि व्याख्याता ज्ञेया। इति **मोक्षतत्त्वमेतत् ज्ञातव्यम्।** मोक्षतत्त्वभणनेन नवतत्त्वानि लेशतो भणितानि ज्ञातव्यानि।

## अथ नवतत्त्वपरिज्ञान फलमाह

**जीवाइनवपयत्थे, जो जाणइ तस्स होइ सम्मत्तं। भावेण सद्दहंतो, आयाणमाणेवि सम्मत्तं ॥ ३९ ॥**

जीवाइ—इति जीवादि नव पदार्थान् यो जानाति श्रद्धते च भवति सम्यक्त्वं। भावेन "**तमेव सच्चं नीसंकं जं**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिणेहिं पवेईयं" इत्यादि शुभात्मपरिणामरूपेण श्रद्धाति कोऽर्थः श्रद्धानं कुर्वंति। जीवादिपदार्थज्ञानरहितेऽपि जीवे सम्यक्त्वं भवति।

अथ सम्यक्त्वस्वरूपं कथयति।

सव्वाइजिणेसर भासिआइं वयणाइ नन्नहा हुंति। इय बुद्धि जस्स मणे, सम्मत्तं निच्चलं तस्स ॥ ४० ॥

सव्वाइ-इति सर्वाणि जिनेश्वरभाषितानि वचनानि न अन्यथा भवंति। इति बुद्धिर्यस्य मनसि सम्यक्त्वं निश्चलं तस्य भवति।

अथ सम्यक्त्व फलमाह

अंतो मुहुत्त मित्तं, पि फासिअं हुज्ज जेहिं सम्मत्तं। तेसिं अवड्ढपुग्गल परिअट्टो चेव संसारो ॥ ४१ ॥

अंतो मुहुत्त-इति अंतर्मुहूर्त्तमपि कालं यैः सम्यक्त्वं स्पष्टं भवति। तेषां अपार्द्धः अर्द्धपुद्गलपरावर्त्तरूपः संसारो भवति। आशातना बहुलानामपि न अधिकसंसारः स्यात्। शुद्ध सम्यक्त्वाराधनेन केचन तेनैव भवेन सिद्ध्यंति केचन तृतीयसप्ताष्ट-भवान्नातिक्रामंति किंतु सिद्धत्वं शीघ्रं प्राप्नुवन्ति।

अथ पुद्गलपरावर्त्तस्वरूपमाह।

उस्सप्पिणी अणंता, पुग्गलपरिअट्टओ मुणेअव्वो। तेणंताती अद्धा, अणागयद्धा अणंतगुणा ॥ ४२ ॥

( अवचूरि नास्ति )



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

### अथ सिद्धानां पंचदश भेदान् कथयति

जिण अजिण तित्थ तित्था, गिहि अन्न सलिंगथी नर नपुंसा।
पत्तेय सयंबुद्धा, बुद्धबोहिय इक्कणिक्काय ॥४३॥

जिण–इति तीर्थंकराः संतो ये सिद्धाः ते तीर्थंकर सिद्धाः। अतीर्थंकर सिद्धाः सामान्यकेवलिनः। अतीर्थसिद्धाः भगवती मरुदेव्यादिवत्। स्वलिंगे रजोहरणादिरूपे व्यवस्थिताः संतो ये सिद्धास्ते स्वलिंग सिद्धाः। तदा अन्यलिंगे पारिव्राजकादिसंबंधिनि वल्कलचीर्यादिवत् द्रव्यलिंगेसिद्धाः ते अन्यलिंगसिद्धाः। यथा अन्यलिंगिनां भावतः सम्यक्त्वादिप्रतिपन्नानां केवलज्ञानं प्रतिपद्यंते तदान्यलिंगत्वंद्रष्टव्यं अन्यथा यदि दीर्घमायुष्कमात्मनः पश्यंति ज्ञानेन ततः साधुलिंगमेव प्रतिपद्यंते। तथा स्त्रिया लिंगं वेदः शरीर निर्वृत्तिवेदे सति सिद्धाभावात् तस्मिन् स्त्रीलिंगे वर्त्तमानाः संतो ये सिद्धाः प्रत्येकबुद्धवर्जिताः केचित् स्त्रीलिंग सिद्धाः। तथा पुरुषलिंगे शरीरनिर्वृत्तिरूपे व्यवस्थिताः संतो ये सिद्धाः ते पुरुषलिंगसिद्धाः। तथा नपुंसकलिंगे वर्त्तमानाः संतो ये सिद्धास्ते नपुंसकलिंगसिद्धाः। गृहस्थाः संतो ये सिद्धास्तेगृहस्थसिद्धाःभरतादयः। प्रत्येकं किंचिद् वृषभादिकं अनित्यतादिभावना कारणं वस्तु बुद्धा बुद्धवंतः परमार्थमिति प्रत्येकबुद्धाः संतो ये सिद्धाः ते प्रत्येकबुद्धाः। तथा एकैकसमये एकैकावसंतो ये सिद्धास्ते एकसिद्धाः। एकसमयेऋषभादिअष्टशतोत्तराःसेधनादनेकसिद्धाः। बुद्धा आचार्याः तैर्बोधिता ये सिद्धाः ते बुद्धबोधित सिद्धाः। इति पंचदशभेदाः

इति नवतत्त्वावचूरी समाप्ता।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सावचूरीकम्

# श्री नवतत्त्वप्रकरणम्

## ॥ समाप्तम् ॥

वि. सं. २०४२ 卐 वीर सं. २५१२ 卐 नेमि सं. ३७



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# * प....रि....शि....ष्ट.... *

नवतत्त्वना जीव–अजीव, रुपी अरूपी भेदोनी संख्यानो तथा हेयादिमां क्या तत्त्वना केटला उत्तरभेद प्राप्त थाय छे ते जाणवानो यन्त्र :–

| तत्त्वना नाम | २७६ भेदमां जीव–अजीव | २७६ भेदमां रूपी–अरूपी | २७६ भेदमां हेय ज्ञेय उपादेय |
|---|---|---|---|
| (१) जीव तत्त्व.... | १४ – ० | १४ – ० | ० – १४ – ० |
| (२) अजीव तत्त्व.... | ० – १४ | ४ – १० | ० – १४ – ० |
| (३) पुण्य तत्त्व.... | ० – ४२ | ४२ – ० | ० – ० – ४२ |
| (४) पाप तत्त्व.... | ० – ८२ | ८२ – ० | ८२ – ० – ० |
| (५) आश्रव तत्त्व.... | ० – ४२ | ४२ – ० | ४२ – ० – ० |
| (६) संवर तत्त्व.... | ५७ – ० | ० – ५७ | ० – ० – ५७ |
| (७) निजरा तत्त्व.... | १२ – ० | ० – १२ | ० – ० – १२ |
| (८) बन्ध तत्त्व.... | ० – ४ | ४ – ० | ४ – ० – ० |
| (९) मोक्ष तत्त्व.... | ९ – ० | ० – ९ | ० – ० – ९ |
| | ९२ – १८४ | १८८ – ८८ | १२८ – २८ – १२८ |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राजनगरमंडन श्रीमूलेवापार्श्वनाथाय नमः ॥

॥ शासनप्रभावक श्रीवृद्धि-नेमि-उदयसूरीश्वरेभ्यो नमः ॥

स्वोपज्ञावचूर्णि-श्रीरूपचन्द्रमुनिविनिर्मितविवृत्यलङ्कृतं

श्रीगजसारमुनिप्रणीतं-

# ॥ श्री दण्डकप्रकरणम् ॥

( विभागः ३ )

(अव०) श्रीवामेयं महिमामेयं, प्रणिधाय बालधीगम्यम् । स्वोपज्ञं कुर्वेऽहं, विचारषट्त्रिंशिकासूत्रम् ॥१॥

इह चतुर्विंशतिदण्डकेषु प्रत्येकं संक्षिप्तसंग्रहणी २४ पदानामवतारणं चिकीर्षितम्, तच्चार्हद्विज्ञप्तिद्वारा प्रकटयन्नाह सूत्रकृत्-

नमिउं चउवीसजिणे, तस्सुत्तवियारलेसदेसणओ ।
दण्डगपएहिं ते च्चिय, थोसामि सुणेह भो भव्वा ! ॥१॥

(अ०) नत्वा मनोवाक्कायैः प्रह्वीभूय, कान्?, चतुर्विंशतिजिनान्, अत्र भरते साम्प्रतीनाऽवसर्पिणीमाश्रित्य, अन्यथाऽतीतानागतकालपञ्चदशकर्मभूमीश्च प्रतीत्य जिनबहुत्वापत्तेः । अहं तानेव जिनान्, स्तोष्ये । कुतः?, तेषां सूत्रमागमो



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिनागमस्तच्चेह "सरीरमोगाहणा य संघयणा सण्णेत्यादिरूपं" तस्य विचारो विचारणं तस्य लेशस्तस्य देशनतः कथनतः। कैः सह ?, श्रीभगवत्यादिगाथाक्रमनिबद्धदण्डकसंज्ञित २४ जीवस्थानैः, श्रृणुत भो भव्या इति-"अप्रतिबद्धे श्रोतरि, वक्तुर्वाचः प्रयान्ति वैफल्यम्" इतिवचनात् श्रोतृसम्मुखीकरणार्थम् ॥१॥ अथ दण्डकमाह—

(टीका) प्रणम्य परया भक्त्या, जिनेन्द्रचरणाम्बुजम्। लघुसङ्ग्रहणीटीकां, करिष्येऽहं मुदा वराम् ॥१॥

नमि० चतुर्विंशतिजिनान् नत्वा-अभिनम्य चतुर्विंशतिदण्डकैः कृत्वा तानेव-जिनानेवादिनाथप्रभृतीनहं स्तोष्यामि-स्तवीमीत्यर्थः। कस्मात्? तस्सुत्तत्ति 'तत्सूत्रविचारलेशदेशनतः' तेषां-भगवतां सूत्रं-सिद्धान्तस्तत्सूत्रं तत्सूत्रस्य विचारस्तत्सूत्रविचारः तत्सूत्रविचारस्य लेशो-लवः तत्सूत्रविचारलेशः तत्सूत्रविचारलेशस्य देशनं-कथनं तस्मात् इति तत्सूत्रविचारलेशदेशनतः 'भो भव्वा!' भो भविक,! यूयं श्रृणुत-श्रवणविषयं कुरुत इत्यर्थः। सुकरत्वाल्लेशतः प्रथमगाथाया व्याख्यानं कृतम् ॥ १ ॥

अथ चतुर्विंशतिदण्डकनामान्याह—

नेरइआ असुराई, पुढवाई बेइंदियादओ चेव।
गब्भयतिरियमणुस्सा वन्तरजोइसियवेमाणी ॥२॥

(अव०) सप्तपृथिवीनैरयिकाणामेको दण्डकः, भवनपतीनामसुरादिदशनिकायभेदाद्दश दण्डकाः, पृथिव्यादीनां पञ्च, ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विकलानां त्रयः, गर्भजतिर्यग्मनुष्यव्यन्तरज्योतिष्कवैमानिकदण्डकाश्चेति सर्वे २४, इह सूक्ष्मा अपर्याप्तकाश्च प्रायो नाधिक्रियन्ते ॥ २ ॥

(टीका) नेरेति० अत्र नैरयिकाः पृथिवीभेदेन सप्तधा ज्ञातव्याः, सप्तविधाः सप्त प्रकारा येषां ते सप्तविधाः। यथा-१ रत्नप्रभा २ शर्कराप्रभा ३ वालुकाप्रभा ४ पङ्कप्रभा ५ धूमप्रभा ६ तमःप्रभा ७ तमस्तमःप्रभा। एतासु भवानां नैरयिकानामेको दण्डको ज्ञेयः। इह हि दण्डकाधिकारत्वात् चतुर्विंशतिस्थानेषु पूर्वगाथोक्तदण्डकशब्दो योजनीयः। असुरकुमारादीनां भवनपतिनिकायभेदेन दश दण्डकाः स्युरित्यर्थः, अस्यन्ति क्षिपन्ति देवान् सुरान् ते असुराः, कुमाराकाराः कुमारवत्क्रीडाप्रियत्वाच्च कुमाराः, ते च ते कुमाराश्च असुरकुमाराः। ते आदौ येषां ते असुरकुमारादयः। तेषां दशप्रकारत्वाद्दश दण्डकाः स्युरित्यर्थः तथा पृथिव्यादीनां पृथिव्यप्तेजोवायुवनस्पतिनिकाय भेदानां पञ्च दण्डका स्युः। द्वीन्द्रिया आदौ येषां ते द्वीन्द्रियादयः। तत्र (द्वे) शरीररसनालक्षणे इन्द्रिये येषां ते द्वीन्द्रियाः। यथा—शङ्खकपर्देत्यादयः। त्रीणि शरीररसनाघ्राणलक्षणानि इन्द्रियाणि येषां ते त्रीन्द्रियाः। यथा-पिपीलिकामत्कुणेत्यादयः। चत्वारि शरीररसनाघ्राणचक्षुर्लक्षणानि इन्द्रियाणि येषां ते चतुरिन्द्रियाः। यथा—मक्षिकाभ्रमरपतङ्गवृश्चिकेत्यादयः। एवं द्वित्रिचतुरिन्द्रियैः कृत्वा दण्डकास्त्रयो जाताः स्युरित्यर्थः। गर्भे भवाः गर्भजाः ते च ते तिर्यञ्चश्च मनुष्याश्च गर्भजतिर्यग्मनुष्यास्तेषां द्वौ दण्डकौ स्यातामित्यर्थः। तथा विविधमन्तरं वनान्तरादिकमाश्रयतया येषां ते व्यन्तराः यद्वा भृत्यवच्चक्रवर्त्याराधकत्वेन विगतोऽन्तरं विशेषो मनुष्येभ्यो येषां ते तथा, वनानामन्तरे भवाः पृषोदरादित्वान्मागमः वानमन्तराः तेषामेको दण्डकः स्यात्। ज्योतिष्काणां चन्द्रसूर्यग्रहनक्षत्रताराणामेको दण्डको ज्ञेयः। वैमानिका-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नामेको दण्डकः । ते च द्विधा–कल्पोपपन्नाः कल्पातीताश्च । तत्र कल्पः स्थितिर्जीत मर्यादेत्येकार्थाः । स च इन्द्रतत्समानिका-दिव्यवस्थारूपस्तं प्रतिपन्ना कल्पोपपन्नाः ग्रैवेयकानुत्तरवासिनस्तु कल्पातीताः, तेषां सर्वेषामप्यहमिन्द्रत्वात् । विमान्ति वर्त्तन्तेऽस्मिन् देवा इति विमानं तत्र भवा वैमानिकाः । नैरयिकादिवैमानिकान्ता एते चतुर्विंशतिदण्डकाः ज्ञातव्याः । अत्र चकारः समुच्चयार्थः एवशब्दो ग्राह्यः । अत्र गाथायां दण्डकशब्दोऽनुक्तोऽपि दण्डकशब्दो ग्राह्यः । अत्र दण्डक शब्देन किमुच्यते ? तदाह—तज्जातीयसमूहप्रतिपादकत्वं ज्ञेयमित्यर्थः । संक्षेपतो गाथाद्वितीयस्य (द्वितीयगाथायाः) व्यथाख्यानं विहितं । इह सूक्ष्मा अपर्याप्ताश्च प्रायो नाधिक्रियन्ते ॥ २ ॥

अथ चतुर्विंशतिद्वारेषु गाथाद्वयेन शरीरादिवरूपवक्तव्यमाह–

**संखित्तयरी उ इमा, सरीरमोगाहणा य सङ्घयणा । सन्नासंठाणकसाय, लेसिन्दियदुसमुग्घाया ॥ ३ ॥**
**दिट्ठीदंसणनाणे, जोगुवओगोववायचवणठिई । पज्जत्तिकिमाहारे, सन्निगइआगई वेए ॥ ४ ॥**

(अव०) गाथाद्वयं लघुसंग्रहणीसत्कमिहैषामेव पदानां विचारणीयत्वात् षट्त्रिंशिकायां लिखितम्, व्याख्यालेशश्च यथा–स्वाभाविकशरीरं च पञ्चधा, औदारिकवैक्रियाहारकतैजसकार्मणभेदात् ।१। एषां चावगाहनोच्छ्रयमानं जघन्यमध्यमोत्कृष्टभेदात् त्रिधा ।२। कार्मग्रन्थिकाभिप्रायेण अस्थिरचनाविशेषः संहननं तच्च षोढा–वज्रऋषभनाराच १ ऋषभनाराच २ नाराचा ३ र्धनाराच ४ कीलिका ५ सेवार्त्त ६ भेदात्, संहननादिलक्षणं तल्लक्षणशास्त्रादवसेयम् ।३। संज्ञा चतस्रः—आहार–भय–परिग्रह–मैथुनलक्षणाः,



For Private and Personal Use Only

दश वा एतास्ते च चतुष्कषायसंज्ञा ४ लोकसंज्ञा १ ओघसंज्ञा २ क्षेपात् ।४। समचतुरस्र १ न्यग्रोध २ सादि ३ वामन ४ कुब्ज ५ हुंडक ६ भेदानि संस्थानि ।५। कषायाश्चत्वारः ।६। लेश्याः षट्-कृष्ण १ नील २ कापोत ३ तैजस ४ पद्म ५ शुक्ल ६ रूपाः परमत्र ता द्रव्यरूपा अवस्थिता विचार्याः न भावरूपाः ।७। इन्द्रियाणि पञ्च ।८। द्वौ समुद्घातौ-समवहननमात्मप्रदेशविकरणं समुद्घातः स चाजीवविषयोऽचित्तमहास्कन्धरूपः, नोजीवविषयः सप्तधा, 'वेयण १ कसाय २ मरणे ३, वेउव्विय ४ तेउए य ५ आहारे ६ । केवलिए चेव भवे, जीवमणुस्साण सत्तेव ॥१॥'' त्ति ।९। दृष्टिस्त्रिधा-मिथ्यात्वसास्वादनमिश्रभेदात् ।१०। दर्शनं-चक्षुरचक्षुरवधिकेवलभेदाच्चतुर्विधम् ।११। ज्ञानं मतिश्रुतावधिमनःपर्यायकेवल भेदात् पञ्चधा ।१२। अत्र ज्ञानसाहचर्यादनुक्तमप्यज्ञानं ग्राह्यम् । तच्च त्रिधा मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानरूपम् । १३ । योगाः पञ्चदश, मनोयोगश्चतुर्धा, औदारिकौ १ दारिकमिश्र २ वेक्रिय ३ वैक्रियमिश्रा ४ हारका५ हारकमिश्र ६ तैजसकार्मणरूप ७ सप्तधा काययोगभेदेन ।१४। उपयोगो द्विधा, तत्र ज्ञानाज्ञानभेदाष्टकरूपः साकारोपयोगः, चतुर्भेददर्शनरूपोऽनाकारोपयोगः, संयोगे द्वादश ।१५। एकसमये उत्पद्यमानानां च्यवमानानां सङ्ख्येति द्वारद्वयं ।१६। ।१७। स्थितिरायुषो जघन्योत्कृष्टमानं ।१८। आहारादिग्रहणशक्तयः पर्याप्तयस्ताश्चषट् आहार १ शरीरे २ न्द्रिय ३ श्वासोच्छ्वास ४ भाषा ५ मनः ६ स्वरूपाः ।१९। के जीवाः कतिभ्यो दिग्भ्य आगतमाहारद्रव्याहारयन्तीति किमाहारद्वारं ।२०। विशिष्टाः संज्ञास्तिस्रः । यया त्रिकालमर्थं जानाति सा दीर्घकालिकी संज्ञा मनस्कानामेव १, यश्च देहपालना-हेतोरिष्टवस्तुषु प्रवर्त्तते अहिताच्च निवर्त्तते वर्त्तमानकालविषयं च चिन्तनं यस्य तस्य हेतुवादोपदेशसंज्ञा द्वीन्द्रियादीनामेव २, यश्च सम्यग्दृष्टिः क्षायोपशमिकज्ञानयुक्तो यथाशक्ति रागादिनिग्रहपरस्तस्य दृष्टिवादोपदेशिकी संज्ञा ३ ।२१। गतिर्भवान्तरगमनं ।२२।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आगतिः परभवात्, ।२२। वेदश्च स्त्रीपुंनपुंसकभेदात् ।२४। ॥३-४॥ अथैतानि द्वाराणि २४ दंडकेऽवतारयति-

(टीका)—सङ्खित्त० दिट्ठी० गाथाद्वयस्य व्याख्यानं सुकरमपि तु पुनः किमपि क्रियते-मयेति कर्तृपदं बहिर्गम्यं। संक्षिप्ततरा तु संग्रहणी इयं शरीरादिचतुर्विंशतिद्वारात्मिका। तत्र शरीराणि पञ्च औदारिकादीनि। शीर्य्यते इति शरीरः विनाशकारित्वात् (विनाशित्वात्)। पुंक्लीबलिङ्गः। अवगाहन्ते अवतिष्ठन्ते जीवा अस्यामिति अवगाहना। संहन्यन्ते दृढीक्रियन्ते शरीरपुद्गला येन तत् अथवा संहन्यन्ते संहति विशेषं प्राप्यन्ते शरीरावस्थावयवा यैस्तानि संहननानि। तानि (च) वज्रर्षभनाराचादिभेदात् षोढा। संस्थानं द्वेधा, जीवानां अजीवानां च। संतिष्ठन्ते प्राणिनोऽनेनाकार विशेषेणेति संस्थानं तच्च षोढा समचतुरस्रन्यग्रोधसादिवामनकुब्जहुंडभेदं संस्थानानि भवन्ति। द्वितीयं तु अजीवानां रूपिणां पञ्चधा संस्थानं यथा-परिमण्डल वृत्तं त्र्यस्रं चतुरस्रमायतं च। इह तु जीवानां संस्थाने (न) प्रयोजनमित्यर्थः। संज्ञाश्चतुर्धा दशधा वा भवन्ति। चत्वारः प्रकारा यासां ताः। अथवा दश प्रकारा यासां ताः। यथा-आहारभयपरिग्रहमैथुनभेदाच्चतुर्धा। (पूर्वोक्तभेदचतुष्क) क्रोधमानमायालोभओघलोकभेदाच्चेति दश संज्ञाः स्युरित्यर्थः। तथा ग्रन्थान्तरोक्ताः सुखदुःखमोहधर्मरूपाश्चतस्रः एतास्वेवान्तर्भवन्ति इत्यर्थः (अनया) संजानातीति संज्ञा। कष्यन्ते हिंस्यन्ते प्राणिनोऽस्मिन्निति कषः संसारस्तस्यायो लाभो येभ्यस्ते कषायाः क्रोधादयश्चत्वारोऽप्यनन्तानुबन्ध्यादिभेदेन षोडश भवन्ति। लेश्याः कृष्णाद्याः षोढा स्युः। लिष्यते-श्लिष्यते कर्मणा सह जीवाः आभिरिति लेश्याः। यदुक्तं—"कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः। स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रवर्तते ॥१॥ कृष्णनीलकापोततेजःपद्मशुक्लरूपाः, परमत्र ता द्रव्यरूपा अवस्थिता विचार्या न भावरूपाः। इन्द्रियं श्रोत्रादि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भेदात् पञ्चधा । दुसमुग्घायेति० द्वौ समुद्घातौ जीवाजीवसम्बन्धिनौ भवतः तत्राद्यं जीवसमुद्घातमाह-तथाहि—सम्यक् आत्मनो वेदनादिभिरेकीभावेन उत्प्राबल्येन घातः समुद्घातः । स च सप्तधा, यथा—वेदनाकषायमरणवैक्रियेत्यादि । वेदनादीनां षण्णां मानमन्तर्मुहूर्त्तं स्यात् सप्तमस्तु केवलिसमुद्घातो दण्डादिना लोकव्यापी दण्डादि क्रमेण सकललोकस्य पूरणात्, वालतोऽष्टसामायिकः । द्वितीयस्तु समुद्घातोऽचित्तमहास्कन्धरूपः, स च केवलिसमुद्घातवत् अष्टसामायिकः परमिहानधिकारात्नोक्तं । दिट्ठी० दृष्टिस्त्रिधा, यथा सम्यग्दृष्टिः १ मिथ्यादृष्टिः २ सम्यग्मिथ्यादृष्टिः ३ (च) ॥ दर्शनानि चत्वारि भवन्तिः यथा-चक्षुर्दर्शनं अचक्षुर्दर्शनमवधिदर्शनं केवलदर्शनं (च) घटपटादिपदार्थसार्थसामान्याकारपरिज्ञानं ज्ञातव्यं । पदार्थविशेषाकारपरिज्ञानं पुनर्ज्ञानं ज्ञातव्यम् । अयमेव ज्ञानदर्शनयोर्भेदः । पञ्च ज्ञानानि भवन्ति । यथा पञ्चभिरिन्द्रियैः षष्ठेन मनसा जीवस्य यत् ज्ञानं स्यात् तन्मतिज्ञानं । श्रुतं द्विधा भवति । द्रव्यश्रुतं भावश्रुतं च, यथा-द्रव्यश्रुतं द्वादशाङ्गीरूपं, भावश्रुतं द्वादशाङ्गीसमुत्पन्नोपयोगरूपं । अवधिज्ञानं द्विप्रकारं-भवहेतुकं श्राद्धसाधुतिरश्चां (गुणहेतुकं) च । मनःपर्यायज्ञानं सार्धद्वौ (द्वय) द्वीपसमुद्रस्थितसंज्ञिपञ्चेन्द्रियमनोविषयं द्विभेदं ऋजुमतिविपुलमतिरूपं साधूनामेव भवति । केवलज्ञानं घनघातिकर्म्मचतुष्टयक्षयसमुत्पन्नं सकललोकालोकविषयं । ज्ञानसाहचर्यादत्राप्यनु(त्रानु)क्तमपि त्रिधाऽज्ञानं, यथा-मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानं । सप्त द्वीपसमुद्रान् यावत् विभङ्गज्ञानं तु पश्यति मिथ्यादृष्टीनामेव त्रीण्यज्ञानानि भवन्ति । एतत्सूत्रे नोक्तं बहिर्गम्यं । वाचां मनसां चाग्रतो वक्ष्यमाणाः प्रत्येकं चतुर्धा ( चत्वारो ) योगाः । तथा कायानां योगाः सप्तधा ( सप्त ) सर्वमीलनेन पञ्चदश योगाः स्युरित्यर्थः । उपयोगो द्विधा-तत्र ज्ञानाज्ञानभेदाष्टकरूपाः साकारोपयोगाः (इतरे) चत्वारः, यथा-चक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनकेवलदर्शन-

For Private and Personal Use Only

रुपाः । संयोगे एवं द्वादश उपयोगाः स्युरित्यर्थः । उत्पद्यन्ते ( पपत्तिः ) उपपातः । च्यवन्ते चेति ( च्युतिः ) च्यवनं । जीवानां उपपातच्यवनयोरिहापि सम्बन्धादुपपातच्यवनविषयोर्विरहकाललक्षणं-अपान्तरालकाललक्षणमेकसमयसङ्ख्या चेति गृह्येते इत्यध्याहारः । तिष्ठन्ति नरकादिभवे श्रृङ्खलाबद्धा इव जन्तवः पाप(पुण्य)कर्मपरिणत्या स्थितिरायुर्जीवितमित्येकार्थाः । 'पज्जत्तित्ति' आहारादीनामत्र निर्वृत्तिर्निष्पत्तिर्यतो दलिकाद्-दलभूतात्पुद्गलसमुहाद् भवति तस्य दलिकस्य तामेवाहाराद्य-भिनिर्वृत्तिं स्वस्वविषयपरिणमनरूपां प्रति यत् करणं जीवसम्बन्धिशक्तिरूपं सा पर्याप्तिः । ताश्च षोढा आहुः, यथा—आहारशरीरे-न्द्रियश्वासोच्छ्वासभाषामनःस्वरूपाः । किमाहारेत्ति० किमाहारकोऽनाहारको वा जीवः ? यद्वा किंस्वरूपः सचित्तादि आहारकः ? केन वा शरीरेणाहारोऽस्येति किमाहारः ? । आहरणं आहारः । सन्नीत्ति० विशिष्टा संज्ञास्तिस्रः । यया त्रिकालविषयमर्थं जानाति सा दीर्घकालिकी(क्ये)वसमनस्कानामेव । यश्च स्वदेहपालनहेतोरिष्टवस्तुषु प्रवर्तते अहिताच्च निवर्तते वर्तमानकालविषयं च चेतनं ज्ञानं यस्य तस्य हेतुवादोपदेशिकीसंज्ञा द्वीन्द्रियादीनामेव । यश्च सम्यग्दृष्टिः क्षापोपशमिकज्ञानयुक्तो यथाशक्तिहेयोपादेय-निग्रहपरस्तस्य दृष्टिवादोपदेशिकीसंज्ञा छद्मस्थसम्यग्दृशामेव इति संज्ञात्रिकमवमन्तव्यं । गमनं गतिः । आगमनमागतिः । अथ वेदत्रयमाह-पुंवेदः स्त्रीवेदः नपुंसकवेदः । प्रज्ञापनादिषु विस्तरेणाभिहिताः अर्थाः ततः संक्षिप्य गृह्यन्ते प्रतिपाद्यन्ते-ऽभिधीयन्ते वाऽस्यामिति ग्रहेरणिरित्यौणादिके अणिप्रत्यये ङीप्रत्यये च सङ्ग्रहणीति निष्पन्नं । संक्षेपतो द्वारगाथाद्वयस्य व्याख्यानं कृतमित्यर्थः । अत्र चकारः समुच्चयार्थः ॥ ३ ॥ ४ ॥



For Private and Personal Use Only

अथ चतुर्विंशतिदण्डकेषु चतुर्विंशतिद्वाराणि निरूपयन्नाह—

**चउ गब्भतिरियवाउसु, मणुआणं पंच सेस तिसरीरा। थावर चउगे दुहओ, अंगुलअसंखभागतणू ।।५।।**

(अव०) 'दुव्वयणे बहुवयण-' मिति प्राकृतलक्षणेन गर्भजतिर्यक्वाय्वोश्चत्वारि शरीराणि सम्भवन्ति, सम्भवश्च न भवन्त्येवेति निश्चयः, एवं सर्वत्रापि ज्ञेयम् । आहारकत्यागेन कदाचित्तयोर्वैक्रियकरणेन चतुर्णां सम्भवः, मनुष्याणां पश्चापि । शेषा दण्डकास्त्रिशरीरा औदारिकयुक्ताभ्यां च तैजसकार्मणाभ्यां । १ । स्थावरचतुष्के पृथिव्यप्तेजोवायुरूपे 'दुहतोत्ति' द्वाभ्यां प्रकाराभ्यां जघन्योत्कृष्टरूपाभ्यां अङ्गुलासंख्येयभागानि शरीराणि, यद्यपि वादराणां वाताग्न्यप्पृथिवीनां शरीराणि मिथोऽङ्गुलासङ्ख्येय गुण वृद्धानि तथापि यथोक्तमानान्येव ।।५।।

(टीका)—चउगब्भेत्ति० गर्भजतिर्यग्वाय्वोश्चत्वारि औदारिकवैक्रियतेजसकार्मणलक्षणाणि शरीराणि भयन्ति, भवन्तीत्यध्याहारः । "दुव्वयणे बहुवयणमिति" प्राकृतलक्षणेन ( द्वित्वेऽपि बहुवचनं ) गर्भजतिर्यग्वाय्वोश्चत्वारि शरीराणि सम्भवन्ति, संभव एव न निश्चयेन । आहारकत्यागेन वैक्रियकरणेन च चतुर्णां संभवः । 'मणुआणं प०चेति०' मनुष्याणां पञ्चऔदारिकवैक्रियआहारकतैजसकार्मणलक्षणाः शरीराः स्युः । सेसेति० शेषेषु दण्डकेषु त्रीणि शरीराणि भवन्ति, तान् दण्डकान् विस्तरेणाह—त्रयोदश देवानां सप्तपृथिवीभेदेनैकः नैरयिकाणां सर्वमीलनेन चतुर्दश दण्डकाः जातास्तेषु त्रयो वैक्रियतैजसकार्मणलक्षणाः शरीरा भवन्ति । तथा पृथिव्यप्तेजोवनस्पतीनां चत्वारः पञ्चमो द्वीन्द्रियाणां षष्ठस्त्रीन्द्रियाणां सर्वमीलनेन सप्त दण्डका जातास्तेषु त्रीणि औदारिक-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तैजसकार्मणलक्षणानि भवन्ति। सर्वमीलनेनैकविंशतिर्दण्डका जातास्तेषु त्रीणि शरीराणि भवन्ति इत्ययं भावः। प्रथमं शरीरद्वारं व्याख्यातं। अथावगाहनाद्वारमाह-थावरेति० वनस्पतिं मुक्त्वा स्थावरचतुष्केषु शरीरं द्विधा, यथा जघन्यतः उत्कृष्टतश्चाङ्गुलासङ्ख्येयभागप्रमाणं शरीरं स्यात्, अङ्गुलासंख्यातभागवपुर्मानं स्यादित्यर्थः, परं जघन्यापेक्षया उत्कृष्टमसङ्ख्येयगुणमित्यर्थः ॥ ५ ॥

**सव्वेसिंपि जहन्ना, साहाविय अंगुलस्ससंखंसो। उक्कोस पणसयधणू, नेरइया सत्तहत्थ सुरा ॥ ६ ॥**

(अव०) शेषाणां सर्वेषां विंशतिदण्डकजीवानां स्वाभाविकस्य मौलस्य शरीरस्य जघन्यावगाहना अङ्गुलस्यासङ्ख्यातो भागः। उत्कृष्टतः पञ्चशतधनुरुच्चा नैरयिकाः, सुराः सप्तहस्तोच्चाः ॥ ६ ॥

(टीका)-सव्वेसिंपि जहन्नेति० पृथिव्यप्तेजोवायून् स्थावरचतुष्कान् संत्यज्य विहाय सर्वेषामपि विंशतिदण्डकानां स्वभावतो जघन्याङ्गुलासंख्यातभागतनुः स्यात्। सर्वनिकृष्टं वपुर्मानं स्यादित्यर्थः। अथ उत्कृष्टदेहमानमाह-उक्कोस पणसयेति० सप्तम्यां माघवत्याख्यायां नरकपृथिव्यां धनुःपञ्चशतप्रमाणवपुषः पञ्चशतकोदण्डशरीरमानाः नैरयिकाः जीवाः स्युः, स्युरित्यध्याहारः। ततोऽर्द्धार्द्धं (र्धार्धो) ना ज्ञेया रत्नप्रभां यावत्। सौधर्मेशानयोर्देवानां तथा भवनपतिव्यन्तरज्योतिष्काणां तूच्चत्वं वपुः प्रमाणं उत्कृष्टतः सप्त हस्ताः ज्ञेयाः, सप्त रत्नयो भवन्ति इत्यर्थः, "बद्धमुष्टिररत्नी रत्निः इति वचनात्" ॥ ६ ॥

**गब्भतिरि सहसजोयण, वणस्सई अहियजोयणसहस्सं। नरतेइंदि तिगाऊ, बेइंदिय जोयणे बार ॥७॥**



For Private and Personal Use Only

जोयणमेगं चउरिं-दिदेहमुच्चत्तणं सुए भणिअं। वेउव्वियदेहं पुण, अंगुलसंखं समारंभे ॥ ८ ॥

(अव०) गर्भजतिरश्चां मत्स्यादीनां योजनसहस्रं, वनस्पतेः साधिकयोजनसहस्रं तदूर्ध्वं तु पृथ्वीविकारः। नरास्त्रीन्द्रियाश्च त्रिगव्यूतोच्चाः। द्वीन्द्रिया 'जोयणे बारत्ति' द्वादशयोजनोच्छ्रयाः। चतुरिन्द्रियदेहमुच्चत्वेन योजनमेकं। श्रुते प्रज्ञापनादौ भणितमुक्तं प्रस्तावादाह-वैक्रियदेहं पुनः प्रारम्भेऽङ्गुलसङ्ख्यातभागमानं, उत्कृष्टं 'देवनरअहियलक्खंति'। २द्वा० ॥ ७-८ ॥

(टीका)—गब्भतिरिसहसेति० मत्स्योरगादयो गर्भजास्तिर्यञ्चः सहस्रयोजनमानाः सहस्रयोजनप्रमाणा भवन्ति, भवन्तीत्यध्याहारः। वणस्सेति० प्रत्येकवनस्पतीनां सागरादिगतपद्मनालादीनां शरीरं देहमानं किञ्चिदधिकं योजनसहस्रमुच्चत्वं स्यात्। ननु शरीरमानं उत्सेधांगुलेन समुद्रपद्महृदादीनां प्रमाणांगुलयोजनयोजनसहस्रावगाहत्वात् तद्गतपद्मनालादीनां तु उत्सेधांगुलापेक्षयात्यन्तदैर्घ्यं स्यात्? अत आह-उत्सेधांगुलयोजनसहस्रमाने जलाशये गोतीर्थादिस्थाने वनस्पतेः साधिकं योजनसहस्रं, तदूर्ध्वं तु पृथिवीविकार इत्यर्थः। नरतेइन्ति० श्रुते सिद्धान्ते नराणां मनुष्याणां त्रीन्द्रियाणा कर्णसृगालिकादीनां क्रोशत्रिकं देहोच्चत्वं भणितं कथितं अर्हतेति कर्तृपदं। गव्यूतित्रयमुच्चत्वं शरीरमानेन नरत्रीन्द्रियौ भवत इत्यर्थः। बेइंदियेति० द्वीन्द्रियाणां शङ्खप्रभृतीनां द्वादशयोजनप्रमाणं देहोच्चत्वं वपुर्मानं स्यादित्यर्थः ॥ ७ ॥ जोयणेति० चतुरिन्द्रियाणां मक्षिकाभ्रमरदंशककंशारिशलभपतङ्गवृश्चिकप्रमुखाणामुत्कृष्टतो योजनमेकं देहमानमुच्चत्वं भणितं कथितं। अत्र खण्डान्वयो ज्ञेयः, गाथात्रयेणावगाहनास्वरूपं व्याख्यातं। अथ पुनर्वैक्रियावगाहनामाह-वेउव्वियेति, पुनर्वैक्रिय देहस्य प्रारम्भे जघन्यतोऽङ्गुलस्य संख्यांशः संख्येयभागं

वपुर्भवति उत्तरवैक्रियशरीरापेक्षया । भवधारणीयं तु अङ्गुलासंख्येयभागं प्रारम्भे ॥ ७-८ ॥

अथोत्कृष्टां वैक्रियावगाहनामाह—

**देवनर अहियलक्खं, तिरियाणं नव य जोयणसयाइं । दुगुणं तु नारयाणं, भणियं वेउव्वियसरीरं ॥९॥**

(अव०) लब्धिवैक्रियशरीरिणो जीवतोऽन्तर्मुहूर्त्तात् परतो न वैक्रियशरीरेऽवस्थानमस्ति । पुनरौदारिकशरीरस्य अवश्यं प्रतिपत्तेरिति ॥ ९ ॥

(टीका) देवनरेति० असुरकुमारादिव्यन्तरज्योतिष्कसौधर्माद्यच्युतावसान्तदेवानां च उत्कृष्टतः सहजशरीरग्रहणोत्तरकालं कार्यमाश्रित्य विविधा क्रियत इति उत्तरवैक्रिया च पुनर्देवानां उत्तरवैक्रियतनोर्योजनानां किञ्चिदधिकं लक्षं । तथा नराणां वैक्रियशरीरं किञ्चिदधिकं योजनलक्षं भणितं कथितं । ग्रैवेयकानुत्तरेषु देवानामुत्तरवैक्रियतनुर्नास्ति, सामर्थ्ये सति कार्याभावात्तदकरणमित्यर्थः । तिरियेति०, अत्र तुशब्दः पुनरर्थे तिरश्चां उत्कृष्टा वैक्रियतनुर्नवयोजनशतप्रमाणा भणिता । तु पुनः नैरयिकाणां स्वस्वाभाविकदेहादुत्तरवैक्रियशरीरं द्विगुणं ज्ञेयं, यथाऽऽद्यायां रत्नप्रभायां धनुःपञ्चदशकं हस्तद्वयं द्वादशांगुलप्रमाणं । ततो द्वितीयायां धनुष(नूंषि) एकत्रिंशद्धस्तमेकं । तृतीयायां द्वाषष्टिर्हस्तद्वयं । तुर्यायां धनुषः (षां) पञ्चविंशत्यधिकं शतं । पञ्चम्यां पञ्चाशदधिकं शतद्वयं नैरयिकाणां देहमानमुच्चत्वेन स्यात् । षष्ठ्यां नारकाणां धनुःपञ्चशतानि शरीरं स्यात् । पुनः सप्तम्यां नैरयिकाणामुच्चत्वेन धनुःसहस्रमेकं उत्तरवैक्रियदेहमानं स्यादित्यर्थः । जघन्यतस्तु तदेव नारकाणां द्विविधोऽपि स्वाभाविक



For Private and Personal Use Only

उत्तरवैक्रियश्च क्रमादंगुलासंख्यातांशोऽङ्गुलसंख्यातांशश्च, जघन्यश्चोत्पत्तिसमय एव नान्यदा ॥ ९ ॥

अथ उत्तरवैक्रियशरीरमानमाह—

**अंतमुहुत्तं निरए, मुहुत्तचत्तारि तिरियमणुएसुं, । देवेसु अद्धमासो, उक्कोस विउव्वणाकालो ॥ १० ॥**

(अव०) इति वचनसामर्थ्यात् अन्तर्मुहूर्तचतुष्टयं तेषां देशबन्ध इत्युच्यते तन्मतान्तरमित्यवसेयम् । तृतीयसंहननद्वारमाह॥१०॥

टीका—अन्तमुहुत्तन्ति० नरकस्थजीवानां वैक्रियशरीरस्यान्तर्मुहूर्त्तमुत्कृष्टमानं भवति । तिर्यग्मनुष्ययोर्वैक्रियशरीरस्य चत्वारो मुहूर्त्ताः उत्कृष्टाः स्थितयो भवन्ति ( तिर्भवति ) इत्यध्याहारः । भवनपत्यादिसौधर्माद्यच्युतान्तदेवानां उत्कृष्टतः उत्तरवैक्रियवपुपोऽर्द्धमासः कालः स्यात् । किञ्चिद्विशेषमाह-देवनैरयिकयोः स्वाभाविकवैक्रियदेह उत्तरवैक्रियदेहश्च स्यात्, च पुनः तिर्यग्नरयोर्वैक्रियदेहः ( अस्वाभाविकः ) स्यात् । वायोरस्वाभाविकं स्वाभाविकदेहं स्यात् । केषाञ्चिन्मते औदारिकं वैक्रियं च, केषाञ्चिन्मते वैक्रियमेवेत्यनुयोगद्वारवृत्तौ प्रोक्तमित्यर्थः । पृथिव्यप्तेजोवनस्पतिषु विकलेन्द्रियेषु च वैक्रियदेहा न स्युरिति भावः । देहशब्दः पुंक्लीबत्वं (वः) । अवगाहनाद्वारं द्वितीयं प्ररूपितं ॥ १० ॥

अथ संहननद्वारं तृतीयमाह—

**थावरसुरनेरइया, अस्संघयणा य विगलछेवट्ठा । संघयणछक्कं, गब्भय-नरतिरिएसुं मुणेयव्वं ॥ ११ ॥**

(अव०) स्थावरसुरनैरयिकाः संहनन रहिताः अस्थ्यभावादेव । चः समुच्चये किं समुच्चिनोति सैद्धान्तिकमतेन सुरा नारकाश्च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रथमसंहनिनः विकलाः सेवार्त्ता इति अस्थिसम्बन्धमात्रसंहननवन्तः, गर्भजनरतिरश्चोः संहननषट्कं ज्ञातव्यम् । ३ द्वा० ॥११॥ चतुर्थं संज्ञाद्वारमाह—

टीका—थावरसुरेति० पञ्चानां स्थावराणां, त्रयोदशदेवानां, सप्तपृथिवीभेदेनैकः नारकाणां सर्वमीलनेनैकोनविंशतिर्दण्डका जातास्तेषु दण्डकेषु षडपि संहननानि न सन्ति न ज्ञातव्यानि इत्यर्थः । त्रिकलेन्द्रियाणां द्वित्रिचतुरिन्द्रियाणां संमूर्च्छिमपञ्चेन्द्रियतिर्यग्नराणां च संहननं सेवार्त्तं ज्ञातव्यम् । कार्मग्रन्थिकास्तु संमूर्च्छिमपञ्चेन्द्रियतिरश्चां अपि षडप्याहुः । क्वचिदेकेन्द्रियाणां सेवार्त्तं देवानां च वज्रर्षभनाराचमुक्तं, तदौपचारिकं । तुशब्दार्थे अपिशब्दः, तु पुनः गर्भजतिर्यग्मनुष्ययोः षडपि संहननानि ज्ञातव्यानि । को भावः? गर्भजतिर्यग्नरेषु षडपि संहननान्याहुः विकलेष्वेकं सेवार्त्तमन्येष्वेकोनविंशतिदण्डकेषु न संहननानि भवन्ति इत्यर्थः । अत्र चकारः समुच्चयार्थः ॥ ११ ॥

संहननद्वारं तृतीयं निगमयन्नथ संज्ञाद्वारमभिधित्सया चतुर्थं संज्ञाद्वारं व्याख्यानयति—

**सव्वेसिं चउ दह वा, सन्ना सव्वे सुरा य चउरंसा । नर तिरि छस्संठाणा, हुंडा विगलिन्दिनेरइआ ॥१२॥**

(अव०) संज्ञा सर्वजीवानां चतस्रो दश वा, केषाञ्चिन्नृणां षोडशापि परमल्पत्वान्न विवक्षितम् । ४द्वा० । पञ्चमं संस्थानद्वारमाह–सर्वे सुराश्च भीमो भीमसेन इतिन्यायेन समचतुरस्रसंस्थानाः । नरतिर्यञ्चौ षट्संस्थानौ । विकलेन्द्रियनैरयिका हुण्डसंस्थानाः ॥१२॥ स्थिराणां षड्विधसंस्थानराहित्येऽपि संस्थानानां आकारभेदत्वादेव एतच्छरीराकारानाह —



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

टीका—सव्वेसिं चउ दहेति० सर्वेषां चतुर्विंशतिदण्डकजीवानां आहारभयमैथुनपरिग्रहलक्षणाश्चतस्रः संज्ञाः स्युः । अथवा दश संज्ञाः स्युः । यथा-पूर्वोक्ताश्चतस्रः क्रोधमानमायालोभलोकओघलक्षणाः (णाश्चेति) संज्ञाः दश भवन्ति, भवन्तीत्यध्याहारः । चतुर्थं संज्ञाद्वारं व्याख्यातं । अथ पञ्चमं संस्थानद्वारं प्रोच्यते । सव्वे सुरेति० भवनपत्यादिवैमानिकान्ता देवाः सर्वेऽपि समचतुरस्रसंस्थानाः स्युः, समाश्चतस्रोऽस्रयश्चतुर्दिग्विभागोपलक्षिताः शरीरावयवाः यत्र समा वा चत्वारोऽस्राः कोणाः यत्र ते (तत्) समचतुरस्राः (स्रं) गर्भजनरा गर्भजतिर्यञ्चश्च तयोः समचतुरस्रन्यग्रोधपरिमण्डलसादिकुब्जवामनहुण्डाख्यानि षडपि संस्थानानि भवन्ति । हुंडा वीति० विकलेन्द्रियाणां नैरयिकाणां स्थावराणां च हुण्डाख्यसंस्थानं स्यात् । हुण्डस्य किं लक्षणं स्यात् ? तदुच्यते । यथा-सर्व्वावयवेषु अलक्षणं स्यात्, शुभाकाररहितं हुण्डं भवति इत्यर्थ । ननु चतुर्विंशतिदण्डकानां षडपि संस्थानानि प्रोक्तानि, यदि स्थावराणां नानाविधध्वजसूचिबुद्बुदार्धमसूरा (आ)कारा वर्तन्ते तर्हि बहूनि संस्थानानि भवन्ति ! प्रोच्यते. अमी भेदा हुण्डान्तर्गता भवन्ति इत्यर्थः ॥ १२ ॥

हुण्डस्य भेदनाह—

**नाणाविह धयसूइ, बुब्बुय वणवाउतेउअपकाया । पुढवीमसूरचंदा—कारा संठाणओ भणिया ॥ १३ ॥**

(अव०) नानाविधं, १ ध्वजः पताका, २ सूची, ३ बुद्बुदाकाराणि क्रमेण वनस्पतिवायुतेजोऽप्कायशरीराणि । पृथ्वी अर्द्धमसुराकारा भणिता भगवत्यादौ ॥ १३ ॥ षष्ठं कषायद्वारमाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



टीका–नाणाविहेति० वनस्पतयो नानाविधसंस्थाना विचित्रसंस्थानाः भणिताः । च पुनः वायवो ध्वजसंस्थाना भणिता । अग्नयः सूचिकलापसंस्थानाः भणिताः प्रोक्ता । आपः स्तिबुकबिन्दुसंस्थानाः बुद्बुदाकाराः भणिताः कथिताः पंपोटा इति लोकोक्तिः । पृथिव्यो मसूरचन्द्राकारा अर्धमसूराकारा इत्यर्थः ॥ १३ ॥

पञ्चमं संस्थानद्वारं संहरन् षष्ठं कषायद्वारं प्ररूपयति ॥

सव्वेवि चउकसाया, लेसछगं गब्भतिरियमणुएसुं । नारयतेऊवाऊ, विगला वेमाणिय तिलेसा ॥ १४ ॥

(अव०) सर्वेपि जीवाः चतुष्कषायवन्तः । निष्कषायाश्च केचन मनुष्येषु । सप्तमं लेश्याद्वारमाह–लेश्याषट्कं गर्भजतिर्यग्मनुष्येषु, नारकतेजोवायुविकला वैमानिकाश्च त्रिलेश्याः, प्रथमद्वितीययोः पृथिव्योः कापोता । तृतीयस्यामुपरि कापोता अधो नीला । पंकायां नीला धूमायां नीला कृष्णा च । षष्ठीसप्तम्योः, कृष्णा एव । तथा सौधर्मेशानयोस्तेजः कल्पत्रये पद्मा, लान्तकादिषु शुक्ल एवेति ॥ १४ ॥

टीका–सव्वेवि चउ० इति केवलिसिद्धजीवान् मुक्त्वा चतुर्विंशतिदण्डकानां जीवेषु चत्वारः कषायाः भवन्ति । षष्ठं कषायद्वारं वर्णितं । अथ सप्तमं लेश्याद्वारं विवृणोति । लेसेति० गर्भजतिर्यग्मनुष्ययोर्लेश्याः षडप्याहुः । च पुनः नारयेति० नैरयिकानां तेजसां वायूनां विकलेन्द्रियाणां च कृष्णाद्यास्तिस्रो लेश्या भवन्ति । वैमानिकानां देवानां तेजआद्यास्तिस्रो लेश्या भवन्ति, भवन्तीत्यध्याहारः ॥ १४ ॥



For Private and Personal Use Only

**जोइसिय तेउलेसा, सेसा सव्वेवि हुंति चउलेसा । इंदियदारं सुगमं, मणुआणं सत्त समुग्घाया ॥१५॥**

(अव०) ज्योतिष्काः केवलतेजोलेश्यावन्तः शेषाः सर्वेऽपि पृथिव्यब्वनस्पतिभवनपतिव्यन्तराश्चतुर्लेश्या भवन्ति । तेजोलेश्यावतां केषाञ्चिद्देवानां भूजलवनेषूत्पादात् कियत्कालं तल्लेश्यासम्भवः ॥ ७ ॥ इन्द्रियद्वारं सुगमम् ॥ ८ ॥ **नवमं समुद्घातद्वारमाह**–मनुष्येषु सप्त समुद्घाताः ॥ १ सप्तसमुद्घातानां नामान्याह–

टीका—जोइसियेति० तेजोलेश्याका ज्योतिष्काः भवन्ति । आद्यपदं व्याख्यातं । गाथाद्वितीयपादस्य व्याख्यानमाह–सेसा सव्वेवित्ति० शेषाः सर्वेऽपि चतुर्लेश्यावन्तः स्युः । को भावः ? चतुर्दशदण्डकेषु चतस्रो लेश्याः भवन्ति । तद् विस्तरेणाह–भवनपतीनां व्यन्तराणां च कृष्णा नीला कापोता तैजसी चेति चतस्रो लेश्याः स्युः । च पुनः पृथिव्यब्वनस्पतीनां कृष्णाद्याश्चतस्रो लेश्याः स्युः, अत्रापि विशेषमाह–परमाधार्मिकाणां कृष्णैव ज्योतिष्केषु आद्यकल्पद्विके च तेजोलेश्या । कल्पत्रिके सनत्कुमारादिके पद्मलेश्या, लान्तकादिषु चानुत्तरान्तेषु शुक्ललेश्या भवति, भवति इत्यध्याहारः । सप्तमं लेश्याद्वारं निरूपितं । **अथ अष्टम इन्द्रियद्वारं** व्याख्यानयति–इंदियेति० इन्द्रियद्वारं सुगममपि बहिस्तः किमपि विशेषमाह–तत्र इन्द्रियाणि पञ्च श्रोत्रादीनि प्रसिद्धान्येव सामान्यतः, विशेषतः पुनस्तानि द्विधा द्रव्येन्द्रियाणि भावेन्द्रियाणि (च) । तत्र द्रव्येन्द्रियाणि पुद्गलद्रव्यरूपाणि भावेन्द्रियाणि लब्ध्युपयोगलक्षणानि, तत्र पुनर्द्रव्येन्द्रियाणि निर्वृत्त्युपकरणभेदात् द्विधा । निर्वृत्तिरपि द्विधा अन्तर्बहिश्च । तत्र श्रोत्रेन्द्रियस्यान्तर्मध्ये कदम्बपुष्पाकारदेहावयवरूपा चक्षुषोर्मसूराकारा घ्राणयोरतिमुक्तपुष्पाकारा रसनायाः क्षुरप्राकारा



For Private and Personal Use Only

स्पर्शेन्द्रियस्य च नानाकारा विचित्रसंस्थाना निर्वृत्तिरस्ति इत्यर्थः। द्रव्येन्द्रियस्वरूपं प्रोक्तं, अथ भावेन्द्रियाणि लब्ध्युपयोगरूपाणि जीवस्य ज्ञानावरणादिकर्मक्षयोपशमभावात् या शब्दग्रहणशक्तिः सा लब्धिः, येन पुनः शब्दादीनां ग्रहणपरिणामः स उपयोगः, एतद्द्वयरूपाणि भावेन्द्रियाणि। द्रव्येन्द्रियभावेन्द्रिययोः संस्थानं स्वरूपं च व्याख्यातं। अथ एषां पञ्चेन्द्रियाणां विषयमाह-श्रवणयोर्द्वादशयोजनविषयः स्यात्, द्वादशयोजनात् मेघादीनां शब्दग्रहणशक्तिरस्ति इत्यर्थः। च पुनः चक्षुषोः किञ्चिद्धिकं एकं लक्षं विषयः स्यात्, उत्कृष्टतः किञ्चिदधिकमेकं लक्षं दृष्टिप्रसरणं भवति इत्यर्थः, अत्र ज्ञातं विष्णुकुमारदृग्गोचरता। च पुनः घ्राणेन्द्रियस्य नव योजनानि यावत् विषयः स्यात्, नवयोजनात् विषयं गृह्णाति इत्यर्थः। पुनः उत्कृष्टतो रसनायाः नव योजनानि यावद्विषयः स्यात्, नवयोजनात्पुद्गलरसमास्वादयतीत्यर्थः। यथा दूरतस्तितिडीरसालक्षारादीन् दृष्ट्वा मुखे जलं समेति इति दृष्टान्तो ज्ञेयः। तथा स्पर्शेन्द्रियस्य नवयोजनानि यावत् विषयो भवति, स्वशरीरं प्रारभ्य नवयोजनप्रान्तं यावत् पुद्गलद्रव्यं स्पर्शेन्द्रियो गृह्णाति इत्यर्थः। च पुनरेषां पञ्चानां विषयभेदं विवृणोति-श्रोत्रयोराकर्णनं-श्रवणं त्रिधा भवति, यथा-शुभः अशुभः मिश्रश्च। अथवा जीवेभ्यो द्वीन्द्रियादिभ्यः, अजीवेभ्यः पटहादिभ्यो मिश्रेभ्यो भेर्यादिभ्यः, (शब्दानामुत्पन्नानां) कर्णयोराकर्णनं त्रिविधं स्यात्। च पुनः चक्षुषोर्विलोकनभेदाः पञ्चधा भवन्ति, यथा-चक्षुषा पञ्च शुक्लपीतरक्तनीलकृष्णा वर्णा गृह्यन्ते, पञ्चवर्णा दृष्टिगोचरा भवन्ति इत्यर्थः। तथा घ्राणेन्द्रियस्य द्वौ सुगन्धदुर्गन्धविषयभेदौ भवतः, घ्राणेन्द्रियं सुगन्धदुर्गन्धे गृह्णाति इत्यर्थः, घ्राणविषये समभ्येत इत्यर्थः। रसनायाः पञ्च कटुकादिविषयभेदा भवन्ति। केऽपि षडप्याहुः, यथा कटुकतिक्तकषायाम्लमधुरक्षारभेदात्। षण्णामपि रसानां स्वादं जिह्वा जानाति इत्यर्थः। तथा स्पर्शे-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्द्रियस्याष्टौ सुकुमालादिविषयभेदा भवन्ति, यथा–सुकुमालकर्कशगुरुलघुशीतोष्णस्निग्धरूक्षभेदात्, स्पर्शेन्द्रियः स्पर्शेन स्पर्शं जानाति इत्यर्थः। पञ्चेन्द्रियाणां सर्व्वेऽपि त्रयोविंशतिर्विषयभेदा जाता इत्यर्थः। अथ श्रवणादीनामवगाहनामाह–चतुर्णां कर्णचक्षुर्घ्राणरसनानामङ्गुलासंख्येयभागावगाहना भवति। च पुनः स्पर्शेन्द्रियस्य स्वदेहप्रमाणावगाहना ज्ञातव्या। अथ केषामिन्द्रियाणां कामभोगेच्छा भवति तल्लक्षणमाह–श्रवणचक्षुषोः कामेच्छा भवति, च पुनः घ्राणरसनास्पर्शेन्द्रियाणां भोगेच्छा भवति, आद्यौ द्वौ कामिनौ ज्ञेयौ त्रयः प्रान्ताः भोगिनो ज्ञेया इत्यर्थः। अथ एषां पञ्चेन्द्रियाणां पुनरुपकरणं किं स्यात्तदाह–कर्णेन्द्रियादीनां निजनिजविषयग्रहणशक्तिर्यथा चन्द्रहासस्य छेदनशक्तिरिव। इन्द्रियाणां सदृष्टान्तो विचारः प्रवचनसारोद्धारवृत्तितो भावनीयः। अष्टममिन्द्रियद्वारं व्याख्यातं। अथ **नवमं समुद्घातद्वारं** प्ररूपयति–मणुएसु इति० मनुष्ये सप्त समुद्घाता भवन्ति ॥१५॥

**वेयणकसायमरणे, वेउव्विय तेअए अ आहारे। केवलिय समुग्धाया, सत्त इमे हुंति सन्नीणं ॥ १६ ॥**

टीका–वेयणकसायेति० संज्ञिमनुष्याणाममी सप्त वेदनाकषायमरणादि (द्याः) समुद्घाता भवन्ति, भवन्तीत्यध्याहारः ॥१६॥

**एगिंदियाण केवल–तेउआहारग विणा उ चत्तारि। ते विउव्वियवज्जा, विगला सन्नीण ते चेव ॥१७॥**

टीका—एगिन्दियाणेति० एकेन्द्रियाणां केवलतैजसआहारकान्विना–वर्जयित्वा चत्वारो वेदनाकषायमरणवैक्रियलक्षणाः समुद्घाता भवन्ति। तु पुनः वैक्रियवर्जास्ते पूर्वज्ञाः (काः)। के ते? केवलतैजसआहारकवैक्रियसमुद्घातवर्जा विकला भवन्ति,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विकलानां त्रयो वेदनाकषायमरणरूपाः समुद्घाता भवन्तीत्यर्थः । संज्ञिनां ते सप्त समुद्घाता भवन्ति । तुः पुनरर्थे । एव निश्चयार्थे । चः समुच्चयार्थे ॥ १७ ॥

**पण गब्भतिरिसुरेसु, नारयवाउसु चउर तिय सेसे । विगल दुदिट्ठी थावर, मिच्छत्ति सेस तिय दिट्ठी ॥१८॥**

(अव०) गर्भजतिर्यक्सुरयोः पञ्च, नारकवाय्वोश्चत्वारः । शेषे स्थावरे विकले च त्रयः समुद्घाताः सर्वत्रानुक्रमेण ।९। दशमं दृष्टिद्वारमाह–विकलेषु दृष्टिद्विकं सम्यक्त्वमिथ्यात्वरूपं, स्थावरा मिथ्यात्विनः । शेषास्तिर्यक्सुरनारकास्त्रिदृष्टयः सम्यक्-मिथ्यात्वमिश्र सहिता भवन्ति ।१०। ॥ १८ ॥ अथैकादशदर्शनद्वारमाह–

टीका—पणगब्भेति० गर्जजतिर्यक्षु भवनपत्यादिवैमानिकान्तेषु देवेषु चाद्याः पञ्च समुद्घाता भवन्ति । तत्राहारककेवलिसमुद्घाताभावात् । नारयेति० नैरयिकवाय्वोराद्याश्चत्वारः समुद्घाता भवन्ति । तियसेसे इति०, शेषेषु त्रयः समुद्घाता भवन्ति । चकरात् चतुर्षु पृथिव्यप्तेजोवनस्पतिषु विकलेन्द्रियेषु चाद्यास्त्रयः समुद्घाता भवन्ति । अर्थात् सप्तदण्डकेषु त्रयः समुद्घाता भवन्तीत्यर्थः । नवमं समुद्घातद्वारं व्याख्यातं । अथ दशमं दृष्टिद्वारं कथ्यते । विगलेति० विकलेषु द्वित्रिचतुरिन्द्रियेषु द्वे दृष्टी भवतः, सम्यग्दृष्टि-र्मिथ्यादृष्टिश्चेत्यर्थः । स्थावराणामेका मिथ्यादृष्टिः स्यात् । सेसेति० शेषेषु दण्डकेषु तिस्रो दृष्टयो भवन्ति । सविस्तरेणाह–नैरयिकाणां भवनपत्यादिवैमानिकान्तानां देवानां मनुष्याणां गर्भजतिरश्चां च तिस्रो दृष्टयः प्राप्यन्ते । कोऽर्थः ? षोडशदण्डकेषु तिस्रो दृष्टयो भवन्तीत्यर्थः । दशमं दृष्टिद्वारं व्याख्यातं । चः समुच्चयार्थः ॥ १८ ॥



For Private and Personal Use Only

अथ एकादशं दर्शनद्वारमाह—

थावरबितिसु अचक्खू, चउरिंदिसु तद्दुगं सुए भणियं। मणुआ चउदंसणिणो, सेसेसु तिग तिगं भणिअं ॥१९॥

(अव०) स्थावरद्वीन्द्रियत्रीन्द्रियेषु केवलमचक्षुर्दर्शनं, चतुरिन्द्रियेषु तद्द्विकं चक्षुरचक्षुरूपं श्रुते कर्मग्रन्थादौ भणितं, मनुष्याश्चतुर्दर्शनिनः। शेषेषु सुरनारकतिर्यक्षु त्रिकं त्रिकं दर्शनस्य चक्षुरचक्षुरवधिरूपं।११। ॥१९॥ द्वारद्वयं समकमाह—

टीका—थावरबितिसुत्ति० पञ्चसु स्थावरेषु द्वीन्द्रियेषु त्रीन्द्रियेषु च अचक्षुर्दर्शनमेकं भणितं प्रोक्तं श्रुते। चतुरिन्द्रियेषु तद्द्विकं भणितं तयोश्च चक्षुरचक्षुर्दर्शनयोर्द्विकं तद्द्विकं। च पुनः मनुष्याः चतुर्दर्शनिनो भवन्ति, मनुष्येषु चत्वारि चक्षुरचक्षुरवधिकेवलरूपाणि दर्शनानि भणितानीत्यर्थः। सेसेसु तिगं तिगंति० शेषेषु दण्डकेषु त्रिकं त्रिकं भणितम्। नैरयिकेषु भवनपत्यादिवैमानिकावसानेषु तिर्यक्षु चाद्यानि त्रीणि दर्शनानि भवन्ति एतावता पञ्चदशदण्डकेषु त्रीणि आद्यानि दर्शनानि भवन्तीत्यर्थः। दर्शनद्वारं समुदीरितम् ॥ १९ ॥

अथ द्वादशं त्रयोदशं अज्ञानद्वारंज्ञानद्वारं व्याख्यानयति—

अन्नाण नाण तिय तिय, सुरतिरिनिरए थिरे अनाणदुगं।
नाणन्नाण दु विगले, मणुए पण नाण ति अनाणा ॥ २० ॥

(अव०) द्वन्द्वैकवद्भावात् सुरतिर्यग्निरयेऽज्ञानत्रिकं ज्ञानत्रिकं च भवंति सम्यक्त्वप्राप्तौ, स्थिरे अज्ञानद्विकं, यद्यपि भूदकवनेषु



For Private and Personal Use Only

सैद्धान्तिकमतेन सम्यक्त्वं वमतां देवानां तेषूत्पादे सास्वादनसद्भावाच्च श्रुतमती भवतः, परं नेहाधिकृते, विकले ज्ञानाज्ञानयोर्द्विकं, मनुष्येषु पञ्चज्ञानानि त्रीण्यज्ञानानि भवन्ति ॥ २० ॥ चतुर्दशं योगद्वारमाह–

टीका—अन्नाणनाणेति० सर्वेषु देवेषु तिर्यक्षु नैरयिकेषु च ज्ञानत्रिकं भवति, त्रीणि मतिज्ञानश्रुतज्ञानावधिज्ञानरूपाणि भवन्तीत्यर्थः । च पुनः विकलेषु द्वित्रिचतुरिन्द्रियेषु ज्ञानद्विकं भवति, मतिज्ञानश्रुतज्ञाने स्यातामित्यर्थः । च पुनः मनुष्येषु पञ्चज्ञानानि भवन्ति, मतिज्ञानश्रुतज्ञानावधिज्ञानमनःपर्यायज्ञानकेवलज्ञानरूपाणि भवन्तीत्यर्थः । द्वादशं ज्ञानद्वारं प्ररूपितम् । अथगाथान्तर्भूतं त्रयोदशमज्ञानद्वारं निरूप्यते–सर्वेषु देवेषु तिर्यक्षु नैरयिकेषु त्रीणि मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानरूपाणि अज्ञानानि भवन्ति । च पुनः स्थावरेषु अज्ञानद्विकं भवति, मत्यज्ञानं श्रुताज्ञानं च स्यादित्यर्थः । पुनः विकलेषु अज्ञानद्विकं भवति, मत्यज्ञानं श्रुताज्ञानं च स्यादित्यर्थः । मनुष्येषु मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानरूपाणि त्रीण्यज्ञानानि भवन्ति । ज्ञानद्वारान्तोऽज्ञानद्वारमन्तर्भूतं तच्च प्रादुष्कृतं । अत्र चकारः समुच्चयार्थः ॥२०॥

**अज्ञानद्वारं संहरन्नथ चतुर्दशं योगद्वारमाह—**

## सच्चेअरमीस असच्च–मोस मणवय विउव्विआहारे । उरलं मीसा कम्मण, इय जोगा देसिया समए ॥२१॥

टीका—सच्चेअरेति० प्रथमः सत्यमनोयोगः १ । इतरो द्वितीयोऽसत्यमनोयोगः २ । तृतीयो मिश्रमनोयोगः ३ । चतुर्थोऽसत्यामृषामनोयोगः ४ । तथैव वचनस्यापि चत्वारो योगा ज्ञेयाः ८ । नवम औदारिकयोगः ९ । दशम औदारिकमिश्रयोगः १० ।



For Private and Personal Use Only

एकादशो वैक्रिययोगः ११ । द्वादशो वैक्रियमिश्रयोगः १२ । त्रयोदश आहारकयोगः १३ । चतुर्दश आहारकमिश्रयोगः १४ । त्रयाणामौदारिकादीनां प्रत्येकं मिश्रशब्दः प्रयोज्यः । पञ्चदशस्तु तैजसकार्मणयोगः १५ । को भावः ? मनोवचनयोरष्टौ योगाः कायस्य सप्त योगाश्च स्युः, सर्वे पञ्चदश योगा ज्ञेया इत्यर्थः । समये सिद्धान्ते भगवता इति योगा दर्शिताः, आगमे योगाः कथिता इत्यर्थः । कथमितीति किं ते पूर्वोक्ता एवेत्यर्थः ॥ २१ ॥

केषां कियन्तो योगा भवन्ति तदाह—

**इक्कारस सुरनिरए, तिरिएसुं तेर पनर मणुएसुं । विगले चउ पण वाए, जोगतियं थावरे होइ ॥२२॥**

(अव०) औदारिकद्विकाहारकद्विकाभावात्सुरनिरययोर्विषये एकादश योगाः । तिर्यक्षु त्रयोदश, केषांचिद्वैक्रियलब्धिसम्भवेन तद्द्विकसम्भवात् । पञ्चदश मनुष्येषु, विकले औदारिकद्विककार्मणान्तिमभाषारूपं योगचतुष्कं, पञ्च वाते औदारिकद्विकवैक्रियद्विककार्मणरूपं, योगत्रिकं स्थावरचतुष्के भवति ॥ २२ ॥ पञ्चदशमुपयोगद्वारमाह–

टीका—इक्कारेति० भवनपत्यादिवैमानिकान्तेषु नैरयिकेषु चौदारिकौदारिकमिश्राहारकाहारकमिश्रवर्ज्जाकएकादश योगा भवन्ति। ते के? मनोवचनयोरष्टौ कायस्य त्रयो वैक्रियवैक्रियमिश्रतैजसकार्मणरूपाः योगाः स्युः । तथा तिर्यक्षु आहारकाहारकमिश्रौ विहाय अन्ये त्रयोदश योगा भवन्ति । च पुनः मनुष्येषु पञ्चदश पूर्वोक्ता योगा भवन्ति । च पुनः विकलेषु द्वित्रिचतुरिन्द्रियेषु असत्यवचनौदारिकौदारिकमिश्रतैजसकार्म्मणभेदाच्चत्वारो योगाः स्युः । च पुनः वायौ औदारिकौदारिकमिश्रवैक्रियवैक्रियमिश्र-

तैजसकार्मणलक्षणभेदात् पञ्च योगा भवन्ति । वायून् वर्जयित्वा चतुर्षु स्थावरेषु औदारिकौदारिकमिश्रतैजसकार्मणलक्षणाः त्रयो योगाः स्युः । योगद्वारं व्याख्यातम् । अत्र चकारोऽध्याहारः ॥ २२ ॥

अथ पञ्चदशमुपयोगद्वारं व्याख्यानयति—

ति अनाण नाण पण चउ, दंसण बार जिअलक्खणुवओगा।
इय बारस उवओगा, भणिया तेलुक्कदंसीहिं ॥ २३ ॥

टीका—तिअनाणनाणेति०, त्रिलोकदर्शिभिर्द्वादश उपयोगा इति भणिताः । त्रयाणां लोकानां समाहारस्तत्त्रिलोकं, त्रिलोकं पश्यन्ति ते त्रिलोकदर्शिनस्तैः कथमितीति किं ते ? तानाह—मत्यज्ञान—श्रुताज्ञान—विभङ्गज्ञानरूपाणि त्रीण्यज्ञानानि तथा पञ्चज्ञानानि च प्रसिद्धानि, च पुनः चत्वारि चक्षुरचक्षुरवधिकेवलदर्शनलक्षणानि दर्शनानि, सर्वेऽपि मिलिता द्वादश उपयोगा जाता भवन्ति, भवन्तीत्यध्याहारः तत्र ज्ञानानि विशेषार्थावगाहीनि । दर्शनानि तु सामान्यार्थावगाहीनि । एतेषां (एते) द्वादश जीवलक्षणानि, इति स्वरूपकथनम् । उपयोगा नाम्नेति ज्ञातव्याः ॥ २३ ॥

केषु केषु कति कति उपयोगा भवन्ति ? तानाह—

उवओगा मणुएसु, बारस नव निरयतिरियदेवेसु । विगलदुगे पण छक्कं, चउरिंदिसु थावरे तिअगं ॥२४॥

(अव०) मनुष्येषु द्वादशोपयोगाः अष्टौ साकाराश्चत्वारो निराकाराः, एते एव मनःपर्यायकेवलज्ञानकेवलदर्शनरहिता नव



For Private and Personal Use Only

निरयतिर्यग्देवेषु, विकलद्विके मति १ श्रुत २ मत्यज्ञान ३ श्रुताज्ञान ४ अचक्षुर्दर्शनरूपाः पञ्चोपयोगाः। चतुरिन्द्रियेषु पञ्च पूर्वोक्ताः चक्षुर्दर्शनसहिताः षट् उपयोगाः। स्थावरे त्रिकं मत्यज्ञानश्रुताज्ञानाचक्षुर्दर्शनरूपम् ॥ २४ ॥ षोडशं सप्तदशं च संख्याद्वारमाह—

टीका—उवओगा मेति० मनुष्येषु द्वादश उपयोगा भवन्ति। च पुनः नैरयिकेषु तिर्यक्षु च भवनपत्यादिवैमानिकान्तेषु नव उपयोगा भवन्ति, त्रीण्यज्ञानानि आद्यानि त्रीणि ज्ञानानि केवलदर्शनरहितानि त्रीणि दर्शनानि ज्ञेयानि, सर्वेऽपि मिलिता नव उपयोगा जाता इत्यर्थः। च पुनर्विकलद्विके द्वीन्द्रिये त्रीन्द्रिये च मतिज्ञान–श्रुतज्ञान–मत्यज्ञान–श्रुताज्ञान–अचक्षुदर्शनभेदात् पञ्च उपयोगा भवन्ति। तथा चतुरिन्द्रियेषु मतिज्ञानश्रुतज्ञानमत्याज्ञानश्रुताज्ञानचक्षुर्दर्शनाचक्षुर्दर्शनभेदात् षट् उपयोगा भवन्ति। पञ्चसु स्थावरेषु मत्यज्ञानश्रुताज्ञानअचक्षुर्दर्शनभेदात्त्रय उपयोगा भवन्ति। उपयोगद्वारं व्याख्यातम् ॥ २४ ॥

अथ षोडशमुपपाताख्यं सप्तदशं च्यवनाख्यं चेति द्वारद्वयं गाथयाऽऽह (एकयैवाह)—

**संखमसंखा समए, गब्भयतिरिविगलनारयसुरा य। मणुआ नियमा संखा, वणणंता थावर असंखा ॥२५॥**

(अव०) चतुर्दशरज्ज्वात्मकेऽपि लोके एकस्मिन् समये उत्पद्यमाना नियमेति पदं सर्वत्र ग्राह्यं तेन नियमान्निश्चयेन गर्भजतिर्यग्विकलनारकसुराश्च एको द्वौ त्रयोदश विंशतिर्यावत्सङ्ख्याताअसङ्ख्याता वा प्राप्यन्ते नत्वनन्ताः। मनुष्यास्तु नियमात्सङ्ख्याता एव। वनस्पतयोऽनन्ताः "निच्चमसंखो भागो अणंतजीवो चयइ एइ" इतिवचनात् शेषाश्चत्वारः स्थावरा असङ्ख्याता



For Private and Personal Use Only

एव न सङ्ख्याता न चानन्ताः ॥ २५ ॥ प्रस्तावादाह—

टीका–गर्भजतिर्यञ्चो विकला द्वित्रिचतुरिन्द्रिया नैरयिका भवनपत्यादिवैमानिकान्ताश्चैकस्मिन् समये जघन्यत एक द्वौ त्रयो वा उत्कृष्टतः संख्याता असंख्याता वोपपाते तथैव च्यवने च भवन्ति। को भावः? एकस्मिन् समये उत्कृष्टतः संख्याता असंख्याताश्च गर्भजतिर्यगाद्यः उत्पद्यन्ते च्यवन्ते चेत्यर्थः। विशेषमाह–केवलं सहस्रारादूर्ध्वं सर्वत्र देवा संख्याता उत्पद्यन्ते च्यवन्ते च, यतस्तत्र मनुष्या एव यान्ति, आनतादिच्युतादेवाश्च नरेष्वागच्छन्ति अयं विशेषः। तथा एकस्मिन् समये एकादिसंख्यानां चोपपाते तथैव च्यवने ज्ञेया, अथवा नियमेति पदं सर्वत्र योज्यम्। सम्मूर्च्छिममनुष्या असंख्येया उत्पद्यन्तेच्यवन्ते च। च पुनः वनस्पतिकायिका जीवाः स्वस्थानतः प्रतिसमयमनन्ता एवोत्पद्यन्ते तथैव च्यवन्ते, यद्यस्मात् कारणात् एकैकस्मादपि निगोदात् तदसंख्येय भागोऽनन्तजीवात्मको नित्यं च्यवते उद्वर्तते एति चोत्पद्यते। यदा तु परस्थानत उत्पद्यमानाश्चिन्त्यन्ते तदा संख्याता असंख्याता एवेत्यर्थः। अथ स्थावराः पृथिव्याद्याः एकेन्द्रियाः स्वस्थानतः परस्थानतो वेत्यनपेक्ष्य सामान्यतः उत्पत्तौ चिन्त्यमाना प्रत्येकमनुसमयमसंख्याता भवन्त्युत्पद्यन्ते तथैव असंख्याता एव च्यवन्ते, न पुनः समयाद्यन्तरेण नाप्येकाद्याः संख्याताः ॥ २५ ॥

असन्निनर असंखा, जह उववाए तहेव चवणे वि। बावीससगतिदसवास–सहस्स उक्किट्ठ पुढवाई ॥२६॥

(अव०) असंज्ञिनो नरा उत्पद्यमाना असङ्ख्याता लभ्यन्ते। अत्रैवातिदेशमाह–यथोपपातद्वारं सङ्ख्यामाश्रित्य व्याख्यातमेव



For Private and Personal Use Only

च्यवनद्वारमप्यवसातव्यम्, समानत्वादुपपातच्यवनयोः। अष्टादशं आयुर्द्वारमाह-अग्रेस्थितमप्यायुरिति पदं सर्वत्रानुवर्त्तनीयम्, तेन पृथिव्याः द्वाविंशतिर्वर्षसहस्राण्युत्कृष्टमायुरिति सर्वत्र योज्यम्। एवं उदकस्य सप्त, वायोस्त्रीणि, वनस्पतेर्दशवर्षसहस्राणि ॥ २६ ॥

टीका-असन्निचि असंज्ञिनो मिथ्यादृष्टयः सर्वपर्याप्तिभिरपर्याप्तताश्च एवंविधा नरा असंख्याताः प्रादुर्भवन्ति तथैवासंख्याता एव च्यवन्ते-म्रियन्ते च। यथा उपपातो भवति तथैव च्यवनमपि ज्ञेयमित्यर्थः। अपिशब्दः समुच्चयार्थः। उपपातच्यवनद्वारमभिधाय **अथाष्टादशं स्थितिद्वारमाह**-बावीससेति० पृथिवीकायजीवानां द्वाविंशतिवर्षसहस्रा उत्कृष्टाः स्थितिः स्यात्। अथाप्कायस्थितिमाह-अप्कायस्य सप्तवर्षसहस्रा उत्कृष्टा आयुःस्थितिर्भवति। अथ वायुकायस्य स्थितिमाह-वायुकायस्यत्रयो वर्षसहस्रा उत्कृष्टा स्थितिः स्यात। अथ वनस्पतिकायस्योत्कृष्टां स्थितिमाह-वनस्पतीनां तरुगणानां उत्कृष्टा दशवर्षसहस्रा स्थितिर्भवति ॥ २६ ॥

## तिदिणग्गि तिपल्लाऊ, नरतिरिसुरनिरयसागरतित्तीसा। वंतरपल्लं जोइस, वरिसलक्खाहियं पलियं ॥२७॥

(अव०) अग्नेः त्रीणि दिनान्यायुः। गर्भजतिर्यग्नराः त्रिपल्यायुषो देवकुर्वादिषु सुरनारकाणां त्रयस्त्रिंशत्सागरोपमाणि, व्यन्तराणां पल्योपमम्, ज्योतिषां वर्षलक्षाधिकं पल्योपमम् ॥ २७ ॥ असुराणामायुःस्थितिमाह-

टीका-तिदिणग्गीति० तेजस्कायस्य उत्कृष्टा स्थितिः त्रीणि दिनानि भवन्ति। स्थावराणां स्थितिं प्ररूप्याथ नरतिरश्चोः स्थितिमाह-तिपल्लेति० नरतिरश्चोस्त्रीणि पल्योपमानि स्थितिर्भवति। अथ सुरनैरयिकानां स्थितिमाह-सुरनैरयिकयोस्त्रयस्त्रि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शत्सागराणि उत्कृष्टा स्थितिर्भवति । अथ व्यन्तराणां स्थितिमाह—वन्तरेति० व्यन्तरदेवदेवीनां दशवर्षसहस्राणि जघन्या स्थितिः स्यात् । अथ उत्कृष्टां स्थितिमाह—व्यन्तरदेवानां पल्योपमं व्यन्तरदेवीनां तु पल्यार्द्धं ज्योतिष्काणां चन्द्ररविग्रहनक्षत्राणां च वर्षाणां लक्षेणाधिकं पल्योपममुत्कृष्टमायुरवगन्तव्यम् । एषां किञ्चिद्विवरणमाह—चन्द्राणां लक्षेणाधिकं पल्योपममायुस्ततो रवीणां वर्षाणां सहस्राधिकं पल्योपमं ततो ग्रहाणां पल्योपमं ततो नक्षत्राणां पल्योपमार्द्धं ततस्तारकाणां पल्यस्य चतुर्थो भागः । एषां देवीनां स्थितिमाह—चन्द्रविमानवासिदेवीनां पञ्चाशद्वर्षसहस्राधिकं पल्यार्द्धं ततः सूर्यदेवीनां पञ्चशतवर्षाधिकं पल्यार्द्धं ततो ग्रहदेवीनां पल्यार्द्धमेव नक्षत्रदेवीनां विशेषाधिकः पल्यस्य चतुर्थो भागः ततस्तारकदेवीनां किञ्चिदधिकः पल्यस्याष्टमो भागः । अथ ज्योतिष्काणां जघन्यां स्थितिमाह—चन्द्रादिदेवदेवीरूपाणां चतुर्णां युगलानां पल्यस्य चतुर्थो भागः पञ्चमके युगले तारकदेवदेवीरूपे पल्याष्टमो भागः ॥ २७ ॥

असुराणां स्थितिमाह—

**असुराण अहियअयरं, देसूणदुपल्लयं नवनिकाए । बारस वासुणपणदिण, छम्मासुक्किट्ठ विगलाउ ॥२८॥**

(आ०) असुराणां चमरादीनां कियताप्यधिकमंतरं सागरोपमम्, शेषे निकायनवके देशोनपल्योपमद्विकं, दक्षिणदिशमाश्रित्य द्व्यर्धपल्योपमं, उत्तरस्यां तु द्वे देशोनपल्योपमे । द्वीन्द्रियाणां द्वादशवर्षाणि । त्रीन्द्रियाणामेकोनपञ्चाशद्दिनानि । चतुरिन्द्रियाणां षण्मासा उत्कृष्टमायुः । २८ । उत्कृष्टा स्थितिः । अथ जघन्यान्तामेवाह—



For Private and Personal Use Only

टीका—असुराण अहियेति० असुराणां किञ्चिदधिकमेकमतरमेकं सागरोपममित्यर्थः । तत्र दाक्षिणात्यानामसुराणामेकमतरमौत्तराणां साधिकमतरमित्यर्थः । दाक्षिणात्यानां धरणेन्द्रादीनां नवनिकायानां द्वितीयमर्द्धं यस्य ( द्वितीयस्यार्धं यत्र ) तद् द्व्यर्द्धं सार्द्धपल्योपमं स्थितिर्भवति इत्यर्थः । तथा उत्तरदिग्वर्तिनां नवनिकायानां देशोने किञ्चिदूने द्वे पल्योपमे भवतः । तरीतुमशक्यं प्रभूतकालतरणीयत्वादतरं सागरोपमं । असुराणां स्थितिं प्ररूप्य अथ विकलानां स्थितिं प्ररूपयति । बारसेति० विकलानां—द्वीन्द्रियाणां त्रीन्द्रियाणां चतुरिन्द्रियाणां च द्वादश वर्षाणि, एकोनपञ्चाशद्दिनानि, षण्मासश्च क्रमेणोत्कृष्टा स्थितिर्ज्ञेया ज्ञातव्या इत्यर्थः ॥ २८ ॥

पृथिव्यादिदशपदानां जघन्यां स्थितिमाह—

**पुढवाइदसपयाणं, अंतमुहुत्तं जहन्नआउठिई । दससहस्सवरिसठिइआ, भवणाहिवनिरयवंतरिया ॥ २९ ॥**

( अव० ) स्थावरपंचकत्रिकलत्रिकतिर्यक्नराणामंतर्मुहूर्त्तं जघन्यायुः स्थितिः । भवनाधिपनरकव्यंतरा जघन्यतो दशसहस्रस्थितिका भवंति ॥ २९ ॥ अथ वैमानिकानामायुः स्थितिमाह ।

टीका—पुढवाइदसेति० पञ्च स्थावरास्त्रयो विकलेन्द्रिया द्वौ मनुष्यतिर्यञ्चौ सर्वाणि मीलितानि पृथिव्यादीनि दश पदानि जातानि । एतेषां पृथिव्यादिदशपदानामन्तर्मुहूर्त्तं जघन्यमायुर्भवति । अथ भवनाधिपानां जघन्यस्थितिमाह—दससहसेति० भवनाधिपानां नैरयिकाणां व्यन्तराणां च दशवर्षसहस्राणि जघन्या स्थितिर्ज्ञेया ॥ २९ ॥



For Private and Personal Use Only

अर्थ वैमानिकानां स्थितिमाह––

**वेमाणिअजोइसिया, पल्लनयट्ठंसआउआ हुंति। सुरनरतिरिनिरएसुं, छ पज्जत्ती थावरे चउगं ॥३०॥**

( अव० ) वैमानिका ज्योतिषिकाश्च जघन्यतः क्रमेण एकपल्योपमाष्टभागायुषो भवन्ति। अथैकोनविंशतितमं पर्याप्तिद्वारमाह। सुरनरतिर्यक्निरयेषु पर्याप्तेषु षट्पर्याप्तयो भवन्ति। स्थावरे आहारशरीरइंद्रियश्वासोछ्वासरूपं पर्याप्तिचतुष्कं, अपर्याप्ता अपि जीवा पर्याप्तित्रयं समाप्यैव म्रियंते नर्वाक् ॥ ३० ॥

टीका––वेमाणीति० वैमानिकानां जघन्यं पल्योपममायुर्भवति। ज्योतिष्काणां च तदष्टांश आयुर्भवति। तस्य पल्यस्य अष्टांशः पल्यस्याष्टांशोऽ( पल्याष्टांशोऽ ) ष्टमो भागो भवतीत्यर्थः। उत्कृष्टजघन्योः स्थितिमभिधाय **अथैकोनविंशतितमं पर्याप्तिद्वारमाह**–सुरनरेति० भवनपत्यादिवैमानिकान्तेषु सुरेषु नरेषु नैरयिकेषु तिर्यक्षु च षडपि पर्याप्तयो भवन्ति। पञ्चसु स्थावरेषु आहारशरीरेन्द्रियश्वासोच्छ्वासभेदात् चतस्रः पर्याप्तयो भवन्ति ॥ ३० ॥

अथ विकलानां पर्याप्तिमाह—

**विगले पंच पज्जत्ती, छद्दिसि आहार होइ सव्वेसिं। पणगाइपए भयणा, अह सन्नतियं भणिस्सामि॥३१॥**

(अव०) पूर्वोक्तं पर्याप्तिचतुष्कं भाषापर्याप्त्यधिकं विकले पर्याप्तिपञ्चकम्। अथ विंशतितममाहारद्वारमाह। सर्वेषां जीवानां षट्दिक्क आहारो भवति। सर्वे जीवा दिक्षट्कस्थानाहारपुद्गलान् गृह्णन्तीतिभावः। पञ्चदिकादिके आहारे भजना। यथा लोका-



For Private and Personal Use Only

न्तर्वर्त्तिजीवानां पञ्चदिक्कः। लोकनिष्कूटस्थानां त्रिचतुर्दिक्कः। एकविंशं संज्ञाद्वारमाह। अथ संज्ञात्रिकं भणिष्यामि ॥३१॥

टीका—विगले पञ्चेति० विकलानां द्वित्रिचतुरिन्द्रियाणामाहारशरीरेन्द्रियश्वासोच्छ्वासभाषाभेदात् पञ्च पर्याप्तयो भवन्ति। पर्याप्तिद्वारं व्याख्यातं। **विंशतितममाहारद्वारं विवृणोति।** छद्दिसित्ति० षट्सु दिक्षु सर्वेषां संसारिणां जीवानां गत आहारो भवति। षड्भ्यो दिग्भ्यो जीवा आहारं गृह्णन्ति इत्यर्थः। लोकान्ते लोकप्रान्ते च पुनः लोककोणे लोकाग्रे ये जीवास्संति तेषां जीवानां पञ्चसु अथवा चतसृषु तिसृषु यथा संभवमाहारो भवति, पञ्चकादिपदेषु भजना कोऽर्थः? केचन जीवाः पञ्चसु दिक्षु गतान् पुद्गलान् केचन चतसृषु दिक्षु गतान् पुद्गलान् केचन तिसृषु दिक्षु गतान् पुद्गलान् आहारयन्ति इति भावः। किमाहारद्वारं व्याख्यातं। **अथैकविंशतितमं संज्ञाद्वारं व्याख्यानयति।** अहेति० अथ संज्ञात्रिकं भणिष्यामि भणामीत्यर्थः ॥३१॥

## चउविहसुरतिरिएसुं, निरएसु य दीहकालिगी सन्ना। विगले हेउवएसा सन्नारहिया थिरा सव्वे ॥३२॥

(अव०) चतुर्विधसुरतिर्यक्षु निरयेषु च दीर्घकालिकी संज्ञा। दीर्घोऽतीतानागतवर्त्तमानविषयः कालो ज्ञेयो यस्या इति व्युत्पत्तेः, विकले हेतूपदेशिकी संज्ञा। किञ्चिन्मनोज्ञानसहिता वर्त्तमानविषया संज्ञेत्यर्थः। विशिष्टैतत्संज्ञात्रयरहिताः सर्वे स्थिरा ज्ञेयाः॥३२॥

टीका—चउविहेति० चतुर्विधसुरेषु तिर्यक्षु नैरयिकेषु च दीर्घकालिकीसंज्ञा भवति। अत्र चकारः समुच्चयार्थः, भवतीत्यध्याहारः। यः पुरुषः दीर्घमपि कालं विषयमतीतमर्थं स्मरति भविष्यच्च वस्तु चिन्तयति। कथं नु नाम मया कर्तव्यमिति स दीर्घकालिक्युपदेशेन युक्तः। विकलेषु विकलेन्द्रियेषु हेतूपदेशिकी संज्ञा स्यात्। यस्तु संचिन्त्येष्टानिष्टेषु छायातपादिवस्तुषु स्वदेह-

पालनहेतोः प्रवृत्तिनिवृत्ती विधत्ते स हेतूपवादोपदेशेन युक्तः। सर्वे स्थावराः संज्ञारहिता भवन्ति। स्थावरेषु संज्ञा न भवन्तीत्यर्थः ।।३२।।

केषु केषु काः संज्ञा भवन्ति? ता आह—

**मणुआण दीहकालिय, दिट्ठीवाउवएसिया केवि। पज्ज पण तिरिमणुअच्चिय, चउविहदेवेसु गच्छंति ।।३३।।**

(अव०) मनुजानां दीर्घकालिकी संज्ञा। दृष्टिवादोपदेशिकी क्षायोपशमिकादिसम्यक्त्वसहिताः केऽपि। पञ्चेन्द्रियतिर्यंचोऽप्येत त्संज्ञायुक्ता भवन्ति। केचित् परमल्पत्वान्न विवक्षिताः, **द्वाविंशं गतिद्वारं त्रयोविंशमागतिद्वारं** चाह। पर्याप्ताः पञ्चेन्द्रियाश्च तिर्यंचो मनुजाश्चतुर्विधदेवेषु गच्छन्ति। न शेषजीवाः। इति देवानामागति द्वारम् ।।३३।। अथ देवानां गतिद्वारमाह—

टीका—मणुआणेति० मनुष्याणां सामान्यतः दीर्घकालिकीसंज्ञा भवति, विशेषस्तु केऽपि मनुजाः दृष्टिवादोपदेशिकाः स्युः। यस्तु सम्यग्दृष्टिर्हेतोर्यथाशक्ति रागद्वेषादिरिपून् पराभवति जयतीत्यर्थः, स दृष्टिवादोपदेशिक्या सम्यग्दृष्टिरेवेत्यर्थः। केऽपि पञ्चेन्द्रियतिर्यञ्चोऽपि एतत्संज्ञायुक्ता अपि, परमल्पत्वान्न विवक्षिताः। सुखावबोधाय स्वामितया संज्ञात्रयं योजयति, यथा—द्वीन्द्रियादीनां अर्थात् सम्मूर्च्छिमपञ्चेन्द्रियाणां च हेतूपदेशिकीसंज्ञा, गर्भजतिर्यग्नरसुरनारकाणां दीर्घकालिकीसंज्ञा, छद्मस्थसम्यग्दृशां मनुष्याणां केषाञ्चित् तिरश्चां च दृष्टिवादोपदेशिकी संज्ञा, तु पुनः मनुष्याणां दीर्घकालिकीसंज्ञा स्यात्, अतो मनुष्येषु द्वे दृष्टी भवत इत्यर्थः। पृथिव्याद्येकेन्द्रियाणां वल्ल्यारोहणाद्यभिप्रायरूपा ओघसंज्ञैवेत्यर्थः। संज्ञाद्वारं प्ररूपितं। अथ **द्वाविंशतितमं** ||१६||

गतिद्वारमाह–पणपज्जेति० चतुर्विधदेवेषु पर्याप्तिभिः पूर्णाः गर्भजपञ्चेन्द्रियतिर्यञ्चो मनुष्याश्च गच्छन्ति–यान्तीत्यर्थः। चतुर्विधदेवेषु संख्यातायुषो मनुष्यास्तेषां गमनं अत्र गमनं प्राप्तिः स्याद्वादो भवतीत्यवसेयम्। देवानां गतिद्वारं समाप्तम् ॥३३॥

अथ देवानामागतिद्वारमाह—

**संखाउ पज्जपणिंदि, तिरियनरेसु तहेव पज्जते। भूदगपत्तेयवणे, एएसुच्चिय सुरागमणं ॥ ३४ ॥**

(अव०) संख्यातायुःपर्याप्तपञ्चेन्द्रियतिर्यग्नरेषु। तथैव पर्याप्ताभूदकप्रत्येकवने एतेष्वेव सुराणामागमनमुत्पादो भवति। इति सुरेषु गत्यागती, नारकाणां गत्यागती आह ॥३४॥

टीका—संखाउ पज्जेति० संख्यातायुष्षु पञ्चेन्द्रियतिर्यक्षु तथा मनुष्येषु च तथैव पर्याप्तयोर्भूदकयोर्भूजलयोः प्रत्येक-वनस्पतौ च एतेष्वेव पञ्चस्वेवेत्यर्थः सुराणामागतिरागमनं भवति। सुराणामागतिद्वारं व्याख्यातं ॥३४॥

**पज्जत्तसंखगब्भय, तिरियनरा निरयसत्तगे जंति। निरयउवट्टा एएसु, उववज्जंति न सेसेसु ॥ ३५ ॥**

(अव०) पर्याप्तसंख्यातायुषो गर्भजतिर्यग्नराः नरकसप्तके यांति 'असन्नि खलु पढम'मिति वचनात् असंज्ञिनोऽपि प्रथमां पृथिवीं यावद्यांति। परं तेषामिह नाधिकृतत्वात्। नरकादुद्धृताश्च जीवा एतल्लक्षणेषु एतेष्वेव तिर्यङ्नरेषूत्पद्यंते न शेषेषु जीवेषु। इति नारकगत्यागती ॥३६॥ अथ पृथ्व्यब्वनस्पतीनां गत्यागती आह—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



टीका--पज्जत्तेति० पर्याप्ताः संख्यातायुषो गर्भजतिर्यञ्चः संख्यातायुषो नराश्च सप्तसु निरयेषु यान्ति-गच्छन्ति । "असन्नी खलु पढमं" इति इति वचनात् असंज्ञिनोऽपि प्रथमां पृथिवीं यावत् यान्ति, परं तेषां इहानधिकृतत्वात् नोक्तं । नैरयिकगतिद्वारं व्याख्यातं । अथ नैरयिकागतिद्वारं व्याख्यानयति । निरउत्ति० तथा निरयान्नरकात् उध्धृताश्च्युता जीवा एतेष्वेव संख्यातायुष्षु गर्भजतिर्यग्मनुष्येष्वप्युत्पद्यन्ते आयान्तीत्यर्थः, शेषेभ्यो द्वाविंशतिद्वारेभ्यो नैरयिका जीवा न भवन्ति, एतेषु च नोत्पद्यन्ते नायान्तीत्यर्थः । नैरयिकागतिद्वारं प्ररूपितं ॥३५॥

अथ पृथिव्यब्वनस्पतिषु जीवानां गतिद्वारमाह—

पुढवीआउवणस्सइ, मज्झे नारयविवज्जिया जीवा । सव्वे उववज्जंति, नियनियकम्माणुमाणेणं ॥३६॥

(अव०) पृथिव्यब्वनस्पतिकायमध्ये नारकविवर्जिताः सर्वे त्रयोविंशतिदंडकस्था जीवा उत्पद्यंते । निजनिजयथाकृतकारितानुमोदितकर्मणामनुमानेन । निजनिजेतिवदता सूत्रकृता स्वयं कृतं कर्म भुज्यते न परकृतमित्यावेदितम् । कर्मानुमानेनेति सत्कर्मणा शुभस्थाने असत्कर्मणाशुभस्थाने ।।३६।। एतेषामेव गतिद्वारमाह ।

टीका-पुढवीति० पृथिव्यब्वनस्पतीनां मध्ये नारकविवर्जिता इति, कोऽर्थः-निरयजीवान् विहाय अन्ये सर्वे त्रयोविंशतिदण्डक सत्कजीवा निजनिजकर्मानुमानेन-निजशुभाशुभकर्मानुसारेणोत्पद्यन्ते प्रादुर्भवन्तीत्यर्थः । गतिद्वारं विवर्णितम् ॥ ३६ ।



For Private and Personal Use Only

अथ पृथिव्यब्वनस्पतीनां त्रयाणामागतिद्वारमाह—

**पुढवाइ दसपएसु, पुढवीआऊवणस्सई जंति । पुढवाइ दसपएहि य, तेऊवाऊसु उववाओ ॥ ३७ ॥**

(अव०) तस्यैव दंडकत्रयस्य जीवानां गतिद्वारमाह । पृथिव्यादिदशपदेषु अनुक्रमस्थितिषु पृथिव्यब्वनस्पतिजीवा यांति । न नारकसुरेष्वित्यर्थः । इति पृथ्व्यब्वनस्पतीनां गत्यागती । तेजोवाय्वोरागतिद्वारमाह । तेजोवाय्वोर्विषये पृथिव्यादिदशपदेभ्य एव उत्पद्यन्ते जीवाः ॥ ३७ ॥ अथ तेजोवाय्वोर्गतिमाह—

टीका—पुढवाइत्ति० पृथिव्यादिदशपदेषु—स्थावरविकलेन्द्रियतिर्यग्मनुष्येषु पृथिव्यब्वनस्पतयः पृथिव्यब्वनस्पतिसत्कजीवा यान्ति गच्छन्तीत्यर्थः । पृथिव्यादिभ्यः दशपदेभ्यः जीवानां तेजोवाय्वोरुपपात उत्पत्तिर्भवति इत्यर्थः । त्रयाणां पृथिव्यब्वनस्पतीनामागतिद्वारं व्याख्यातम् ॥ ३७ ॥

अथ तेजोवाय्वोर्गतिद्वारमाह—

**तेऊवाऊगमणं, पुढवीपमुहंमि होइ पयनवगे । पुढवाइठाणदसगं, विगलाइतियं तहिं जंति ॥ ३८ ॥**

(अव०) तेजोवाय्वोरागमनं पृथिवीप्रमुखे पदनवके भवति इति तेजोवायुगत्यागती । विकलेन्द्रिया पृथिव्यादिदशस्थानेभ्य एवोत्पद्यंते मृत्वा च तत्रैव यांति नान्यत्र । इति विकलगत्यागती ॥ ३८ ॥ अथ गर्भजतिर्यग्मनुष्याणां गत्यागती आह ।

टीका–तेउवाऊ इत्ति॰ तेजोवाय्वोर्गमनं पृथिव्यादिनवपदेषु स्थावरविकलेन्द्रियतिर्यक्षु तेजोवायुजीवानामुपपातः स्यात्, स्यादित्यध्याहारः। पृथिव्यादिनवपदसम्बन्धिनो (षु) जीवा (वेषु) (गच्छ) भवन्तीत्यर्थः। प्राकृतत्वात् द्विवचनं न स्यात् एकवचनं बहुवचनं च स्यात्, (तां), द्वयोस्तेजोवाय्वोर्गतिद्वारं कथितम्। अथ विकलानां गतिद्वारमाह–पुढवाइठाणेति॰ विकलेन्द्रियेषु पृथिव्यादिस्थानदशका जीवा यान्ति, स्थावरविकलेन्द्रियतिर्यग्मनुष्या गच्छन्ति इत्यर्थः। विकलानां गतिद्वारं व्याख्यातम्। अथ विकलानामागतिद्वारमाह–तेषु पृथिव्यादिस्थानदशकेषु विगलेति॰ द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियत्रिकं याति विकलेन्द्रियास्तेषु भवन्तीत्यर्थः, विकलानामागतिद्वारं विवर्णितम् ॥ ३८ ॥

अथ गर्भजतिरश्चां गत्यागतिद्वारमाह–

**गमणागमणं गब्भय–तिरिआणं सयलजीवठाणेसु, । सव्वत्थ जंति मणुआ, तेऊवाऊहिं नो जंति ॥३९॥**

(अव०) गर्भजतिर्यंचो मृत्वा चतुर्विंशतिदंडकेषु यांति। चतुर्विंशतिदंडकेभ्यश्चोत्पद्यंते इति गर्भजतिर्यग्गत्यागती। मनुजा मनुष्या सर्वत्र यांति। सर्वत्रेतिवचनबलात् चतुर्विंशतिदंडकजीवेषु कालक्षेत्रसंहननसद्भावे च सिद्धावपि यांति। आयांतश्च मनुजास्तेजोवायुवर्जितेभ्यो द्वाविंशतिदंडकेभ्यः समायांति। इति समर्थिते सविस्तरं गत्यागतिद्वारे। अथ चतुर्विंशं वेदद्वारमाह।

टीका– गमणेति॰ सकलजीवस्थानेषु चतुर्विंशतिदण्डकेषु गर्भजतिरश्चां गमनागमने–गत्यागती भवतः। अथ मनुष्याणां गतिमाह–सर्वत्र चतुर्विंशतिदण्डकेषु मनुष्या यान्ति गच्छन्ति। अथ मनुष्याणां गतिद्वारं प्रोच्यते–द्वाविंशतिदण्डकेभ्यो उद्धृ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताश्च्युता जीवा मनुष्या भवन्ति, तेजोवायुभ्याम् च्युता जीवा मनुष्यत्वेन नोत्पद्यन्ते, न मनुष्या भवन्तीत्यर्थः । सूत्रपाठत्वात् अत्र क्वापि व्यस्तं प्रतिपादितं, अनुक्रमेण नोक्तमित्यर्थः । गत्यागतिद्वारे विवर्णिते ॥ ३९ ॥

**अथ चतुर्विंशतितमं वेदद्वारमाह—**

**वेयतिय तिरिनरेसु, इत्थी पुरिसो य चउविहसुरेसु । थिरविगलनारएसु, नपुंसवेओ हवइ एगो ॥४०॥**

(अव०) वेदत्रिकं तिर्यङ्नरेषु, स्त्रीवेदः पुरुषवेदश्च, चतुर्विधसुरेषु, स्थिरविकलनारकेषु नपुंसकवेद एक एव भवति। अथ संक्षिप्तसङ्ग्रहणीगाथाद्वयानुक्तमपि सोपयोगित्वात्किंचिज्जीवाल्पबहुत्वं दर्श्यते ॥४०॥

टीका—वेअतियेति० तिर्यग्नरेषु पुरुषस्त्रीनपुंसकलक्षणा वेदा भवन्ति । तथा चतुर्विधसुरेषु स्त्रीपुरुषलक्षणौ वेदौ भवतः । च पुनः स्थावरविकलेन्द्रियनैरयिकेष्वेको नपुंसकलक्षणो वेदो भवति । अत्र चकारः समुच्चयार्थः । तत्र येन स्त्रियं प्रति अभिलाषः स्यात् स नरवेदः तृणदाहतुल्यः । येन पुरुषं प्रति अभिलाषः स्यात् स स्त्रीवेदः करीषदाहतुल्यः । येन पुंस्त्रीविषये अभिलाषः स्यात् स नपुंसकवेदः नगरदाहतुल्यः । वेदद्वारं प्ररूपितम् ॥४०॥

**अथ गाथाद्वयेनाल्पबहुत्वद्वारमाह—**

**पज्जमणु बायरग्गी, वेमाणियभवणनिरयवंतरिया । जोइस चउ पणतिरिआ, बेइंदि तेइंदि भू आऊ ॥४१॥**



For Private and Personal Use Only

वाऊ वणस्सइच्चिय, अहिआ अहिआ कमेणिमे हुंति। सव्वेवि इमे भावा, जिणा ! मएऽणंतसो पत्ता ॥४२॥

(अव०) पज्जत्तिपदं बायरत्तिपदं च वदतः सूत्रकृतोऽयमाशयः, यदहं पर्याप्तबादरजीवविषयमेवाल्पबहुत्वं वदिष्यामि नोऽपर्याप्तसूक्ष्मविषयमिति । इह संसारे स्तोकाः पर्याप्तमनुष्याः । मनुष्येभ्यो बादराग्निजीवाः असंख्यातगुणाः । एभ्यो वैमानिका असंख्यातगुणाः । एभ्यो भवनपतयोऽसंख्यातगुणाः । एभ्यो नारका असंख्यातगुणाः । एभ्यो व्यंतरा असंख्यातगुणाः । एभ्यो ज्योतिष्काः संख्यातगुणाः । एभ्यश्चतुरिंद्रियाः संख्यातगुणाः । एभ्यो पंचेन्द्रियास्तिर्यंचो विशेषाधिकाः । एभ्यो द्वींद्रिया विशेषाधिकाः । एभ्यस्त्रीन्द्रिया विशेषाधिकाः । एभ्यः पृथ्वीकाया विशेषाधिकाः । ततोऽप्काया विशेषाधिकाः । अप्कायिकेभ्यो वायुकायिका असंख्यातगुणाः । ततो वनस्पतयोऽनन्तगुणाः । संख्यातगुणेन असंख्यातगुणेन अनन्तगुणेन च यथासम्भवमिमे जीवाः क्रमेणाधिका भवन्ति । अथ ग्रन्थकारो जिनान् स्तौति । सर्वेऽपि च इमे पूर्वोक्ता भावाः तेषु तेषु जीवस्थानकेषु गमनागमनरूपाः हे जिनाः मया भवे भ्रमता अनन्तशः अनन्तकृत्वः प्राप्ताः यथा मया तथाऽन्यैरपि जीवैः एतेन स्वामिनः पुरः स्वदुःखं निवेदितम् । अथ तद्विमोचनलक्षणां प्रार्थनामाह ।

टीका—पज्जमणुइत्ति० पज्जत्ति बायरत्ति पदं वदतः सूत्रकृतोऽयमाशयः-यदहं पर्याप्तबादरजीवविषयमेवाल्पत्वबहुत्वं वदिष्यामि नापर्याप्तसूक्ष्मविषयमिति । इह संसारे सर्वजीवेभ्यः सर्वस्तोकाः गर्भजमनुष्यास्तेभ्योबादराग्नयः पर्याप्ताः असंख्येयगुणाधिकास्तेभ्यो वैमानिका देवा असंख्येयगुणाधिकास्तेभ्यो भवनवासिनो देवा असंख्येयगुणाधिकास्तेभ्यो नैरयिका असंख्येयगुणा-



For Private and Personal Use Only

धिकास्तेभ्योऽव्यन्तरा असंख्येयगुणाधिकास्तेभ्यो ज्योतिष्काः संख्येयगुणाधिकास्तेभ्यश्चतुरिन्द्रियाः पर्याप्ताः संख्येयगुणाधिकास्तेभ्यः संज्ञिनः पञ्चेन्द्रिया विशेषाधिकास्ततो द्वीन्द्रिया विशेषाधिकास्ततस्त्रीन्द्रिया विशेषाधिकास्तेभ्यः पृथवीकायिका जीवा असंख्यातगुणाधिकास्तेभ्योऽप्कायिका जीवा असंख्यगुणाधिकास्तेभ्यो वायुकायिका जीवा असंख्येयगुणाधिकास्तेभ्यो वनस्पतिकायिका जीवा अनन्तगुणाः क्रमेण इमे पूर्वोक्तपदार्थाः अधिका अधिका भवन्ति, मनुष्यादिवनस्पत्यन्तसानान् शब्दान् प्रति प्रत्येकं भवन्तीति क्रिया प्रयोज्येत्यर्थः। अत्र चकारः समुच्चयार्थः। घण्टालालान्यायेन पूर्वमग्रतः सर्वत्र अधिका भवन्ति च इति ग्रहणीयम्, अल्पबहुत्वद्वारं समाप्तम्। अथ गाथोत्तरार्धेन (दण्डकभ्रान्ति दर्शयति–) सर्वेऽपि च इमे पूर्वोक्ता भावाः पर्याप्तास्तेषु तेषु जीवस्थानेषु गमनागमनरूपाः हे जिना! मया भवे भ्रमता अनन्तशोऽनन्तकृत्वः प्राप्ताः। यथा मया तथाऽन्यैरपि जीवैः। एतेन स्वामिनां पुरः स्वदुःखं निवेदितम्। अथ तद्विमोचनलक्षणां प्रार्थनामाह–सव्वेवि इमे भावेति० हे जिना! हे परमेष्ठिनो! मया सर्वेऽपि इमे चतुर्विंशतिदण्डकभावाः अनन्तशः प्राप्ताः अनन्तवारान् संप्राप्ता इत्यर्थः अनन्तवारान् अनन्तशः ॥४१॥४२॥

**संपइ तुम्ह भत्तस्स, दंडगपयभमणभग्गहिययस्स। दंडतियविरय(इ) सुलहं, लहुं मम दिंतु मुक्खपयं ॥४३॥**

(अव०) हे जिना इति पदं पूर्वस्थितमिहापि गृह्यते। तेन हे जिनाः! सम्प्रति इह भवे भवतां भक्तस्य त्रिकरणशुद्ध्या भक्तिमतः। दण्डकपदेषु सूक्ष्मबादरपर्याप्तरूपेषु भ्रमणं पुनः पुनर्गत्यागतिरूपं तस्माद्भग्नं निवृत्तं हृदयं मनो यस्य एवंविधस्य मम विज्ञप्तिकर्त्तुः। दण्डत्रिकात् मनोवाक्कायानर्थप्रवृत्तिरूपाद्विरतानां सुलभं सुप्रापं दण्डत्रिकविरतसुलभं मोक्षपदं लघु शीघ्रं भवन्तो

ददतु वितरन्तु ॥४३॥ ग्रन्थकारः स्वनाम कथयति–

टीका—सम्पइ तुम्हेति० हे जिना ! हे परमेष्ठिनो भवन्तः सम्प्रति शीघ्रं मम मोक्षपदं–शिवपदं ददतु दिशन्तु दिन्तु इति क्रियापदं भवन्त इति कर्तृपदमध्याहार्यं । अथवा प्राकृते हि सर्वे विधयो विकल्प्यन्ते इतिवचनात् युष्मदर्थे अन्यदर्थवचनप्रवृत्ति-रित्यर्थः । कथम्भूतं ? मोक्षपदं दण्डत्रिकविरतिसुलभं दण्ड्यन्ते सर्वस्वापहारेण लुप्यन्ते जन्तवः प्राणिन एभिरिति दण्डाः मनोवाक्कायरूपा इत्यर्थस्तेषां त्रिकं दण्डत्रिकं दण्डत्रिकस्य विरतिर्विरमणं दण्डत्रिकविरतिः दण्डकत्रिकविरत्या सुलभं सुप्रापं दण्डत्रिकविरतिसुलभं किंभूतस्य मम भक्तस्य–भक्तिमतः केषां ? युष्माकं पुनः किंभूतस्य मम ? दण्डकपदभ्रमणभग्नहृदयस्य दण्डकपदेषु सूक्ष्मबादरपर्याप्तापर्याप्तरूपेषु भ्रमणं पुनर्गत्यागतिरूपं तस्मात् भग्नहृदयस्य निवृत्तचित्तस्येत्यर्थः । दण्डकानां पदानि दण्डकपदानि दण्डकपदेषु भ्रमणं दण्डकपदभ्रमणं दण्डकपदभ्रमणात् भग्नं–निवृत्तं हृदयं–चित्तं यस्य स दण्डकपदभ्रमणभग्नहृदय-स्तस्य दण्डकपदभ्रमणभग्नहृदयस्य इति गाथार्थः ॥४३॥

सिरिजिणहंसमुणीसर–रज्जे सिरिधवलचंदसीसेण । गजसारेण लिहिया, एसा विन्नत्ति अप्पहिया ॥४४॥

(अव०) श्रीजिनहंसमुनिनामानो ये श्रीजिनसमुद्रसूरिपट्टप्रतिष्ठिताः मुनीश्वराः खरतरगच्छाधिपतयः । तेषां राज्यं गच्छा-धिपत्यलक्षणं तस्मिन् विजये सैद्धान्तिकशिरोमणीनां श्रीधवलचन्द्रगणीनां शिष्येण संविग्नपण्डिताभयोदयगणि लालितपालितेन गजसारगणिना नाम्ना साधुना । एषा विचारषट्त्रिंशिकारूपा श्रीतीर्थकृतां विज्ञप्तिर्लिखितेतिपदेनौद्धत्यं परिहृतं । यद्वा पूर्वं



For Private and Personal Use Only

यन्त्रपत्रतया लिखिता ततः सुगमतायै सूत्रतया गुम्फिता इत्यर्थः । किंभूता आत्महिता अनेन "न भवति हि धर्मः श्रोतुः, सर्वस्यैकान्ततो हितश्रवणात् । ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति ॥१॥" इति सूक्तं स्थापितम् ॥४४॥

निधिमुनिशरेन्दु (१५७९) संवल्लिपीकृता पत्तनेऽवचूर्णिरियम् । संशोध्या धीमद्भिर्मत्वेदं बालचापल्यम् ॥१॥

॥ श्रीगजसारमुनिप्रणिता स्वोपज्ञाऽवचूर्णिः समाप्ता ॥

टीका–सिरिजिणेति० हे जिनाः ! जिनहंसमुनीश्वरराज्ये गजसारेण एषा विचारषट्त्रिंशिकाकरणरूपा विज्ञप्तिर्लिखिता । किंभूतेन गजसारेण ?–श्रीधवलचन्द्रशिष्येण श्रिया युक्तो धवलचन्द्रः श्रीधवलचन्द्रस्तस्य शिष्यः श्रीधवलचन्द्रशिष्यस्तेन श्रीधवलचन्द्रशिष्येण, किंभूता विज्ञप्तिः ?–आत्महिता आत्मने हिता आत्महिता, परेषां बोधो भवतु वा मा भवतु परं वक्तुर्बोधो भवति, यदुक्तं–अस्तु वा माऽस्तु वा बोधः, परेषां कर्मयोगतः । तथापि वक्तुर्महती, निर्जरा गदिता जिनैः ॥१॥४४॥

## अथ टीकाकारप्रशस्तिः—

(आर्या) श्रीहीरविजयसूरीश्वरा बभूवुर्जगत्त्रयीविदिताः ।
तद्वाचका महोदयराजः श्रीभानुचन्द्राह्वा ॥ १ ॥
जयन्तु ते वाचकभानुचन्द्रा, अभ्यस्तसद्वाङ्मयवीततन्द्राः ।
ये मानसे हंसतया बभूवुरकब्बरक्षोणिपतेस्तु भूतेः ॥ २ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





श्रीभानुचन्द्रामलपट्टचारुप्रासादशृङ्गार्जुनकुम्भकल्पाः ।
ते सन्तु चारूदयचन्द्रसन्तः, सुखापनाः सूरिकलालसन्तः ॥ ३ ॥
सर्व्वार्थसार्थाकृतिकामधेन्वाः, यस्य प्रसादाद् गुणचक्रधाम्नः ।
षट्त्रिंशिकायाः किल रूपचन्द्रो, वृत्तिं चकारोदयचन्द्रशिष्यः ॥ ४ ॥
संवत्शरर्ष्यङ्गनिशेश १६७५ वर्षे, ज्येष्ठस्य कृष्णेतरचारुपक्षे ।
षष्ठ्यां तिथौ वाक्पतिवर्यवारे, स्वस्यावबोधाय विनिर्मितेयम् ॥ ५ ॥
अनुष्टुभ्-ग्रन्थाग्रगणितं सर्वं, संख्ययाऽत्र विनिश्चितम् ।
षट्त्रिंशदधिकं पञ्च, शतं जातमनुष्टुभाम् ॥ ६ ॥

॥ श्रीरूपचन्द्रमुनिप्रणिता वृत्तिः समाप्ता ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# श्रीदंडकप्रकरण – परिशिष्टम्

## –: अ....ल्प....ब....हु ...त्व :–

दंडक पदोमां उतारवा योग्य २४ द्वारोमां जो के अल्पबहुत्व द्वार नथी, तो पण जाणवामां अति उपयोगी होवाथी अहीं 'अल्पबहुत्व द्वार' पण उताराय छे (एटले क्या दंडकना जीवो अल्प अने क्या दंडकना जीवो तेथी अधिक छे ते कहेवाय छे.) * पर्याप्त मनुष्यो सर्वथी अल्प छे. * पर्याप्त मनुष्यथी बादर अग्निकायना जीवो [1]अधिक (अधिक एटले पूर्व संख्याथी असंख्यात गुण जीवो जाणवा.) * बादर अग्निकायथी वैमानिक देवो [1]अधिक छे. * वैमानिक देवोथी नारको [1]अधिक छे, * नारकोथी व्यंतर-देवो [1]अधिक छे, * व्यंतर देवोथी ज्योतिषी देवो [1]अधिक छे, * ज्योतिषी देवोथी चतुरिन्द्रिय जीवो [1]अधिक छे. * चतुरिन्द्रिय जीवोथी पंचेन्द्रिय तिर्यञ्चो [2]अधिक छे, [[2]अधिक एटले पूर्व संख्याथी विशेषाधिक (एटले संपूर्ण द्विगुण नहि) जीवो जाणवा] * पञ्चेन्द्रिय तिर्यञ्चोथी द्वीन्द्रियजीवो [2]अधिक छे. * द्वीन्द्रिय जीवोथी त्रीन्द्रियजीवो [2]अधिक छे. * त्रीन्द्रिय जीवोथी पृथ्वीकायजीवो [1]अधिक छे. * पृथ्वीकाय जीवोथी अप्कायजीवो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अधिक छे. * अप्काय जीवोथी वायुकायजीवो अधिक (असंख्यगुण) छे. * वायुकाय जीवोथी वनस्पतिकाय जीवो अधिक (अनन्तगुण) छे. ए प्रमाणे ए २४ दण्डको अनुक्रमे निश्चय एक बीजाथी अधिक अधिक छे.

इति दण्डक प्रकरण – परिशिष्टम्

* सावचूर्णीकम् – सटीकम् *

# श्रीदंडकप्रकरणं समाप्तम्.

卐 卐



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ॐ ह्रीं अर्हं नमः ॥

॥ राजनगरमंडन श्री मूलेवापार्श्वनाथाय नमः ॥

॥ शासनरत्न श्री वृद्धि-नेमि-उदय-मेरुप्रभसूरीश्वरेभ्यो नमः ॥

# ॥ सटीकः श्रीलघुसङ्ग्रहणी (श्रीजम्बूद्वीपक्षेत्रसङ्ग्रहणी) ॥

० स....म्पा....द....क ०

प्रशान्तमूर्ति पू. आ० भ० श्री विजयउदयसूरीश्वरजी म. सा.

पट्टालंकार निडरवक्ता पू० आ० भ० श्री विजयमेरूप्रभासूरीरजी म. सा.

अन्तेवासी पू. पं. श्रीइन्द्रसेन विजयजी गणिवर्य

० संकलक - पू. गणि. श्री सिंहसेनविजयजीम. ०

० प्रकाशक- श्री जैन ग्रन्थ प्रकाशक सभाअहमदाबाद

वि. सं. २०४२ 卐 वीर सं. २५१२ 卐 नेमि सं. ३७

१ नत्वा श्रीवीरजिनं संदर्शितविश्वविश्ववस्तु चयं । श्रीक्षेत्रसंग्रहण्या वृत्तिं कुर्वे यथाशक्तिम् ॥१॥

For Private and Personal Use Only

दचैकान्तवादि संदोहारसादीनां गिरा स्वर्गाऽपवर्गानावानुवादानां श्री हरिभद्रसूरिपादानां कृतौ व्यांचिख्यासायां मादृशस्याल्प-मेधसः कोऽवकाशस्तथाऽप्यर्थनिपुणप्रकरणरागात् स्वशक्तिमजानानोऽप्युपचक्रमे ।

इह तावत् सूत्रकारः प्रथमचतुरतिशयस्वरूप भगवन्नमस्कार–मङ्गलाद्यभिधायिका शिष्टोपदिष्ट मार्गानुसरणार्थमाद्यगाथामाह–

**नमिय जिणं सव्वन्नूं जयपुज्जं जयगुरुं महावीरं । जंबुद्दीवपयत्थे वुच्छं सुत्ता सपरहेउं ॥१॥**

नमियजिणेत्यादि । महावीरं नत्वा जम्बूद्वीपपदार्थान् वक्ष्ये इति सम्बन्धः । तत्र कर्मविदारणादिगुणाद् वीरः । उक्तं च–

विदारयति यत् कर्म तपसा च विराजते । तपो वीर्येण युक्तश्च तस्माद् वीर इति स्मृतः ॥

ततो महांश्चासौ वीरश्च महावीरश्चरमतीर्थंकरस्तं नत्वा प्रणम्य किंविशिष्टमित्याह–रागादीनष्टादशान्तरङ्गारीन् जयत्यभि-भवतीति जिनस्तं तथोक्तम् । इत्यनेनापायापगमातिशयः अपायरूपान्तरारिक्षयात् तथा सर्वज्ञं सर्वं जीवाऽजीवगतिस्थित्यादिकं जानाति वेत्तीति सर्वज्ञस्तं तथाविधम् । इह ज्ञान ग्रहणेन दर्शनमपि गृहीत तेन सर्वदर्शिनमित्यपि प्रत्येतव्यम् । तन्नान्तरीयकत्वाद् एतेन तु ज्ञानातिशयः सूचितः तथा जगत्पूज्यस्तं तथाप्रकारम् । अनेन तु विशेषणेन पूजातिशयः पुनः कीदृशं जगद्गुरुं इह जगच्छब्देन चतुर्दशरज्ज्वात्मक लोकपरिग्रहस्ततो जगच्चराचरं गृणाति कथयति जगद्गुरुस्तम् । अनेक द्वीप–सागरसुरालय नैरयिकालयादिपूर्ण जगद्द्वार(?)मित्यर्थः । मूक केवलिनो हि सर्वदर्शिनोऽपि वचनसामर्थ्याभावान्न विश्वस्वरूपं निरूपयितुमलंभूष्णवो भवन्त्यनेन तदव्यवच्छेदाद् वचनातिशयः प्रत्यपादि एवं गाथार्द्धे भगवन्नमस्काररूपं मङ्गलमुक्तम् । अपरार्द्धे तु अभिधेयादीनाह–



For Private and Personal Use Only

जंबुद्दीवेपयत्थे त्ति। जम्बूवृक्षविशेषस्तेन उपलक्षितो द्वीपो जम्बूद्वीपः। उत्तरकुरुक्षेत्रे हि नीलवद् वर्षधर माल्य बद्धयस्त्रन्तर (?) शीतोदानदीनां बहुमध्यदेशभाग बहुविधवृक्षलक्षितो जम्बूवृक्षोऽस्ति तन्नाम्नाऽयं जम्बूद्वीपः। उक्तं च भगवत्यङ्गे—

से केणट्ठेणं भंते। एवं वुच्चइ ? जंबुद्दीवे दीवे गोयमा ! जंबुद्दीवे णं दीवे मंदरस्स पव्वयस्स उत्तरेणं लवणस्स दाहिणेणं जाव तत्थ तत्थ बहवे जंबुरुक्खा जंबुवणा जाव उवसोहेमाणा चिट्ठंति से तेणट्ठेणं गोयमा एवं वुच्चइ जंबुद्दीवे दीवे। तत्र पदार्थाः क्षेत्र पर्वत नदी वनादयोऽभिधेय—वस्तुस्वरूपास्तान् किं करिष्यामीत्याह—वुच्छं त्ति वक्ष्यामि अभिधास्यामि इहाऽस्मदर्थक्रियायोगान् सूत्रेऽनुक्तेऽप्यहमित्यात्मनिर्देशो ज्ञातव्यः। जम्बूद्वीपपदार्थान् वक्ष्याम्यनेन त्वभिधेयनिगदितं न भवतोऽतिशायि—ज्ञानमन्तरेण चक्षुरगोचरस्तावत् क्षेत्रस्वरूप प्ररूपणप्रवीणताऽस्तीत्यादि परप्रश्ननिराकरणायाह—सुत्त त्ति सूत्रं—सिद्धान्तो गणधरादिरचितं जंबूद्वीप प्रज्ञप्ति क्षेत्रसमासादि तस्मात्, न स्वमत्यनुसारेण किमर्थमेतावान् प्रयासः क्रियत इत्याह—सपरहेउ त्ति स्व आत्मा परोऽन्यस्त- योर्हेतुनिमित्तं तदर्थमित्यर्थः एनेन सम्बन्धोऽभिहितः। स च स्वपरभेदाद् द्विधा। पुनरेकैकोऽनन्तरपरम्पर भेदाद् द्वेधा। तत्रानन्तरकर्तर्भव्यसत्त्वानुग्रहः परस्य श्रोतुस्त्वेतदर्थावगमो जंबूद्वीप विचारज्ञानरूपः परम्परस्तु द्वयोरपि परमपदावाप्तिरिति ॥१॥ अभिधानं तूत्तरत्र गाथायां स्वयमेव सूत्रकारो भणिष्यति इदानीमभिधेयरूपदशद्वारपुरस्सरं कविः प्रकरणाभिधानमाह—

**खंडा१ जोयण२ वासा३ पव्वय४ कूडा य५ तित्थ६ सेढीओ७।**
**विजय८ द्दह९ सलिलाओ१० पिंडेसिं होइ संघयणी ॥२॥**

खंडेत्ति । तत्र खंडानि विस्तारेण भरतप्रमाणानि योजनानि घनीकृतरूपाणि वर्षाणि भरतक्षेत्रादीनि पर्वता वैताढ्यादयः कूटानि वैताढ्यादिपर्वतशिरः स्थितानि शृङ्गरूपाणि सिद्धायतनकूटादीनि तीर्थानि मागधादीनि श्रेणयो दीर्घवैताढ्येषु पार्श्वद्वयेऽपि विद्याधर नगराऽऽभियोगिकदेवनिवासश्रेणयः विजया कच्छादयः हूंदाः पद्मादयो महाहूदःसलिला गङ्गाद्याः । इह समास एवं कर्तव्यो योजनानि च वर्षाणि च योजनवर्षाणि प्राकृतत्वाल्लिङ्गव्यत्ययः एवमग्रेऽपि नवरं तीर्थानि च श्रेणयश्च तास्तीर्थश्रेणयः स्त्रीपुंनपुंसकानां सहवचने स्यात् परं लिङ्गमिति वचनात् स्त्रीत्वम् एवमग्रेऽपि विज्ञेयं पिंडेसिं होइ संघयणि त्ति । एषां दशानां वर्णनीयपदार्थानां पिण्डःसमवायः सङ्ग्रहणिर्भवति पिण्डशब्दः समूहेऽप्यस्ति यदाह–हैमाऽनेकार्थः–पिंडो वृंदे जपा पुष्पे गोलेवो लिंगसिल्हयो रिति एतानि खंडादीनि दशापि परमार्थतः क्षेत्रमेव तत एवं निरुक्तिःक्षेत्रं जम्बूद्वीपलक्षणं संगृह्यते उपादीयतेऽनयेति क्षेत्रसङ्ग्रहणिः अवयवे समुदायोपचारात् । इमानि दश द्वाराण्यत्र प्रकरणेऽभिधास्यन्त इति ॥ छ ॥ २ ॥

अथ यथोद्देशस्तथा निर्देश इति न्यायमाश्रित्य प्रथमं गाथात्रयेणखंडान्याह—

नउयसयं खंडाणं भरहपमाणेण भाइए लक्खे । अहवा नउय सयगुणं भरहपमाणं हवइ लक्खं ॥३॥

नउयसये त्ति । समस्तमपि जम्बूद्वीपं नवत्युत्तरं शतं खंडानां भणिष्यमाणप्रकारेण भवतीति शेषः । क्षेत्रपर्वतविस्तारमाश्रित्य खण्डानि ज्ञातव्यानि । यतः धनुष्पृष्टाकारत्वादाद्यं भरतक्षेत्रं लघीयस्ततःपराणि क्रमेण दीर्घतराणि यावन्महाविदेहो मध्यविभागे योजन लक्षदैर्ध्यः । कियत्प्रमाणानि खण्डानि भवन्तीत्याह–भरहपमाणेणेत्यादि भरतं परमवर्षं तस्य प्रमाणं–मानं षड्विंशत्यधिक

पंच योजनशतानि स योजनैकोनविंशषड्भागानि तेन भाजिते भागे हृते सति यल्लभ्यते तत्समानि खण्डानि भवन्ति। तद्यथा-जम्बूद्वीपविष्कम्भो योजनलक्षं एक एकस्तदग्रे पञ्चशून्यानि ध्रियन्ते १००००० एष भाज्यराशिः भरतमानं तु प्राक्कथितं यो० ५२६ क०६। अयं च भागहारस्ततो लब्धं नवत्युत्तरशतं १९० एतानि सर्वजम्बूद्वीपखण्डानि। पुनर्विधानान्तरेण खण्डानयनायोपायनाह—

अहविग खंडे भरहे दो हिमवंते य हेमवई चउरो। अट्ठ महा हिमवंते सोलसखंडाइं हरिवासे ॥४॥

अहवेत्यादि। अथवा प्रकारान्तरेण भरतप्रमाणमुक्तस्वरूपं नवत्यधिकेन शतेन गुणितं जम्बूद्वीपविष्कम्भमानं लक्षयोजनरूपं भवति। तथाहि—भरतमानं यो० ५२६ क० ६। एष मूलराशिः नवत्युत्तर शतं च १९० गुणकारः ततो गुणिते लब्धं योजनानि लक्षं १००००० । एतत् पुनर्जम्बूद्वीपमानमिति।

पुनर्मुग्धाववोधनार्थं वर्षाणि आश्रित्य तृतीयं प्रकारमाह—अहवेत्ति-

बत्तीसं पुण निसढे मिलिया तेसट्ठि बीयपासेऽवि। चउसट्ठी उ विदेहे तिरासिपिंडे उ नउयसयं ॥५॥

बत्तीसमिति। अहवे त्ति विकल्पान्तरे भरते भरत नाम्नि क्षेत्रे एकमेकसंख्याकं खंडं भवतीत्यादि। शेषोऽध्याहार्य्यः खण्डप्रमाणत्वात् तस्य यदुक्तम्-

पंचसए छव्वीसे छच्चकलाविथ्थडं भरहवासम् इति। तथा दो हिमवंत त्ति हिमवति वर्षधरे द्वे द्विसंख्ये खण्डे भवतः। यतो भरतक्षेत्रात् पराणि वर्षधरवर्षाणि क्रमेण द्विगुण द्विगुण विस्ताराणि। तदुक्तम्-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भरहेरवयप्पभिई, दुगुणादुगुणो य होइ विक्खंभो। वासावासहराणं, जाव य वासं विदेहं ति ॥

तथा हेमवइ चउरुत्ति हेमवते द्वितीये क्षेत्रे चत्वारि चतुः संख्याकानि खण्डानि। अट्ठेत्यादि महाहिमवति द्वितीये वर्षधरेऽष्टौ खण्डानि हरिवर्षे तृतीयक्षेत्रे षोडशखण्डानि तथा बत्तीसमित्यादि निषधे तृतीयवर्षधरे पुनर्द्वात्रिंशत् खण्डानि भवन्तीति सर्वत्र सम्बध्यते। इति महाविदेहव्यतिरिक्तेषु दक्षिणदिग्वर्तिषु वर्षवर्षधरेषु सर्वमीलने त्रिषष्टिखण्डानि जातानि। इदानीमुत्तरदिग् व्यवस्थित क्षेत्र वर्षधरखण्डानि निरूपयति–मिलियेत्यादि। एवमेव मिलितानि समुदितानि त्रिषष्टिःखण्डानि द्वितीयपार्श्वेऽपि भवेयुस्तद्यथाएकंखण्डमैरावते, द्वे शिखरिगिरौ, चत्वारि हैरण्यवतक्षेत्रे, अष्टौ रुक्मिपर्वते, षोडशरम्यक्क्षेत्रे, द्वात्रिंशत तु नीलवति वर्षधर इति। चउसट्ठीत्यादि। इह पदैकदेशेऽपि पदसमुदायोपचाराद् विदेह इति महाविदेहे सर्ववर्ष वर्षधरमध्यवर्तिनि क्षेत्रे चतुःषष्टिःखण्डानि भवन्ति। एतावता सर्वसंख्यया किं जातमित्याह–तिराशीत्यादि त्रयश्च तेराशयश्च त्रिराशयस्तेषां पिण्डः समूहः यद्वा त्रयाणां राशीनां समाहार स्त्रिराशि तस्य पिण्डस्तस्मिन् तु पुनरर्थे नवत्यधिकं शतं खण्डानि स्युरिति गाथाद्वयार्थः ॥५॥

अथ जम्बूद्वीपे योजनपरिमाणानि खण्डानि कियन्ति भवन्तीत्यादिकं घनीकृतयोजनद्वारं गाथापञ्चकेनाह–

**जोयण परिमाणाइं समचउरंसाइं इत्थ खंडाइं। लक्खस्स य परिहीए तप्पायगुणे य हुंतेव ॥६॥**

जोयणे त्ति। खण्डप्रमाणमजानानं शिष्यं प्रति गुरुस्तत्प्रमाणमाचष्टे। अत्राऽस्मिन् जंबूद्वीपे प्रक्रान्तप्रकरणे वा घनीकृतयोजनपरिमाणानि सम चतुरस्राणि खण्डानि योजनानि भण्यन्ते। समास्त्वल्पप्रमाणाश्चत्वारोऽस्राः कोटयो येषां तानि तथोक्तानि ॥ ३ ॥

For Private and Personal Use Only

तथाहि–कल्पनया किल कश्चिद्देवः सकलमपि जम्बूद्वीपं योजनप्रमाणेष्टिकश्चितं करोति प्रतरविस्तारेण तत्प्रमाणा यावन्त्य इष्टिका भवन्ति तावन्त्येव योजनखण्डानि भवेयुः तदानयनाय करणमाह–लक्खस्सेत्यादि । लक्षस्येति योजनलक्षप्रमाणे वृत्तक्षेत्रं तस्य परिधिर्बाह्यपरिमण्डलं, भविष्यमाणप्रमाणं तस्य । तप्पायगुणे त्ति तस्य लक्षस्य यः पादश्चतुर्थांशः पञ्चविंशतिसहस्ररूपस्तेन गुणो गुणकारस्तस्मिन् कृते सति । चःसमुच्चये । किं भवतीत्याह–ते हुंति त्ति प्राकृतत्वाल्लिङ्गव्यत्ययः ततस्तानि योजनप्रमाणानि खण्डानि भवन्ति सम्पद्यन्ते तथाहि लक्षस्य परिधौ पञ्चविंशत्या सहस्रैर्गुणिते वाञ्छिते को लभ्यत इति भावः स चोत्तरत्र प्रपञ्चेन भणिष्यते ॥छ॥६॥

अधुना यदुक्तं लक्खस्स य परिहीए इति परिधेर्नामकीर्त्तनं तस्यानयनाय करणगाथामाह–

**विक्खंभ वग्गदहगुणकरणी वट्टस्स परिओ होइ । विक्खंभपायगुणिओ परिओ तस्स गणियपयं ॥७॥**

विक्खंभे त्ति । इह जम्बूद्वीपपरिधिना प्रयोजनं स च वेदिका शिरः कटकजालकबाह्यदिग्विभागवर्त्ती ग्राह्यः । अतो मूले द्वादश योजनानि पृथुला वेदिका तस्याश्च मध्यान्यष्टौ योजनानि जम्बूद्वीपमध्ये ज्ञातव्यानि योजनचतुष्टयमानो बाह्यप्रदेशो लवणसमुद्रमध्ये गण्यते । विक्खंभेत्यादि विक्खंभो विस्तारः तस्य वर्गस्तावतैव गुणनं यथा चत्वारश्चतुर्भिर्गुणिताः षोडश भवन्तीत्यादि । स च दशगुणो दशकेन गुणितः तस्य करणिविषमसमेत्यादिना वर्गमूलानयनम् एवं कृते किं भवतीत्याह–वट्टस्सेत्यादि वृत्तस्य वर्तुलक्षेत्रस्य परिरयः परिधिर्भवति स्यात् । विक्खंभस्य पादेन–चतुर्थांशेन गुणितः सन् परिरयो गणितपदं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवति । किं च सर्ववृत्तक्षेत्राणां परिधिर्गणितपदयोरानयनायायमेव करणविधिरिति गाथाक्षरार्थः। भावार्थ—स्त्वयं। यथा-जम्बूद्वीपस्य विष्कम्भो योजनलक्षमानस्तत एको न्यस्यते तदग्रे पञ्च शून्यानि १००००० तस्य वर्गो विधीयते एककस्याग्रे दशशून्यानि १०००००००००० पुनर्दशगुणने एकशून्यवृद्धिः १००००००००००० एतस्य राशेर्मूलमेतदार्याद्वयानुसारेणाऽऽनेतव्यं। यथा-विषमात् पदतस्त्यक्त्वा, वर्गस्थानच्युतेन मूलेन। द्विगुणेन भजेच्छेषं, लब्धं विनिवेशयेत् पङ्क्त्याम् ॥१॥

तदर्द्धं संशोध्य द्विगुणीकुर्वीत पूर्ववल्लब्धं, उत्सार्य ततो विभजेच्च शेषं द्विगुणीकृतं दलयेत् ॥२॥ इति ततो लब्धाङ्कस्य छेदराशिः षट् लक्षाणि द्वात्रिंशत् सहस्राणि चत्वारि शतानि सप्तचत्वारिंशदधिकानि ६३२४४७ एतानि च प्रान्तवर्ति सप्तकं मुक्त्वा सर्वाण्यर्द्धीक्रियन्ते ततो जातानि त्रीणि लक्षाणि षोडशसहस्राणि द्वे शते सप्तविंशत्यधिके ३१६२२७ शेषमुपरीदमुद्धरति चत्वारि लक्षाणि चतुरशीति चत्वारि शतान्येकसप्तर्गलानि ४८४४७१ अमूनि च योजनानि गव्यूतं चतुर्था शस्तत श्चतुर्भिर्गुणितानि जाता एकोनविंशति लक्षाः सप्तत्रिंशत् सहस्रा अष्टौ शतानि चतुरशीतियुतानां गव्यूतानां १९३७८८४ ततःछेदराशिना षट् लक्षादिना नवरमन्त्यसप्तकमपि द्विगुणं कृत्वा भागे हृते लब्धं गव्यूतत्रितयं शेषमिदमुपरिष्टात् तिष्ठति। चत्वारिंशति सहस्राणि पञ्चशतानि द्वाविंशत्यधिकानि ४०५२२ एकेन गव्यूतेन धनुसहस्रद्वयं भवति तावता च गव्यूतरूपं उद्धरितराशिर्गुण्यते। तद्यथा-अग्रे शून्यत्रयं दत्वा मूलराशिर्द्विगुणो विधीयते जाता अष्टौ कोटयो दशलक्षाश्चतु श्चत्वारिंशत् सहस्राः ८१४४००० पूर्वोक्तच्छेदराशिना भागो ह्रियते लब्धाष्टाविंशत्यधिकं धनुःशतं १२८ शेषमिदमुपरि धनूरूपं तिष्ठति एकोननवतिः सहस्राण्यष्टाशीत्यधिकान्यष्टौ शतानि ८९८८८ ततोऽङ्गुलानयनाय षण्णवत्या एतस्य गुणकारेदत्ते जातानि षडशीतिलक्षाण्येकोनत्रिंशत् सहस्राणि



For Private and Personal Use Only

द्वे शतेऽष्टचत्वारिंशत्यधिके ८६२९१४८ प्राक्तनरीत्या छेदराशिमधो विधाय भागे हृते लब्धानि त्रयोदशाङ्गुलानि १३ उपरीदमत्रशिष्यते चत्वारिलक्षाणि सप्त सहस्राणि षट्चत्वारिंशत्यधिकानि त्रीणि शतानि ४०७३४६ अर्द्धाङ्गुलानयनाय एष राशिर्द्विगुणीक्रियते जातान्यष्टौ लक्षाणि चतुर्दशसहस्राणि षट्शतानि द्विनवत्यर्गलानि ८१४६९२ प्राक्तन नैवच्छेदराशिना भक्ते लब्धमर्द्धमङ्गुले शेषमुद्धरति एका लक्षा द्वाशीतिः सहस्राणि द्वे शतेऽष्टात्रिंशदधिके एष जम्बूद्वीपस्य परिधि रिति ॥ ७ ॥

१८२२३८
६३२४५४ अमुमेवार्थं स्पष्टतरमाह—

**परिही तिलक्खसोलससहस्स दो य सय सत्तवीसहिया। कोसतिगट्ठावीसं धणुसय तेरंगुलद्धहियं ॥८॥**

परिही त्ति। योजनानां तिस्रो लक्षाः षोडशसहस्रा द्वे शते सप्तविंशत्यधिके क्रोशत्रयमष्टाविंशं धनुःशतं त्रयोदशाङ्गुलान्यर्द्धं चाङ्गुलं साधिकं जम्बूद्वीपस्य परिधिः परिक्षेपो भवति। इहाऽधिकग्रहणादेका यूका लिक्षा चैका लभ्यत इत्यादि विशेषार्थिना स्वयमेवाभ्यूह्यम्। सूत्रकारेणोपेक्षितत्वान्मयाऽपि न लिखितमिति ॥ ८ ॥

अधुना जम्बूद्वीपस्य गणितपदे कृते यत् सम्पद्यते तदभिधित्सुराह—

**सत्तेव य कोडिसया नउया छप्पन्नसयसहस्साइं। चउणउयं च सहस्सा सयं दिवड्ढं च साहियं ॥९॥**

**गाउयमेगं पनरस धणूसया तह धणूणि पन्नरस। सट्ठिं च अंगुलाइं जंबुद्दीवस्स गणियपयं ॥१०॥**

सत्तेवयेत्ति । गाउये । त्ति । एवावधारणे सप्तकोटीशतानि नवति कोटयः षट्पंचाशल्लक्षानि चतुर्नवतिसहस्राणि द्वितीयार्द्धं शतं च द्वितीयशतं अर्द्धं यत्र तद्द्वितीयार्द्धं सार्द्धशतमित्यर्थः चः समुच्चये कीदृशमित्याह–साधिकमधिकेन सहितं आधिक्यमेवाविष्करोति ।

गाउयत्ति । एकमेक सख्याक गव्यूतंक्रोशं पञ्चदशधनुः शतानि पञ्चदशोत्तराणीत्यर्थः स च भिन्न– क्रमस्तत एवं योज्यते षष्टिरङ्गुलानि च जम्बूद्वीपस्य गणितपदं भवतीति शेषः इदमुक्तं भवति यदि समचतुरस्राणि समस्त-जम्बूद्वीपस्य योजनप्रमाणानि खण्डानि क्रियन्ते तदा यथोक्तसंख्यानि गव्यूताद्यधिकानि भवन्ति तद्यथा जम्बूद्वीपस्य परिधिर्यो–जनानां तिस्रो लक्षाः षोडश सहस्राणि सप्तविंशशतद्वयाधिकानीत्येवंरूपं पञ्चविंशत्या सहस्रैर्गुणनीयं ततो भवन्ति सप्तकोटीशतानि नवति कोटयः षट् पञ्चाशल्लक्षाणि पञ्चसप्ततिः सहस्राणि ७९०५६७५००० पुनर्गव्यूतित्रितयं पञ्चविंशत्या सहस्रैर्गुणितं जातानि पञ्चसप्ततिः सहस्राणि क्रोशानां ७५००० एषां चतुर्भिर्भागे हृते लब्धा अष्टादश सहस्रा सप्तशती पञ्चाशदधिका योजनानां १८७५० एषोऽङ्कराशिर्मूलराशौ मीलनीयः ततोऽष्टाविंशं धनुःशतं पञ्चविंशत्या सहस्रैर्गुणनीयं जातानि द्वात्रिंशद्धनुषां लक्षाणि ३२००००० अष्टभिर्धनुःसहस्रैर्योजनं भवतीति कृत्वा तदानयनयाऽष्टाभिरेव सहस्रैर्भागो ह्रियते लब्धाश्चत्वारो योजनशताः ४०० एतेऽपि मूलराशिमध्ये प्रक्षेप्तव्याः ततः सार्द्धत्रयोदशाङ्गुलेषु पञ्चविंशत्यैव सहस्रैर्गुणितेषु लब्धानि त्रीणि लक्षाणि सप्तत्रिंशत् सहस्राणि पञ्चशताधिकानि ३३७५०० एषां धनुरानयनार्थं पण्णवत्या भागो ह्रियते जातानि त्रीणि धनुःसहस्राणि पञ्चदशोत्तरपञ्चशताधिकानि ३५१५ षष्टिरङ्गुलानि चोपरिष्टात् पुनर्गव्यूतनयनाय धनुःसहस्रद्वयेन भागे हृते लब्धंगव्यूत–



For Private and Personal Use Only

मेरुमधस्तादुद्धरितानि पञ्चदशशतानि पञ्चदशोत्तराणि धनुषां १५१५ सर्वाङ्कमीलने जातानि सप्तकोटीशतानि नवतिः कोटयः षट्पञ्चाशल्लक्षाणि चतुर्नवतिः सहस्राणि सार्द्धशताधकानि समचतुरस्राणां योजनप्रमाणखण्डानां तथैकं गव्यूतं पञ्चदशोत्तराणि पञ्चधनुःशतानि षष्टिरङ्गुलानि च यो० ७९०५६९४१५० गाउ १ धनुः १५१५ अंगुल ६० इति सर्वजम्बूद्वीपप गणितपदं प्रपञ्चितं तत्प्रपञ्चनेन समर्थितं द्वितीयं योजनद्वारम् ॥ ९-१० ॥

सम्प्रति क्रमायातं तृतीयं क्षेत्रद्वारं गाथायाः प्रथमपादेनाह—

**भरहाइ सत्तवासा वियड्ढ चउचउरतीसवट्टियरे। सोलसवक्खारगिरी दो चित्तविचित्त दो जमगा ॥११॥**

भरहाइ त्ति। वर्षाणि क्षेत्राणि मनुष्यनिवासस्थानानीत्यर्थः। तानि कियत्संख्यानि किं नामानि च भवन्ति ?-इत्याह-सत्ति त्ति सप्त संख्यानि नामतस्तु भरतादीनि आदिशब्दाद्धैमवतहरिवर्ष महाविदेह रम्यकैरण्यवतैरवतानां ग्रहः तथा वर्षशब्दो नपुंसकलिङ्गःपुंस्त्वे प्रयुक्तोऽपि प्राकृतत्वान्न दोषायलिङ्गं व्यभिचार्यपीति वचनात् अमूनि च सर्वक्षेत्राणि स्वाधिष्ठातृदैवतसमान-नामानि तथाहि भरताधिपतिर्यो यो देव उत्पद्यते तं तं तत्सामानिकाद्यादेवा भरत इत्याह्वयन्ते ततस्तन्नाम्ना तदधिष्ठितं क्षेत्रमपि भरतमिति कथ्यते। तथा चागमः-से केणट्ठेणं भंते। भरहे वासे २ इति गोयमा! भरहे देवे महड्ढीए महज्जुए जाव पलिओ-वमट्ठिइए परिवसइ से एएणट्ठेणं गोयमा! एवं वुच्चइ-भरहे वासे भरहे वासे इति एवं हैमवतादिष्वपि भावनीयमिति सङ्क्षेपार्थः। विस्तरार्थस्त्वयं सर्वद्वीपसमुद्राणां मध्ये परिपूर्णचन्द्रमण्डलसंस्थानः सर्वतो लक्षयोजनमानो जम्बूद्वीपोऽस्ति। यदागमः-से णं

जंबूद्दीवे एगाए जगईए सव्वओ समंता सपरिक्खित्ते सा णं जगई अट्ठजोयणाइं उड्ढं उच्चत्तेणं मूले बारस जोयणाइं विक्खंभेणं मज्झे अट्ठ जोयणाइं विक्खंभेणं उवरिं चत्तारि जोयणाइं विक्खंभेणं मूले वित्थिन्ना मज्झे संखित्ता उवरिं तणुया गोपुच्छ संठाण संठिया सव्ववइरीमया अच्छा सण्हा जाव पडिरूवत्ति तस्याश्चोपरिष्टादर्धयोजनोच्चेन पञ्चधनुः शतविस्तीर्णो गवाक्षकटकस्तथा तस्या एव बहुदेशमध्यभागे गवाक्षकटकप्रमाणोच्छ्रायदैर्घ्यो परिक्षेपेण जगतीसमाना नानारत्ननिर्माणा विविधपद्ममंडिता पद्मवरवेदिकाऽस्ति । यदुक्तंराजप्रश्नीयोपांगे—से केणट्ठेणं भंते ! एवं वुच्चइ पउमवरवेइया पउमवरवेइया गोयमा ! पउमवर वेइया णं तत्थ तत्थ देसे देसे तहिं तहिं वेइयासु वेइयाबाहासु य वेइयाफलएसु य वेइयापुडंतरेसु य खंभेसु खंभबाहासु खंभफलएसु खंभपुडंतरेसु सूईसु सूईमुहेसु सूईफलएसु सूईपुडंतरेसु पक्खेसु पक्खबाहासु पक्खफलएसु पक्ख-पुडंतरेसु बहुयाइं पउमाइं कुमुयाइं नलिणाइं सुभगाइं सोगंधियाइं पुंडरीयाइं सयवत्ताइं सहस्सवत्ताइं सव्वरयणामयाइं अच्छाइं पडिरूवाइं महया वासिक्कयछत्तसमणाइं पन्नत्ताइं समणाउसो से एणं अट्ठेणं गोयमा ! एवं वुच्चइ पउमवरवेइया इति तस्याः पार्श्वद्वयेऽपि द्वौ वनखण्डौ वेदिकामानदैर्घ्यौ विद्येते नवरं विस्तारेणाभ्यन्तरः सार्द्धधनुःशतद्वयोनयोजन युग्मप्रमाण बाह्यस्तु वनखण्डोऽर्द्धाष्टमधनुःशतहीन योजनयुग्ममानो यतस्तत्र अन्यान्यप्यभ्यन्तराद् वनखण्डादधिकानि पञ्चधनुःशतानि जालकटकेनावरुद्धानि परं श्रीमलयगिरिपादैर्नैतद् विवक्षितं द्वयोरपि वनखण्डयोरेकमेवमानमुक्तम् । तत्त्वं तु बहुश्रुता विदन्ति तस्यां च वेदिकायां मेरुपर्वतात् पञ्चचत्वारिंशद् योजनसहस्राणि दक्षिणस्यां दिश्यतिगत्य अष्टयोजनोच्छ्रायं चतुर्योजनविस्तारं प्रत्येकमेकैकक्रोशविस्तारया द्वारशाखया कलितं ततःसामस्त्येन सार्द्धयोजनचतुष्टयविस्तारं वैडूर्यमयाभ्यां कपाटाभ्यां वज्रमय्या



For Private and Personal Use Only

परिषया निर्जटितं अनेक सामानिक सुरादिदेवाग्रमहिष्यादिदेवीकृतसेवार्द्धपल्योपमायुर्वैजयंतमानदेवाधिष्ठितं वैजयंताभिधानं द्वारमस्ति ॥९॥

तथाऽमुतो द्वारात् उदीच्यां हिमवन्तं पूर्वापरयोस्तु लवणोदन्वतं यावद्गतं भरतनामकं विजयक्षेत्रं तच्च बहुमध्य देश भागे पूर्वापरयोर्लवणसमुद्रप्राप्तेन पञ्चाशद् योजनविस्तीर्णेन तदर्द्धोच्चेन रजतमयेन वैताढयपर्वतेन द्विधा कृतं तेन दक्षिणभरतार्द्धमुत्तरभरतार्द्धं चेति भण्यते हिमवत्पर्वतोर्द्धतलस्थितात् प्रथमं पूर्वापरयोर्गत्वा स्वस्वनामधेय कूटादावृत्य दक्षिणां दिश-मनुश्रित्य विजयाढ्यपर्वतं विभिद्य दक्षिणलवणोदधिप्रविष्टाभ्यां गङ्गासिन्धूभ्यां तच्च कृतषट्खण्डं तत्र च प्राणिप्राण व्यपरोपणं प्रवणान्तःकरणम्लेच्छ व्याप्तत्वादनार्याणि पञ्च खण्डानि एकं च वैताढ्याद्दक्षिणस्यां दिशि एकादश कलाधिकं चतुर्दशोत्तरं योजनशतमतिगत्य नवयोजन विस्तीर्णया द्वादश योजनदीर्घयाऽयोध्यया नगर्या विराजितं गङ्गासिन्धुवैताढ्यदक्षिणसमुद्राणां मध्यस्थितं जिनचक्रयर्द्धचक्रिप्रमुखोत्तमपुरुषाध्यासितमार्यम् । उक्तं च—आर्यावर्तो जन्मभूमिर्जिनचक्रयर्द्धचक्रिणाम् इति ॥१०॥

तथा वैताढयेऽपाच्यां तमिस्रा गुहाऽस्ति । सा च द्वादशयोजनायामा पञ्चाशद्योजनदैर्घ्या कृत कृतमालदेवनिवासा वैजयंत समान द्वारा तस्याश्च बहुमध्यदेशे द्वियोजनान्तराले प्रत्येकं त्रियोजनविस्तारे उन्मग्नजला निमग्नजले नद्योः स्तः एवं प्राच्यां वृत्तमालदेवाधिष्ठिता खण्डप्रपाता गुहा तस्य च गिरेर्मूलाद् दशयोजनान्युत्प्लुत्य वेदिका वनखण्डमण्डितं पर्वतप्रमाण-दैर्घ्यं प्रत्येकं दशदश योजनविस्तारं विद्याधर नगरश्रेणिद्वयं विद्यते किञ्च दक्षिण दिग्वर्त्तिन्यां श्रेणौ सुप्रजाभिर्जनपदैर्विराजि-तानि रथनूपुरचक्रवालपुरस्सराणि पञ्चाशद् विद्याधरनगराणि उत्तरश्रेणौ तु गगनवल्लभादीनि षष्टिःपुराणि तेषु धरणेन्द्र-

प्रकाशिताऽष्टाचत्वारिंशत् सहस्र महाविद्याप्रसादोपनम्रकम्रसमस्त मनो मनोरथा तिथिपदार्थसमासादित परमानन्द संदोहा गगनगमनसामर्थ्यसमन्वित विद्याधराः सुखमासते पुनर्दशयोजनान्युपरिष्टादारुह्य विद्याधरश्रेणिसमा विषमोन्नत भूमिरिन्द्राभियोगिकदेवकृतनिवासा श्रेणिद्वयी समस्ति। ततोऽपि पञ्चसु योजनेषूपरिदश योजनानि विस्तीर्ण वेदिकां वनखण्डमनोहरमनल्पकल्पवासि देवक्रीडायोग्यं स्थानमास्ते ॥११॥

तत्र सपादषट्योजनोच्छ्रयाणि तावन्त्यूल(?)विस्ताराणि उपरिष्टा सार्द्ध द्वादशक्रोशायामानि नवकूटानि। तथाहि—सिद्धायतन १ दक्षिणार्द्धभरत २ खंडप्रपात ३ मणिभद्र ४ विजयाढय ५ पूर्णभद्र ६ तमिस्रागुह ७ उत्तरार्द्धभरत ८ वैश्रमणनामानि। तेषु माणिभद्रविजयाढयपूर्णभद्रकूटानि हिरण्यमयानि अपराणि षट् रत्नमयानि। प्रथमे पूर्वदिग्वर्त्तिनि क्रोशदैर्घ्यं क्रोशार्द्धं विस्तीर्णं चत्वारिंशदर्गलचतुर्दश धनुःशतोच्छ्रायं सिद्धायतनं तस्मिन् पञ्च धनुः शतोच्चानि तदर्द्धविस्ताराणि त्रीणि द्वाराणि तिसृषु दिक्षु तद्यथा–प्राच्यां प्रथमं द्वारं द्वितीयं दक्षिणस्यां तृतीय मुदीच्यां प्रतीच्यां तु न किञ्चिदिति। किञ्च सर्वेषु सिद्धायतनेषु च जम्बूद्वीपमध्येऽयमेव द्वारदिग्विभागः तस्य हि बहुमध्यदेशे क्रोशचतुर्थायामविष्कम्भा तदर्द्धपृथुला मणिपीठिका तस्या उपरि पञ्च धनुः शतायामविस्तारस्तदधिकोच्छ्रायो देवच्छन्दकस्तत्राष्टोत्तरं शतं प्रतिमाः। ता हि जघन्यतः सप्त हस्तप्रमाणा उत्कर्षतः पञ्च धनुःशतोच्चा ऋषभ वर्द्धमान चन्द्रानन वारिषेणाख्याः सन्ति पूर्णकलशनागदन्तक शालभंजका जालकटकादिरचना विशेषाः सर्व चैत्येषु ज्ञेया। ततः परं भरतार्द्धकूटं तत्र भरतदेवस्य सिद्धायतनप्रमाणः प्रासादः खण्डप्रपात तमिस्रागुहयोर्नृत्तमालकृतमालौ देवौ। अन्येषु पञ्चसु स्वनामानो देवाः प्रासादेषु विलसन्ति तथा हिमवन्नितम्बदक्षिणदिशि

मूले द्वादश योजनानि उपरि चत्वारि विस्तीर्णोऽष्टयोजनोच्छ्रायो ऋषभदेवनिवासो रत्नमयऋषभकूट नामा पर्वतोऽस्ति। स च भूमिकूट इतीहप्रकरणे प्रसिद्धः चक्री षट् खण्डां वसुन्धरां विजित्यास्मिन् स्वनामलिखति ॥१२॥

भरतमुत्तरेण पूर्वापरयोर्लवणसमुद्रं प्राप्तो भरताद् द्विगुणविस्तारो योजनशतोच्छ्रयो हेममयो हिमवान् वर्षधरः तदुपरि बहुमध्यदेशभागे योजनसहस्रदैर्घ्यस्तदर्द्धविस्तारो दशयोजनावगाढो जलपूर्णः पद्महृदः तस्य रजतमयवज्रमयाः पाषाणाश्चतुर्दिश्यां मणिसोपानाः तन्मध्ये योजनायामविस्तारं अर्द्धयोजनपिण्डं दशयोजनोच्चनालं गव्यूतद्वयं जलादुपरिस्थितं पद्मं विद्यते। वज्रमयं तस्य मूलं अरिष्टमयः कन्दः वैडूर्यमयो नालः बाह्यपत्राणि च मध्यानि तु जाम्बूनदमयानि कनकमयी कर्णिका स्वर्णमयानि केसराणि विविधमणिमयं पुष्करं सा च कर्णिका द्विगव्यूतप्रमाणा पृथुला त्वेकं गव्यूतं तस्या उपरि पीठिका देवच्छंदकादियुतं श्रीदेवीभवनं एतादृशेनार्द्धप्रमाणेन कमलानामष्टशतेन वृतं तत्र श्रीदेव्या आभरणानि तद् बाह्ये :वायव्यौदीच्यैशानेषु दिग्भागेषु चत्वारि कमलसहस्राणि ४००० तेषु तावन्त एव सामानिका देवा देव्यौ वा पूर्वस्यां दिशि चतुर्षु पद्मेषु चतसृणां महामन्त्रिसदृशीनां स्थानानि आग्नेय्यामष्टसु पद्मसहस्रेषु श्रीदेव्या अभ्यन्तरायां पर्षदि देवानामष्टौ सहस्राः ८००० दक्षिणस्यां दिशि दशसु पद्मसहस्रेषु १०००० तावन्त एव मित्रस्थानीयादेवाः नैऋत्या द्वादशसु पद्मसहस्रेषु १२००० तावन्त एव किङ्करस्थानीयाः सुरा बाह्यपर्षदि पश्चिमायां सप्तसु पद्मेषु सप्तानामनीकाधिपतीनामाश्रयाः तथा चतसृषु दिक्षु पूर्वादिकासु षोडशसु पद्मसहस्रेषु १६००० आत्मरक्षकदेवानां स्थानानि एतद् वेष्टनकत्रयं मध्यं अपरेऽपि बाह्यास्त्रयः परिरयास्तेष्वभ्यन्तरे परिक्षेपे द्वात्रिंशल्लक्षाणि ३२००००० मध्यमे चत्वारिंशच्छतसहस्राणि ४०००००० अष्टचत्वारिंशल्लक्षाणि

४८०००००० पद्मानां बाह्ये भवन्ति एवं सर्वाग्रेण एका कोटी विंशतिलक्षाणि पञ्चाशत् सहस्राणि विंशत्यधिकमेकं शतं च १२०५०१२० पद्महृदे पद्मानि महापद्मादिष्वप्येवैव कमलानां संख्येति ॥१३॥

तस्मात् हृदात् पूर्वद्वारतोरणात् पञ्चयोजनशतानि पूर्वस्यां पर्वतस्योपरिगङ्गावर्त्तकूटादावृत्य दक्षिणाभिमुखं पञ्चयोजनशतानि त्रयोविंशानि साधिकान्यष्टकलायुतान्यतिक्रम्य द्विगव्यूतदीर्घात् मकरमुखान्निसृत्य गंगाप्रपातकुण्डे निपतति। तच्च कुण्डे षष्टि योजनायाम विस्तारमुपरिष्टादधस्तु दशयोजनन्यूनं दशयोजनावगाढं वज्रमयतलं त्रिद्वारतोरणं सोपानादियुतं तन्मध्ये गङ्गाद्वीपोऽष्टयोजनायामविष्कम्भो गव्यूतद्वयं जलादुपरिगतस्तन्मध्ये भवनं तत्र पीठिकाया गङ्गादेव्याः शय्येति ततो दक्षिणतोरणाद् विनिर्गत्य विजयाढ्यपर्वतं जगतीं च विभिद्य चतुर्दश नदीसहस्रपरीता जलधिं प्रविवेश गङ्गा तस्या हृदाद् विनिर्गमे मकरमुखे कुण्डात् प्रवाहे च सक्रोशानि षट् योजनानि विस्तारः क्रोशार्द्धमुद्वेधः मुखप्रस्तारः प्रवाहाद् दशगुणः। उक्तं च—

जो जीसे वित्थारो सलिलाए होइ आढवंतीए। सो दसहिं पडिपुन्नो मुहवित्थारो मुणेयव्वो ॥

उद्वेधस्तु सर्वत्र प्रस्तारात् पञ्चाशत्तमो भागः। यत उक्तम्—

जो जस्स उ वित्थारो सलिलाए होइ जंबूदीवम्मि।
पन्नासइमं भागं तस्सुवेहं वियाणाहि ॥

तथाऽस्या अपि द्वे अपि तटे वेदिका वनखण्डवती न चैतद् यादृच्छिकं। यदागमः—गंगा णं महानदी जाव उभओ पासे ॥ ८ ॥

दोहिय पउमवर वेइयाहिं दोहि य वणसंडेहिं संपरिक्खित्ता एवं पश्चिमतोरणद्वारान्निर्गता सिन्ध्वावर्त्तकूटादावृत्य विवृतमुखाकारा-न्नालान्निपत्य सिन्धुदेवी निवासं कुण्डमध्ये कृत्य तथैव जलधिं गता सिन्धुनदी ॥१४॥

तथोत्तरतोरणाद् विनिर्गता गङ्गा द्विगुणमानपरिवारा स्वनामकुण्डे निपत्य शब्दापातिनं गव्यूतद्वयेनाऽसंस्पृशंती ! हैमवतं क्षेत्रं मध्ये कृत्यापरोदधिं गता रोहितांशा हिमवति सर्वरत्नमयान्येकादशकूटानि । तद्यथा–क्षुल्ल १ हिमवद् २ भरत ३ इला ४ गङ्गा ५ श्री ६ रोहितांशा ७ सिंधु ८ सूरा ९ हेमवत १० वैश्रमणा ११ ख्यानि तेषां मूलविस्तार उच्चत्वं पञ्च योजन शतानि शिखरविस्तारस्तु तदर्द्धमानः प्रथमकूटे क्षुल्लनाम्नि सिद्धायतनं पञ्चाशद् योजनानि दीर्घं तदर्द्धं पृथुलं षट्त्रिंशद् योजनोच्छ्रायं, तस्मिन् त्रीणि द्वाराणि तेषामायामाऽष्टौ योजनानि तदर्द्धं विष्कम्भः । अष्टयोजनायाम विष्कम्भा तस्य मध्ये मणिपीठिका सा चत्वारि योजनानि पृथुला तदुपरिदेवच्छंदकस्तत्प्रमाणः आयामोच्छ्रायाभ्यां किञ्चिदधिकः तत्र प्रतिमा यथा वैताढ्याद्यकूटे प्रोक्ताः शेषेषु दशसु कूटेषु सार्द्धद्वाषष्टि योजनोच्छ्रयाः साक्रोशैक त्रिंशद् योजन विस्ताराः सिंहासनादियुताः प्रासादाः सन्ति ॥१५॥

हिमवन्महाहिमवतोरन्तराले भरताच्चतुर्गुण विस्तारं पूर्वापरयोर्लवणजलधिं प्राप्त स्वनामदेवाधिष्ठायकं दशविधकल्पपादप-प्रभावोपढौकिताऽभिलषिताहारनेपथ्याभरण शयनीया वासादिलालितवपुभिर्युगलिकैर्विराजितं । हैमवतनामकं द्वितीय क्षेत्रमस्ति । तत्र ते युगल धर्मिणश्चतुः षष्टि पृष्ठ करण्डक भ्राजितमेकगव्यूतोच्चं चतुर्थभक्तान्ते कृतमनोभिलषिताऽऽहारं रोगजरापमृत्यु दुःख दौर्मनस्यादि रहितमेकपल्योपमायुर्देहं दधानाः पर्यन्ते एकोनाशीति दिनान्यपत्यानि पालयित्वा स्वस्य समस्थितिष्वल्पस्थितिषु वा देवेषूत्पद्यन्ते । अत्र च केचिदेतेषां चणक बदरामलक प्रमितमाहारमेकद्वित्रिगव्यूतप्रमाण शरीराणां क्रमेणापरे चाष्टादश



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यञ्जनाकुलां रसवतीं भोजनतयाऽभिदधति तत्र सकर्णानां कर्णमवतंसति । यतः–सर्कराजित्वररसा पृथ्वीकल्पवृक्षाणां पुष्पानि फलानि च तेषामाहारतयोपयुज्यन्ते । आह चागमः–पुढवी पुप्फ फलाहारा तेणं मणुया पन्नत्ता, तत्र च सिंह व्याघ्रसर्पबिडालादयो दुष्टतिर्यञ्चोऽपि क्षेत्रस्वाभाव्यात् मिथो हिंस्य हिंसकभाववर्जिताः प्रतनुकषायतयाऽवतिष्ठन्ते । अतस्तद्भवभावितत्वा अपि देवगतिमेवाऽश्नुवते । दंशमशकयूका मत्कुण प्रमुखाः शरीरसंतापकारिणः क्षुद्रजन्तवस्तुमूलतोऽपि न भवन्ति । कालस्तत्र सुषम दुःषमारूप एक एव । तन्मध्ये पञ्चवर्णरत्नमयः सर्वतः सहस्रयोजनप्रमाणः पल्याकारः शब्दापाती वृत्तवैताढ्यपर्वतः येऽमुं रजतमयमभिदधति तेषां जम्बूद्वीपप्रज्ञप्त्या सह विरोधः तत्र ह्येवमुक्तम्–कहि णं भंते ! हेमवए वासे सद्दावइ नामं वट्टवेयड्ढ पव्वते गोयमा रोहियाए महानईए पुव्वपच्छिमेणं रोहियंसाए महानईए पुरत्थिमेणं हेमवयवासस्स बहुमज्झदेसभागे इत्थ णं सद्दावइनामं वट्टवेयड्ढपव्वए पन्नत्ते एगं जोयणसहस्सं उड्ढं उच्चत्तेणं अड्ढाइज्जाइं जोयणसयाइं उव्वेहेणं सव्वत्थसमे पल्लगसंठाण एगं जोयण सहस्सं आयाम विक्खंभेणं तिन्नि जोयणसहस्साइं एगं च बावडं जोयणसयं किंचि विसेसाहियं परिक्खेवेणं सव्वरयणामए अच्छे इत्यादि उमास्वाति वाचकोऽप्येवमेवाह–तथा च तद् वाक्यं वृत्तो विविधरत्नमयः सर्वतः साहस्रः शब्दापाती गिरिरिति अत एतद्वर्णके पक्षेऽत्र समासे रययमधा इत्युक्तं तन्न संवावदीति किन्तु 'रयणमया' इति संवादीपाठ इति । तथा तदुपरि स्वाति देवभवनं हिमवत् कूटप्रासाद सदृशं तदुत्तरो हैमवतक्षेत्राद् द्विगुणविस्तारोऽर्जुनमयो योजनशतद्वयोच्चो महा हिमवान् तत्र बहुमध्ये पद्महृदादिद्विगुणायामविष्कम्भो महा पद्महृदः कृत ह्रीदेवीनिवासः पद्मानि पद्महृदसन्त्यत्र एतद्दक्षिणतोरणान्निःसृत्य पञ्चकलाधिकानि पञ्चोत्तराणि षोडशयोजनशतानि पर्वतमुल्लङ्घ्य रोहितादेव्याधिष्ठितगङ्गाप्रपात कुण्डाद् द्विगुणायामविष्कम्भे दश



For Private and Personal Use Only

योजनोद्वेधे रोहिता प्रपातकुण्डे निपत्य निपत्य शब्दापातिनं चतुर्थांशेन परिधाय गव्यूतद्वयेना स्पृशन्त्यष्टाविंशत्या नदीसहस्रैः समं रोहितांशा समविस्तारा रोहिता पूर्वोदधिं प्राविशत् तथोत्तरद्वाराभ्निर्गत्य प्रवहे पञ्चविंशति योजनायामा सुरे चतुर्दशगुणविस्तारा स्वनाम्निकुण्डे निपत्य एकयोजना स्पृष्टगन्धापातिका प्रवहेमुखे च क्रमेणार्द्ध पञ्चयोजनोद्वेधा षट्पञ्चाशन्नदीसहस्रसहिता हरिकान्ता पश्चिमोदधिं गता तस्मिन् पर्वतेऽष्टौ कूटानि तद्यथा–सिद्धायतन १ महा हिमवद् २ हैमवत ३ रोहिता ४ ह्री ५ हरिकान्ता ६ हरित् ७ वैडूर्य ८ नामानि हिमवत्कूट तुल्यानि स्वनामधेयदेवतानि ॥१६॥

तस्मादुत्तरस्यां दिशि हरिवर्ष क्षेत्रं तत्र युगलिनः प्रागुक्तयुगलिकेभ्यो द्विगुणविशेषणाः केवलं कृत चतुःषष्टि दिनाऽपत्यपालनाः षष्ठप्रान्तविहिताहाराश्च तस्य बहुमध्यदेशभागेऽरुणदेववसतिः शब्दापाती च शिष्टो गन्धापाती कालस्तु तत्र सुषमारूप सदैव ॥

तदुत्तरो हरिवर्षक्षेत्राद् द्विगुणविस्तारश्चतुःशतयोजनोच्छ्रयस्तपनीयमयो निषधगिरिः तदुपरि महापद्माद् द्विगुणायामविष्कम्भो दशयोजनावगाढ पद्महूद विशिष्टपद्मपूर्णो धृतिदेवीनिवासस्तिगिञ्छिहूदस्तद्दक्षिणदिग्भागे सैककलानि सप्तसहस्राणि चत्वारि शतान्येकविंशति योजनानां पर्वतमुल्लङ्घ्य स्वनामकुण्डमध्ये कृत्यहरिकान्तावत् केवलं पूर्वोदधिंगता हरिच्छलिला उत्तरेण शीतोदा निर्गता तस्याः प्रवाहा जिह्विका च पञ्चाशद् योजनानि हरिन्नदीकुण्डाद् द्विगुणकुण्डा निषध १ देवकुरु २ सूर्य ३ सुलस ४ विद्युत्प्रभ ५ हूदान् विभिद्य चतुरशीत्या नदीसहस्रैरन्वीता भद्रशालवनमध्यप्रवृत्ता योजनद्वयान्तरमलगंती अपरदिगभिमुखं विद्युत्प्रभविदारिकाऽपरविदेहं द्विधाविधाय एकैकस्मात् विजयादष्टाविंशति नदीसहस्रानुगता जयन्तद्वारादधो जगतीं विदार्य पञ्चाशद्योजनायामा दशयोजनो द्वेधा पश्चिमजलधिमधिगता तस्मिन् पर्वते नव कूटानि। तद्यथा–सिद्धायतन १ निषध २ हरिवर्ष ३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राग्विदेह ४ हरित् ५ धृति ६ शीतोदा ७ ऽपरविदेह ८ रुचकाभिधानानि हिमवत्कूटसदृशानि ॥

निषधादुत्तरो वैडूर्यमयस्तिगिञ्छिप्रतिच्छन्दः केसरिहूदमध्यो नीलवान् वर्षधरस्तत्र नवकूटानि । तथाहि–सिद्धायतन १ नील २ प्राग्विदेह ३ शीता ४ कीर्ति ५ नारी ६ अपरविदेह ७ रम्यको ८ पदर्शन कूटा ९ ख्यानि निषधकूटमानानि । ततः केसरिहूदाद्दक्षिणदिशि सैककलानि सप्तयोजनसहस्राणि चत्वारि शतान्येकविंशत्यधिकानि पर्वताधित्यकामुल्लङ्घ्य स्वनामदैवत कुण्डमध्ये कृत्यनीलो १ त्तरकुरु २ चन्द्रैरवत ४ माल्यव ५ हूदान् विभिद्य भद्रशालसत्क चतुरशीति नदीसहस्रपरीतामाल्यवद् विदेह विजयद्वारच्छेदिनी पूर्वोदधिं गता सीता शेषं शीतोदावत् ॥

निषधनीलवंत वतरा(?)महाविदेहः लक्षं योजनानि तस्य मध्यदैर्ध्यं विष्कम्भस्तु निषधाद् द्विगुणः तन्मध्ये सहस्रयोजनावगाढो नवनवति योजनसहस्रोच्चः भूमितले दशसहस्रविस्तारः उपरि सहस्रयोजनायामः रत्नमध्यः स्वर्णमयो मेरुगिरिः तदुपत्यकायां पूर्वापरयोर्द्वाविंशति द्वाविंशति योजनसहस्रायामं उत्तरदक्षिणयोस्तु प्रत्येक सार्द्धयोजनशतद्वयविस्तारं नानावृक्षकलितं भद्रशालवनं तन्मध्ये मेरुपर्वतात् पञ्चाशत् पञ्चाशत् योजनैर्हिमवत् सिद्धायतनप्रमाणानि चतुर्दिश्यानि चत्वारि सिद्धायतनानि तावत्तैव विदिक्षु पञ्चाशत् पञ्चाशद्योजनायामास्तदर्द्धविष्कम्भा दशदश योजनावगाढाश्चतस्रश्चतस्रो वाप्यः । तन्नामानि यथा–पद्मा १ पद्मप्रभा २ कुमुदा ३ कुमुदप्रभा ४ उत्पलगुल्मा १ नलिनी २ उत्पला ३ उत्पलोज्ज्वला ४ भृंगी १ भृङ्गनिभा २ अञ्जना ३ कज्जलप्रभा ४ श्रीकान्ता १ श्रीमहिता २ श्रीचन्द्रा ३ श्रीनिलया ४ पूर्वोत्तरक्रमादवगन्तव्याः तन्मध्ये प्रासादाः पञ्चशतयोजनोच्चास्तदर्द्धविस्ताराः सिंहासनरुचिराश्चत्वारस्तेषु दाक्षिण्यात्यौ सौधर्मेन्द्रस्य उदीच्यौ त्वीशानेन्द्रस्य शीता शीतोदयोर्नद्योः कूलद्वयेऽपि द्वौ द्वौ कूट-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पर्वतौ दिग्गजनामानौ तन्नामानि शीता नद्या उत्तरदिग्भागाद् दक्षिणावर्त्तनेन गण्यानि तानि चेमानि-पद्मोत्तर १ नील २ सुहस्त ३ अंजन ४ कुमुद ५ पलाश ६ वडंश ७ रोचन ८ इति एते कूटगिरयः स्वनामदेवा ततो मेरुमूलादुत्पत्य योजनानां पञ्चशत्या नन्दनं वनं तत्र दिक्षु चतसृष्वपि हिमवत्कूटसमानि चत्वारि सिद्धायतनानि विदिक्षु प्राग्वत् प्रासादान्विताः पुष्करिण्यस्तथाहि-नन्दोत्तरा १ नन्दा २ सुनन्दा ३ नन्दिवर्द्धनी ४ नन्दिषेणा १ अमोघा २ गोस्तूपा ३ सुदर्शना ४ भद्रा १ विशाला २ कुमुदा ३ पुंडरीकिणी ४ विजया १ वेजयंती २ जयंती ३ अपराजिता ४ अस्यां च मेखलायामष्टौ दिक्कुमारीणां कूटानि तथाहि-नंदन १ मन्दर २ निषध ३ हैमवत ४ रजत ५ रुचक ६ सागरचित्र ७ वज्र ८ नामानि। एतेष्वष्टौ दिक्कुमार्योऽवतिष्ठन्ते। ताश्चेमाः-मेघकारा १ मेघवती २ सुमेघा ३ मेघमालिनी ४ तोयधरा ५ विचित्रा ६ वारिषेणा ७ बलाहकेति ८ एता देव्यो जिनजन्मनि मेघवर्षां विदधति। तथैशानकोणे सहस्रयोजनोच्छ्राय विस्तारमुपरिष्टादर्द्धायामं बलकूटं स्वनामदैवतं तच्च पञ्च योजनशतानि नन्दनवनाद् बहिर्निःसृतमुक्तं च-

नंदणवणं रुंभेत्ता पंचमए जोयणाइं नीसरिउं। आयासे पंचसए रुंभेत्ता ठाइ बलकूडो ॥

ततो द्विषष्टिसहस्राणि पञ्चशताधिकानि योजनानामुपरिष्टादारुह्य सौमनसं वनं नन्दनवनसदृशं केवलं कूटानि तत्र न सन्ति वाप्यो यथा-सुमनाः १ सौमनसा २ सौमनान्ता ३ मनोरमा ४ उत्तरकुरु १ देवकुरु २ वीरसेना ३ सरस्वती ४ विशाला १ माघभद्रा २ भयसेना ३ रोहिणी ४ भद्रोत्तरा १ भद्रा २ सुभद्रा ३ भद्रवती ४ शेषं तथैव ततः षड्विंशत् सहस्राणि योजनानामुपरि गत्वा सौमनसविशिष्टं पण्डकवनं तद्विस्तारः सहस्रयोजनानि बहुमध्यदेशभागे चूला चास्य सा उपर्यधो द्वादशचतुर्योजनायामा



For Private and Personal Use Only

चत्वारिंशद्योजनोच्चा वैडूर्यमयी तस्या उपरि सिद्धायतनं विजयार्द्धसदृशं मध्ये वनं विदिक्षु षोडशपुष्करिण्यस्तद्यथा-पुंड्रा १ पुंड्राभा २ सुरक्ता ३ सुरक्तवती ४ क्षीररसा १ इक्षुरसा २ ऽमृतरसा ३ वारुणी ४ शंखोत्तरा १ शंखा २ शंखावर्त्ता ३ बलाहका ४ पुष्पोत्तरा १ पुष्पवती २ सुपुष्पा ३ पुष्पमालिनी ४ प्रासादाः सिद्धायतनानि च प्राग्वत् वनान्ते चतसृषु दिक्षु एकैका जिनाभिषेकशिला तद्यथा-प्राच्यां पाण्डुशिला १ दक्षिणस्यामतिपाण्डुशिला २ अपाच्यां रक्ताशिला ३ उत्तरायामतिरक्ताशिलेति ४ ताश्च सर्वा अर्द्धचन्द्रसंस्थानस्थिताः पञ्चयोजनशतायामास्तदर्द्धविस्ताराश्चतुर्योजनोत्सेधाःअर्जुनकनकनिर्माणाः तासु पण्डुकम्बल-रक्तकम्बलयोरुपरि द्वे द्वे सिंहासने शेषयोस्त्वेकैकं सिंहासनानां च सर्वेषामायामो विष्कम्भश्च पञ्च धनुःशतानि तदर्द्धं पृथुत्वं प्राच्यापाच्येषु विजयोद्भवा जिना अभिषिच्यन्ते इतरयोस्तु भरतैरावतोत्पन्नास्तीर्थंकरा इति ॥

तथा चतसृष्वपि मेरोर्विदिक्षु गजदन्ताकारवक्षस्कारनामानः पर्वताः सन्ति इदमुक्तं भवति यथा गजस्यदन्ता मूल स्थूलास्ततः क्रमेण हीयमाना यावदन्ते सूक्ष्माः एवमेतेऽपि आदौ निषधनीलवन्तौ निकषा चतुर्योजनशतोच्चाः पञ्चयोजनशतविस्तारास्तत उच्चत्वे क्रमेण वर्द्धमाना विस्तारे तु हीयमानास्तुरगा कन्धराकृतयो यावन्मेरुसमया पञ्चयोजनशतान्युच्चा अङ्गुलासङ्ख्येयभाग-विस्तारा भवन्ति ते चामी—आग्नेय्यां रजतमयः सप्तकूटपरिस्कृतः सौमनसः १ नैऋत्यां तपनीयमयो नव कूटान्वितो विद्युत्प्रभः २ वायव्यां हिरण्यमयः सप्तकूटो गन्धमादनः ३ ऐशान्यां वैडूर्यमयो नवकूटाङ्कितो माल्यवान् ४ प्रत्येकमेतेषां त्रिंशद्योजनसहस्राणि नवोत्तरं शतद्वयं कलाषट्कं चायामः सर्वेषु प्रथम प्रथम कूटे सिद्धायतनं कूटानि चामूनि हिमवत्कूटप्रमाणानि एषां नामानि मेरुदिग्वि-भागाद् गणनीयानि तथाहि—सौमनसे वक्षस्कारगिरौ सिद्धायतन १ सौमनस २ मङ्गलापाति ३ देवकुरु ४ विमल ५ काञ्चन ६



For Private and Personal Use Only

वशिष्टानि ७ पश्चमषष्ठयोस्तोयधारा विचित्रेदेवते तथा विद्युत्प्रभ २ देवकुरु ३ पद्म ४ कनक ५ स्वस्तिक ६ शीतोदा ७ सदाजल ८ हरि ९ नामानि कनकस्वस्तिक कूटयोः पुष्पमालाऽनिन्दिते देवते तथा गन्धमादने सिद्ध १ गन्धमादन २ गन्धलाव ३ दुत्तरकुरु ४ स्फटिक ५ लोहित ६ आनन्दानि ७ पश्चमषष्ठयोर्भोगंकराभोगवत्यौ देव्यौ तथा मालवति सिद्ध १ माल्यव २ दुत्तरकुरु ३ कच्छ ४ सागर ५ रजन ६ शीता ७ पूर्णभद्र ८ हरिस्सहानि ९ सागररजतयोर्भोगाभोगमालिन्यौ देव्यौ शेषाणि स्वनामतुल्य-दैवतानि एतेषु हरिस्सहरिकूटे सहस्रयोजनोच्छ्रायायामे उपरिष्टात्तु पश्चयोजनशतविस्तारे शेषाणि प्राक्कथित प्रमाणानि ॥

मन्दरगन्धमादननीलवन्माल्यवतां मध्ये उत्तरकुरुक्षेत्रम् । तच्चैकादशयोजनसहस्राणि द्विचत्वारिंशान्यष्टौ शतानि च कलाद्वयाधिकानि विस्तीर्णम् । तत्र मिथुनधर्माणो युगलिनस्त्रिगव्यूतोच्चाः अष्टमभक्तावसानकृताहारास्त्रिपल्यपरमायुषः षडधिकार्द्धतृतीयपृष्टकरण्डिकाङ्कितततनवः सुषमसुषमाकालमनुभवानः कल्पद्रुमफलसंतुष्टा एकोनपश्चाशद्दिनान्यपत्यानि पर्यन्ते प्रतिपाल्य सुखमृत्यवो देवेषूत्पद्यन्ते । अथ शीतायाः प्राच्यामपाच्यां च नीलवंतस्तु याम्यायामष्टौ शतानि चतुस्त्रिंशानि यादृशा सप्तभिर्योजनं भवति तादृशांश्चतुरो भागांश्चातिक्रम्य द्वौ यमकपर्वतौ तयोर्मूलविस्तार उच्चत्वं च सहस्रं योजनानि उपरि तदर्द्धो विस्तारः तयोरुपरि कनकमयौ प्रासादौ हिमवद्वत् तावति च दक्षिणदिशि नीलाद्याः हृदाः । उक्तं च—

जावइयम्मि पमाणं मिहुंति जमगाओ नीलवंताओ ।
तावइयमंतरं खलु जमगवहाणं दहाणं च ॥ इति ॥

ते च उदग्दक्षिणयोर्दीर्घाः पूर्वापरयोर्दिशोरेकैकस्यदशदश काश्चनगिरयः स्वनामदेववसतयस्तेषांउच्चत्वं मूलविस्तारश्च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शतं शतं योजनानि उपरि तु पञ्चाशद्योजनानि परस्परंशिखरव्यवधानं शतं शतं योजनानां मूले तु नास्त्यन्तरम् ॥

तथा शीतायाः प्राच्यां पञ्चशतयोजनायामविस्तारअभ्यन्तरे द्वादशयोजनपृथुलं क्रमेण हीयमानं यावदर्द्धयोजनमानं जम्बूनदमयं जम्बूपीठमस्ति । तच्च द्विगव्यूतोच्चया पञ्चधनुःशतविस्तीर्णया पद्मवरवेदिकया परिक्षिप्तम् तस्य चतसृष्वपि दिक्षु द्विक्रोशोच्छ्रयाणि तदर्द्धविस्ताराणि ध्वजतोरणवन्दनमालादिभासितानि चत्वारि द्वाराणि तथा च बहुमध्ये चतुर्योजनोच्छ्रयाऽष्टयोजनायामा मणिपीठिका तस्या उपरिष्टाज्जम्बूवृक्षा स चाष्टयोजनविष्कम्भोच्छ्रयः वज्रमयमूलः तस्यावगाहः स्कन्धश्च द्वे यजने षड्योजनदैर्घ्याः शाखाः ताश्च सौवर्णाः स्कन्धःपत्राणि च वैडूर्यमयानि प्रवालमयाः पल्लवाः रत्नमयानि फलानि प्राच्ये शाले भवनं तत्र मणिपीठिकायामनावृतदेवस्थानं शेषेषु प्रासादाः मध्ये सिद्धायतनं सर्वाणि विजयार्द्धप्रमाणानि तत्परिवेष्टनेऽष्टोत्तरं शतं जम्बूनां परिवार जम्बूसंख्या पद्महृद पद्मवत् एतदधिपतिरनादृतो देवः ततः पञ्चाशतं योजनान्यतिगम्य प्रथमवनखण्डे चतसृषु दिक्षु भवनानि विदिक्षु चतसृणां पुष्करिणीनां मध्ये प्रासादाः भवनप्रासादमध्येऽष्टौ कूटानि ऋषभे कूटप्रमाणानि जाम्बूनदानि तेषु सिद्धायतनानि शालिवनपूर्वोत्तरादिप्रासादेषु सिंहासनानि ॥

मन्दराद्दक्षिणे देवकुरु निषधोत्तरौ चित्रविचित्रौ यमकवत् ह्रदास्तु निषधादयः तदपरार्द्धे गरुडावासः शाल्मलितरु जम्ब्वा सदृशवर्णकः ॥

प्रागपरयोर्विदेहयोर्द्वात्रिंशद् विजयाः । तथाहि—प्राग्विदेहः शीतयाऽपरविदेहस्तु शीतोदया द्विधा कृतः पुनरेकैको विभागश्चतुर्भिश्चतुर्भिर्वक्षस्कारैस्तिसृभिस्तिसृभिश्चान्तर्नदीभिरन्तरा निपत्याष्टधाकृता ततोऽष्टभिश्चत्वारो गुणिता जाता यथोक्त ॥१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संख्या विजयाः, तथा दाक्षिणात्यागङ्गासिन्धुभ्यां नदीभ्यामौदीच्यास्तु रक्तारक्तोदाभ्यां विभज्य त्रिधा कृताः पुनः प्रतिविजयं वैताढ्येन निपत्यषट्खण्डानि कृतानि । उक्तं च—

विजयं पडिवेयड्ढो गंगा सिंधू समादुदुन्नि नई । तेहिं कया छ खंडा, विदेह बत्तीसविजयाणं ॥ इति

तत्रैकस्य विजयस्यायामः षोडश योजनसहस्राणि द्विचत्वारिंशान्यष्टौ शतानि कलाद्वयाधिकानि तथा विस्तारोद्वाविंशतिशतानि त्रयोदशोत्तराण्यर्द्धगव्यूतनानि निषधनीलवंतयोर्नितम्बे प्रतिविजयमेकैकमृषभकूटं शीताशीतोदयोर्गङ्गासिन्धुसङ्गमे क्रमेण मागधप्रभासौ तीर्थे वरदामतीर्थे तु तयोबहुमध्यदेशभागे इति । इह भद्रशालमुखवनयोर्मध्ये चत्वारो वक्षस्कारास्तदन्तरे तिस्रो नद्यस्तासामन्तराले ऽष्टौ विजयाः । सर्वेऽपि चतुर्भिर्गुणिताःजातान्यष्टौ वनानि, षोडश वक्षस्काराःद्वादशान्तर्नद्यो द्वात्रिंशद् विजयाः । प्रतिविजयं च द्वे द्वे महानद्यौ निषधसविधवर्त्तिकुण्डाद् विनिर्गते गङ्गासिन्धूनाम्न्यौ केवलमौदीच्येषु षोडशसु विजयेषु माल्यवदुपकण्ठस्थितकुण्डान्नि-सृते नामतोरक्तारक्तवत्यौ सरितौ विद्येते । तत्र वक्षस्काराणां नामानि यथा-चित्र १ पद्म २ नलिन ३ एकशैलाः ४ त्रिकूट १ वैश्रमण २ सुदर्शना ३ ञ्जनाः अङ्कवत् १ पद्मवत् २ आशी विषन्नसुखावहा ४ चन्द्र १ सूर्य २ नाग ३ देव ४ गिरयः इति प्रतिवक्षस्कारा चत्वारि कूटानि सिद्धायतना १ स्वनाम २ पूर्वविजया ३ ऽपरविजयाख्यानि । तथान्तर्नद्यः कुण्डनिर्गमा कुण्डमध्यद्वीपाः स्वनामदेवीवसतयः शीताशीतोदानुगामिन्यः प्रत्येकं पञ्चविंशत्याधिकशतयोजनविस्तारा दशगव्यूताऽवगाहाः, ताश्च द्वादशनामतो यथा-ग्राहवती १ ह्रदवती २ वेगवती ३ तप्तजला १ मत्तजला २ उन्मत्तजला ३ क्षीरोदा १ सिंहश्रोतोऽ २ न्तर्वाहिन्यः ३ ऊर्मिमालिनी २ फेनमालिन्य इति ३ ॥ विजया यथा-कच्छ १ सुकच्छ २ महाकच्छ ३ कच्छव ४ दावर्त्त

५ मङ्गलावर्त्त ६ पुष्कर ७ पुष्करवंत ८ वच्छ १ सुवच्छ २ महावच्छ ३ वच्छव ४ द्रम्य ५ रम्यक ६ रमणीय ७ मंगलवंत ८ पद्म १ सुपद्म २ महापद्म ३ पद्मव ४ च्छह्न ५ कुमुद ६ नलिन ७ सलिलवंत ८ वप्र १ सुवप्र २ महावप्र ३ वप्रवद् ४ वल्गु ५ सुवल्गु ६ गंधिल ७ गंधिलवंत ८ गिरिभिर्नदीभिश्च विभक्ताः। प्रतिविजयं चैकैका नगरी तद्यथा–क्षेमा १ क्षेमपुरी २ अरिष्टा ३ ऽरिष्टवती ४ खड्गी ५ मंजूषा ६ औषधी ७ पुंडरीकिण्यः ८ सुसीमा १ कुण्डला २ ऽपराजिता ३ प्रभाकरी ४ अङ्कवती ५ पद्मावती ६ शुभा ७ रत्नसंचया ८ अश्वपुरा १ सिंहपुरा २ महापुरा ३ विजयपुरा ४ राज्या ५ विराज्या ६ शोका ७ वीतशोका ८ विजया १ वैजयंती २ जयंती ३ अपराजिता ४ चक्रपुरी ५ खड्गपुरी ६ ऽवध्या ७ ऽयोध्या ८ एताः सर्वाः पुर्योभरताऽयोध्या प्रतिकृतय इति। इह वक्षस्कारान्तर्नदी विजयपुरीणां सर्वेषां गणनाक्रमो माल्यवद् वक्षस्कारादवगन्तव्यः तथा विजयादीनां वैताढ्येषु प्रत्येकं पार्श्वद्वयेऽपि पञ्चपञ्चाशन्नगराणि सन्ति यतो नितम्बद्वयमपि समानदैर्घ्यं भरतैरावतयोस्तु धनुःपृष्ठाकारत्वान्मध्यबाह्ययोः पार्श्वयोर्महदन्तरमतः तत्रैकस्यां दिशि पञ्चाशदन्यस्यां तु षष्टिः सजनपदानि पुराणीति। नीलवतपरतो रम्यकं क्षेत्रं हरिवर्षवत् केवलं नाम्ना माल्यवानिह वृत्त वैताढ्यः, ततः परो महाहिमवत् प्रतिच्छायो रुक्मी शैलः तदुपरि बुद्धिदेवीनिवासो महापद्मप्रतिरूपो महापुण्डरीको ह्रदः कूटानि अष्टावत्र तानि चामूनि सिद्ध १ रुक्म २ रम्यक ३ नरकान्त ४ बुद्धि ५ रौप्य ६ हैरण्यवत ७ मणिकाञ्चन ८ नामानि। तत्र दक्षिणा नरकान्ता पूर्वगा हरिकान्तावत् १ रूप्य कूलोत्तराऽपरदिग्गामिनी रोहितावत् तदनन्तरं हैरण्यवतक्षेत्रं हैमवतप्रख्यं, नवरं तन्मध्ये नामतो विकटापाती वृत्तवैताढ्यः प्रभासदेवाधिवासः किं च सर्वेऽपि वृत्तवैताढ्या एकप्रमाणवर्णाः तदुत्तरः स्वर्णमयः शिखरि वर्षधरः लक्ष्मीनिवासः पद्मविशिष्टः ॥१३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुण्डरीको ह्रदस्तत्र तस्माद्दक्षिणां दिशमाश्रित्य रोहितांशा सदृशी सुवर्णकूला रक्तारक्तवत्यौ तूत्तरगे गङ्गासिन्धू इव प्रमाणतः। तदुपरिष्टाच्चैकादश कूटानि तद्यथा-सिद्धायतन १ हैरण्यवत २ शिखरी ३ सुरादेवी ४ रक्ता ५ लक्ष्मी ६ सुवर्ण ७ रक्तोदा ८ गन्धापाति ९ ऐरवत १० तिगिंच्छि ११ संज्ञानि हिमवत्कूटसदृशं सर्व क्षेत्राणामुत्तरदिगवस्थितं भरत प्रतिकल्पमैरावतं वैताढ्यस्तु व्यत्ययनगरसंख्य इति। तथाऽस्माज्जम्बूद्वीपादसंख्येषु द्वीपसमुद्रेष्वतिक्रान्तेषु कश्चिज्जम्बूद्वीपाभिधानो द्वीपोऽस्ति तस्मिन् सर्वे विजयादिद्वारवर्षपर्वतकूटनदीह्रदवृक्षविजयाद्यधिष्ठातॄणां देवानां राजधान्यः सन्ति। उक्तं च जम्बूद्वीपप्रज्ञप्तौ-रायहाणीओ जंबुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं तिरियं असंखिज्जेदीवसमुद्दे वीईवइत्ता अन्नम्मि जंबुद्दीवे दीवे बारसजोयणसहस्साइं ओगाहेत्ता इत्थ णं रायहाणीओ भाणियव्वाओ। तासां विशेषवर्णनं क्षेत्रसमासबृहद्वृत्तेरवसेयमिति समस्तप्रकरणसमुदायार्थः।

**दोसय कणयगिरिणं, चउगयदंता य तह सुमेरु य। छ वासहरा पिंडे, एगुणसत्तरि सया दुन्नी ॥१२॥**

अथ पुनरक्षरार्थो भणिष्यते। तत्र व्याख्यायमानक्रमागतं चतुर्थं पर्वतद्वारमाह-एषां क्षेत्राणां द्वात्रिंशतो त्रियजानां च मध्यवर्त्तिनो वैताढ्यास्ते च क्रमेण चत्वारश्चतुस्त्रिंशच्च वृत्ता वर्तुलाकारा इतरे तद्विपरीता दीर्घा इत्यर्थः इदमुक्तं भवति चत्वारो वृत्तवैताढ्यास्तेषां स्थानं प्रमाणं च प्रागेवोक्तं क्षेत्रसमासानुसारेण सिद्धान्तस्तत्रनाद्यानां त्रयाणां स्थानकथनेऽन्यथा व्यवस्थितः। तथाहि-शब्दापाती तद्वत् हरिवर्षे विकटापाती रम्यके गन्धापाती हैरण्यवते माल्यवानिति। तथा च तद्ग्रन्थः-कहि णं भंते हरिवासे वियडावई नामं वट्टवेयड्ढे पन्नत्ते। गोयमा! हरिसलिलाए महानईए पच्चत्थिमेणं हरिकंताए महानईए पुरत्थिमेणं हरिवासस्स बहुमज्झदेसभागे इत्थ णं वियडावईणामं वट्टवेयड्ढे पन्नत्ते। तथा कहि णं भंते! रम्मए वासे गंधावई नामं वट्टवेयड्ढे

पन्नत्ते । तथा नरकंताए पच्चत्थिमेणं नारीकंताए पुरत्थिमेणं रम्मय वासस्स बहुमज्झदेसभागे गंधावइनामं वट्टवेयड्ढे पन्नत्ते । इति तत्त्वं पुनः केवलिनो विदन्ति । दीर्घ वैताढ्यास्तु द्वात्रिंशत् विदेहेषु प्रतिविजयमेकैकस्य भावात् द्वौ च भरतैरावतयोः सर्वमीलने चतुस्त्रिंशत् वक्षस्कारगिरयः षोडशचित्रादयो ये विजयच्छेदिनः, तथा द्वाविति द्विसंख्यौ कावित्याह–चित्तविचित्त त्ति प्राकृतशैल्याद् विभक्तिलोपः ततः चित्रश्च विचित्रश्च चित्रविचित्रौ एतयोर्हि निषधमुत्तरेण शीतोदाया अपरस्यां चित्रगिरिः प्राच्यां तु विचित्रः तथाऽन्यौ द्वौ यमकौ नीलवतो दक्षिणतः शीतायाः प्रागपरस्थितौ एतेषां चतुर्णां समुदितानामपि यमका इति क्वचित् संज्ञा दृश्यते कनक गिरयः काञ्चन गिरयस्तेषां द्वे शते शतद्वयं तद्यथा–कुरुषु समुदिता नीलवदादयो दश ह्रदाः एकैकस्य ह्रदस्य वामतो दक्षिणतश्च प्रत्येकं दश दश कनकनगाः ततः पार्श्वद्वयेऽपि विंशति विंशति सर्वमीलने जातं शतद्वयम् । तथा गजदन्ताकारत्वात् गजदन्ता विद्युत्प्रभादयश्चत्वारः ते हि मेरोर्विदिक्षु स्थिताः तथेति सादृश्योपन्यासार्थः । चः समुच्चये । सुष्ठु मनोहरः सुवर्णरत्नमयत्वात् मेरुर्मन्दरः वर्षधरा हिमवदादयः षट् । सर्वसङ्ख्यामाह–पिण्डेत्यादि पिण्डे सर्वसमूहे एकोनसप्तत्यधिके द्वे शते भवत इति शेषः ॥११–१२॥ उक्तं पर्वतद्वारमधुना कियत्सु पर्वतेषु कियन्ति कूटानि भवन्तीति पञ्चमद्वारमाह—

**सोलस वक्खारेसु, चउ चउ कूडा य होंति पत्तेयं । सोमणस गंधमायण, सत्तट्ठ य रुप्पि महहिमवे ॥१३॥**

सोलसे त्ति । षोडशसु चित्रादिषु वक्षस्कारनगेषु चत्वारि चत्वारि कूटानि पर्वतस्योपरिष्टादुच्चैर्गतानि शृङ्गाणि कूटानीति सामयिकी संज्ञा तथा सौमनसगन्धमादनयोः सप्त सप्त इह विभक्तिलोपो वीप्सोत्तरत्रापि प्राकृत शैल्याद् विज्ञेया च पुनरर्थे रुक्मिमहाहिमवतोर्वर्षधरयोरष्टावष्टौ एकमेकं प्रति प्रत्येकं ततः प्रत्येकं कूटानि भवन्तीति सर्वत्र योज्यम् ॥१३॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चउत्तीस वियड्ढेसुं, विज्जुप्पहनिसढ नीलवंतेसु । तह मालवंत सुरगिरि, नव नव कूडाइं पत्तेयं ॥१४॥

चउतीसे त्ति । चतुस्त्रिंशति वैताढ्येषु विजयभरतैरावत विच्छेदकेषु दीर्घवैताढ्येषु तथा विद्युत्प्रभश्च निषधश्च नीलवांश्च ते तथोक्तास्तेषु, तथेति सादृश्ये, माल्यवांश्च सुरगिरिश्च माल्यवत् सुरगिरीस्तयोस्तथोक्तयोः प्राकृतशैल्याद् विभक्तिलोपः एतेषु प्रत्येकमेकोनचत्वारिंशति पर्वतेषु नव नवकूटानि भवन्ति ॥१४॥ तथा–

हिमसिहरिसु इक्कारस, इय इगसट्ठी गिरिसु कूडाणं । एगत्ते सव्वधणं, सयचउरो सत्तसट्ठी य ॥१५॥

हिमेति–पदैकदेशेऽपि पदसमुदायोपचारात् हिमवान्, यथा भीमो भीमसेनश्च, हिमवांश्च शिखरी च हिमवच्छिखरिणौ तयोस्तथोक्तयोरिह प्राकृतत्वात् सूत्रे बहुवचनम् । यत उक्तम्–दुवयणे बहुवयणमिति । प्रत्येकमेकादशैकादशकूटानि भवन्ति । समस्तकूटगिरीणां कूटानां च सर्वाग्रहमाह–इय इगसट्ठीत्यादि इति वक्ष्यमाणप्रकारेण एकेनार्गला षष्टिरेकषष्टिस्तस्यामेकषष्टौ गिरिषु आधारभूतेषु पर्वतेषु एकत्वे सर्वाङ्के सर्वघनं निखिलसमुदायः सप्तषष्ट्यर्गलानि चत्वारि शतानि ४६७ कूटानां भवन्तीति शेषः ॥१५॥ अथ सर्वकूट संख्यानयनायकरणमाह–

चउसत्त अट्ठ नवगे, गारसकूडेहिं गुणह जह संखं । सोलस दु दु गुणयालं, दुवे य सगसट्ठि सय चउरो ॥१६॥

चउसेत्ति–चतुः सप्ताष्टनवैकादशाभिः कूटैर्यथासङ्ख्यं यथाक्रमं यथोपन्यासमिति यावत् गुणयतः गुणकारप्रवृत्तान् कुरुत हे गणितज्ञा इति गम्यते । कानित्याह–सोलसेत्यादि । षोडश द्वौ द्वौ एकोनचत्वारिंशतं द्वौ चेति । तद्यथा–



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षोडशानां चतुर्भिर्गुणने चतुः षष्टिः द्वयोस्तु सप्तभिर्गुणने चतुर्दश तथा द्वयोरेवाऽष्टभिर्हनने षोडश, एकोनचत्वारिंशतो नवभिरभ्यासे सैक पञ्चाशानि त्रीणि शतानि, द्वयोः पुनरेकादशानां गुणकारे जाता द्वाविंशतिरिति एतावता सर्वाङ्केन का सङ्ख्या भवतीत्याह–सगसट्ठेत्यादि सप्तषष्ठयधिकानि चत्वारि शतानि कूटानां भवन्तीति गाथार्थः ॥१६॥

इदानीं गिरिशिरः स्थितानि कूटान्यभिधाय भूमिस्थ(स्तमिच्छ)कूट संख्यानमाह—

चउतीसुं विजएसुं, उसह कूडा अट्ठ मेरु जंबुम्मि। अट्ठ य देवकुराए, हरिकूड हरिस्सहे सट्ठी ॥१७॥

चउतीति। ऋषभकूटानि प्रागुक्तस्थानानि विजयेषु जिनाद्युत्तम पुरुषोत्पत्तिक्षेत्रेषु चतुस्त्रिंशत् भवन्ति। तथा मेरौ मन्दरगिरौ जम्ब्वामनादृतदेवनिवासवृक्षेषु प्रत्येकमष्टावष्टौ। चःसमुच्चये। देवकुराविति तदाधेये शाल्मलिवृक्षेऽष्टावष्टसङ्ख्यानि तथाहि मेरुकूटानि शीताशीतोदोभयकूलवर्त्तीनि दिग्गजनामानि उत्तरकुरौ जम्बूवृक्षसत्कवनमध्ये प्राक्प्रपञ्चितान्यष्टौ कूटानि, एवमेव देवकुरौ शाल्मलिवनमध्येऽष्टावेव हरिकूटहरिस्सहकूटे विद्युत्प्रभमाल्यवतोर्वक्षस्कारयोरुपरिस्थिते सामस्त्येन किं जातमित्याह-सट्ठीति। षष्टिस्तिस्रो विंशतय इति गाथार्थः। इह यत् हरिकूटहरिस्सहौ भूमिकूटानां मध्ये निबद्धौ तन्न घटते तयोर्वक्षस्कारयोरुपरि भावात्। तदुक्तम्—

'विज्जुप्पहहरिकूडो हरिस्सहो मालवंतवक्खारे'

इति। तथैतादृशाभिधानं भूमिकूटमपरं जम्बूद्वीपमध्ये न दृश्यते बृहत्क्षेत्रसमासाद्यनुसारतः ये तु वक्षस्कारशिरःस्थे ॥१५॥

For Private and Personal Use Only

हरिकूट–हरिस्सहकूटे, ते गिरिकूटप्रस्तावे सप्तषष्ट्यधिक चतुःशतकूटमध्ये पठिते । तत इयं अडवन्नधरणिकूडा इति पाठो युक्तः । एतदर्थमाह–इत्युक्तप्रकारेण धरणिस्थानि कूटानि धरणि कूटान्यष्टापञ्चाशद् भवन्ति । तथा च–यद्यपि भूमिस्थिताः शिलोच्चयाः सर्वेऽपि पर्वता भण्यन्ते तथाऽप्येषां क्षेत्रसमासादिषु कूटानीति संज्ञा । इयं गाथा पुराण पुस्तकेषु न दृश्यते परमुपयोगिनीति कृत्वा व्याकृतेति गतं पञ्चमं पर्वतद्वारम् ॥१७॥ अधुना षष्ठं तीर्थसंख्यामाह–

मागह वरदामपभास, नित्थ विजएसु एरवयभरहे। चउतीसा तीहिं गुणिया, दुरुत्तरसयं तु तित्थाणं ॥१८॥

मागहे त्ति । मागधश्च वरदाम च प्रभासश्च मागधवरदामप्रभासास्त एव तीर्थानि मागधवरदामप्रभासतीर्थानि, प्राकृतशैल्यात् सूत्रे विभक्तिलोपः । तथा तीर्थशब्दः प्रत्येकं सम्बन्धनीयस्तेन मागधतीर्थं १ वरदामतीर्थं २ प्रभासतीर्थं ३ चेति क्व चैतानि सन्तीत्याह–विजया महाविदेहमध्यवर्त्तिनः खण्डविशेषास्ते च सर्वसङ्ख्यया द्वात्रिंशत् तेषु तथा ऐरवतं च भरतं चेति समाहारद्वन्द्वस्तस्मिन्नैरवतभरते श्रोतारमनुलक्ष्य चरमे प्रथमे च क्षेत्रे सन्तीति शेषः । उत्तरार्द्धेन सर्वसङ्ख्यानयनाय करणमाह–चउतीसेत्यादि तीर्थानां सर्वाग्रे द्वाभ्यामुत्तरमधिकं शतं दशदशकलक्षणं द्व्युत्तरशतं । तुः पादपूरणे । भवतीत्यध्याह्रियते कथमित्याह–चतुर्भिरधिका त्रिंशत् चतुस्त्रिंशत्, त्रिभिर्गुणिता गुणकारविषयीकृता सतीति गाथार्थः ॥१८॥

अथ सप्तमं श्रेणिद्वारमाचिख्यासुराह–

विज्जाहर अभिओगिय, सेढीओ दुन्नि दुन्नि वेयड्ढे। इय चउगुण चउतीसा, छत्तीससयं तु सेढीणं ॥१९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विज्जाहरे त्ति । विद्याधराः खेचराः अभियोगा पारवश्यं, तत्र नियुक्ता आभियोगिकास्तेत्विह सम्प्रदायात् सौधर्मेशानयोर्देव-लोकयोः प्रेष्य प्रायाः सुरा ज्ञेयास्तेषां श्रेणयः प्रागुक्तस्वरूपाः वैताढये विजयाढयपर्वते एकैकस्मिन्निति गम्यते द्वे द्वे प्रत्येकं ज्ञातव्येति शेषः । तथाहि एकैकस्मिन् वैताढये एकस्यामेकस्यां दिशि एकैका विद्याधरश्रेणिरेकैका चाभियोगिकदेवनिवासश्रेणिः समुदिताः पार्श्वद्वयेऽपि चतस्रश्चतस्रो भवन्ति । अपरार्द्धेन संख्यानयनाय करणमाह–इयेत्यादि इत्यनेन प्रकारेण चतुस्त्रिंशच्चतुर्गुणा चतुर्भिर्गुणिता किं भवतीत्याह–श्रेणीनां षट्त्रिंशदधिकशतं भवति गतं श्रेणिद्वारम् ॥१९॥ अधुना गाथाद्धेनाष्टमं विजय-द्वारमाह–चक्की जेयव्वाई विजयाइं इत्थहुंति चउतीसा ।

चक्कीत्ति । इत्यत्र जम्बूद्वीपेऽस्मिन् प्रकरणे वा विजयाश्चतुस्त्रिंशद् भवन्ति । किं विशिष्टा इत्याह–चक्कीत्यादि । चक्रं सहस्रयक्षाधिष्ठितः प्रहरणविशेषस्तदस्त्यस्येति चक्री सार्वभौमः यः षट्खण्डां भुवं भुनक्तीत्यर्थः तेन जेतव्या वशमानेतव्या इति । तथा चतुस्त्रिंशदिति वदता सूत्रकारेण भरतैरावते क्षेत्रे अपि विजयत्वेनारोपिते उत्तमपुरुष निषेवितत्वान्न चैतदनागमिकं यदुक्तं समवायाङ्गे—

'जंबुद्दीवे णं दीवे चउतीसं चक्कवट्टि विजया पन्नता । तं जहा–बत्तीसं महाविदेहे भरहेरवइ त्ति' । इह सूत्रे सविशेषणस्य विजयशब्दस्य नपुंसकत्वं प्राकृतत्वान्न दोषायेति ॥ अथ नवमं ह्रदद्वारं गाथा पाश्चात्यार्द्धेनाह—

महदह छप्पउमाई, कुरुसु दसगं ति सोलसगं ॥२०॥



For Private and Personal Use Only

महदहेत्ति। पद्मो हिमवद्गिरिशिरःस्थं आदिर्येषां ते पद्मादयः छेति षट्सङ्ख्याकाः आदिग्रहणान्महापद्मतिगिंच्छिकेसरिमहापुण्डरीकपुण्डरीकाणां ग्रहः। क एते ? इत्याह–महद्दहत्ति। महते इतरहूदापेक्षया गुरुका हूदा नदा महाहूदाः तथा कुरवो देवकुरव उत्तरकुरवश्च तेषु दश सङ्ख्या मानमेषां दशकं हूदानामिति गम्यते पंच हूदा देवकुरुषु चेत्यर्थः। अथ सर्वाग्रमाह–समासप्राग्वत् षोडशकमिति मिलिताः सर्वेऽपि षोडश इह भवन्तीति ॥२०॥ इदानीं **दशमं नदीद्वारमाह—**

**गंगा सिंधु रत्ता, रत्तवई चउ नईओ पत्तेयं। चउदसहिं सहस्सेहिं, समगं वच्चंति जलहिम्मि ॥२१॥**

गंगे त्ति। गङ्गा सिन्धु रक्ता रक्तवत्यः प्रागुक्तस्वरूपाश्चतस्रश्चतुःसङ्ख्याका नद्यो सरितः प्रत्येकं पृथक् पृथक् चतुर्दशभिश्चतुर्दशभिर्नदीसहस्रैः सममेव समकं सार्द्धं जलधिं व्रजन्ति प्रविशन्तीति यावत् ॥२१॥

**एवं अब्भिंतरिया चउरो पुण अट्ठवीससहस्सेहिं। पुणरवि छप्पन्नेहिं सहस्सेहिं जंति चउसलिला ॥२२॥**

एवं अब्भिंतरये त्ति। एवमित्यनेन प्रकारेण यथा एता गङ्गाद्या एकप्रमाणाश्चतस्रो जलधिं प्रविशन्ति तथाऽभ्यन्तरं गच्छन्तीत्यभ्यन्तरगाः, मध्यवर्त्तिन्यश्चतस्रो नद्यो रोहितांशा रोहिता रूप्यकूला सुवर्णकूला लक्षणाः, पुनर्विशेषणे किं विशिनष्टि ? तदाह–प्रत्येकमष्टाविंशत्याऽष्टाविंशत्या नदीसहस्रैःसमन्विता जलधिं प्रविशन्तीति प्राच्यगाथा सम्बन्धोऽध्याहार्यः। तत्र रोहितांशा रोहिते हेमवत्क्षेत्रं रूप्यकूला सुवर्णकूले तु हैरण्यवतं च मध्येकृत्य प्रवहन्ति। तन्मध्यवर्तिनीनां पुनराधिक्यं दर्शयति–पुणरवीत्यादि। पुनरपि प्रागुक्तनदीभ्यो मध्यगामिन्यश्चतस्रो हरिकान्ता हरित्सलिला नारिकान्ता नरकान्ताभिधानाः सरितः पृथक् पृथक् षट्पञ्चाशता

पट्पश्चाशता नदीसहस्रैः सह यान्ति जलनिधिमिति शेषः। तथा हरिकान्ता हरिच्छलिले हरिवर्षे नारिकंता नरकान्ते पुना रम्यकं द्विधा विदधते। एवं महाविदेहव्यतिरिक्तेषु षट्सु क्षेत्रेषु त्रीणि लक्षाणि द्विनवतिसहस्राणि ३९२००० नद्यो भवन्ति ॥२२॥ इदानीं महाविदेहनदीनां संख्यामाह—

**कुरुमज्झे चउरासी, सहस्साइं तह य विजयसोलससु। बत्तीसाण नईणं, चउदससहस्साइं पत्तेयं ॥२३॥**

कुरुत्ति। कुरुव इत्युत्तरकुरवः पदैकदेशेऽपि पदसमुदायोपचाराद् यथा भामा सत्यभामेति तेषां मध्ये विचाले चतुरशीतिसहस्राणि नद्यः। तथेति शब्दोविशेषोद्योतकः। चः पादपूरणे। विजयेषु प्राग्विदेहमध्यवर्तिषु षोडशसु द्विरष्टसङ्ख्यावच्छिन्नेषु द्वात्रिंशतो गङ्गासिन्धु प्रायाणं प्रत्येकं चतुर्दशसहस्राणि भवन्ति। तथाहि एकस्मात् कच्छदेशविजयात् प्रत्येकं चतुर्दशभिश्चतुर्दशभिःसहस्रैः सह द्वे नद्यो रक्ता रक्तवती नाम्न्यौ शीतायां प्रविशतः प्राक् सामस्त्येन तत्राष्टौ विंशति सहस्राणि नद्यो भवन्ति। एष एव क्रमः सर्वेषु। विजयेषु यथा पूर्वविदेहेषु विजयाःषोडश १६ प्रतिविजयं चाष्टाविंशति सहस्राणि नद्यः अपरविदेहमाश्रित्योक्तं च—

विजया वि य इक्केका अट्ठावीसाइ नइ सहस्सेहिं। आउरमाणसलिला अवरेणुदहिसमणुपत्ता ॥

इति ततोऽष्टाविंशतेः सहस्राणां षोडशभिः गुणकारेजाताश्चतस्रो लक्षाः अष्टाचत्वारिंशत् सहस्राधिकाः ४४८०००नद्यः पुनः पूर्वोक्ताश्चतुरशीति सहस्रा उत्तरकुरुमध्यगा नद्य एतासां मध्ये प्रक्षिप्यन्ते, जातानि द्वात्रिंशत् सहस्राधिकानि पञ्चलक्षाणि ५३२००० नदीनां तथाऽनेनैव पर्यायेण देवकुरुष्वपरमहाविदेहानां सम्बन्धिषु विजयेष्वपि एतावत्य एव ५३२०००



For Private and Personal Use Only

सरितः । ततोऽस्यांङ्कराशिद्वयस्य मीलने जातानि दशलक्षाणि चतुःषष्टिसहस्राधिकानि १०६४००० तथैदंकराशिमध्य पूर्वोक्तानि त्रीणि लक्षाणि द्विनवति सहस्राधिकानि क्षिप्यन्ते ततो भवन्ति समस्त जम्बूद्वीपे षट्पश्चाशत् सहस्राधिकानि चतुर्दशलक्षाणि १४५६००० सर्वाग्रेण नद्य इति ॥ २३ ॥

एवं व्याख्याने कृते विजयच्छेदिनीनां ग्राहवत्यादीनां षण्णां नदीनां प्ररूपणा उपेक्षिता भवत्यतस्तद्वर्णनाय वाचनान्तरेण द्वितीयं प्रकारमाह–

**चउदससहस्सगुणिया, अडतीसनईओ विजयमज्झिल्ला । सीओयाए निवडंति, तह य सीयाइ एमेव ॥२४॥**

चउदसे त्ति । अन्ये आचार्या एवमाचक्षतेऽष्टात्रिंशत् विजयमध्यवर्त्यः शीतोदायां निपतन्ति प्रविशन्ति किं विशिष्टास्ता? इत्याहचतुर्दशभिर्नदीसहस्रैर्गुणिताऽभ्यस्ताः पुनः कीदृश्यस्तास्तद्यथा–द्वात्रिंशद् रक्ताद्या नद्यस्तथा षट्ग्राहवत्याद्या एवं सामस्त्येनाऽष्टात्रिंशत् षोडश विजयेषु सन्ति । ततश्चतुर्दशसहस्रैर्गुणिताऽष्टात्रिंशत्जातानि पश्चलक्षाणि द्वात्रिंशत् सहस्राधिकानि ५३२०८० । तथेति सादृश्ये, यथा शीतोदायामेवमेवेति । अनेनैव प्रकारेण पश्चलक्षाणि द्वात्रिंशत् सहस्राधिकानि ५३२००० शीतायामपि भवन्तीति ततो राशिद्वयस्याप्येकीकरणे चतुःषष्टिसहस्राधिकानि दशलक्षाणि १०६४००० सरितो भवन्ति ॥

इत्थं च व्याख्यायमाने कुरुमध्यगाश्चतुरशीतिसहस्राणि सरितो न गृहीतास्तासां स्थाने ग्राहवत्यादयः षडन्तर्नद्यः प्रत्येकं चतुर्दशनदीसहस्र–समन्वितास्ततश्चतुर्दशषट्कानि चतुरशीतिरिति गणनाक्रमेण चतुरशीतिनदीसहस्रसङ्ख्यां पूरयित्वा यथोक्ता सङ्ख्या समाहिता । परमयमपि प्रकारो न सम्भवति । यतोऽन्तर्नद्यो गङ्गादिभ्यःसकाशाद् द्विगुणविस्तारा:प्रतीयन्ते–पणवीससमयं च

सलिलाओ' इति वचनात् ततो द्विगुणोऽष्टाविंशतिनदीसहस्रलक्षणः प्रत्येकमासां परिवारो न्याय्यः। आह चोमास्वाति वाचक नद्यो विजयच्छेदिन्यो रोहितावत् च कुण्डद्वीपाः स्वनामदेवीवासाः अष्टाविंशति नदीसहस्रानुगाः प्रत्येकं सर्वसमाः पञ्चविंशत्यधिकं योजनशतं विस्तृताः अर्द्धतृतीययोजनावगाहाः ग्राह हृदपङ्कवत्यादि। अतः षण्णामप्येतासामष्ट षष्टिसहस्राधिकं लक्षमेकं सरितः परिवारः। तथा पञ्चलक्षाणि सद्वात्रिंशत् सहस्राणि पुनः सकुरूणां विजयानामन्तर्नदीरहितानां भवन्ति एवं राशिद्वयस्य मीलने पूर्णानि सप्तलक्षाणि सरितः एतावत्य एवापरविदेहे देवकुरुसमन्विते ततः समस्तमहाविदेहे चतुर्दशलक्षाणि १४०००००० सलिलाः। पुनःस्त्रीणि लक्षाणि नवति सहस्राधिकानि भरतादीनां शेषाणां षट्क्षेत्राणां एवं सर्वाङ्के सप्तदशलक्षाणि द्विनवतिसहस्राधिकानि १७९२००० नद्यो भवन्तीत्युक्तं च सूत्रे–

चउदसलक्खा छप्पन्नसहस्स जंबुदीवम्मि। हुंति उ सत्तरसलक्खा बाणवइसहस्ससलिलाओ ॥ इति

तथा सिद्धान्तानुसारेण पुनरेवं ज्ञायते यत् ग्राहवत्यादीनां द्वादशनदीनां परिवारो न सम्भवति। यत एतद्व्यतिरिक्ता जम्बूद्वीपे या अन्याः सरितः सन्ति तासां प्रवाहात् मुखे सर्वासां दशगुणो विस्तारः सुप्रतीतव उक्तं च वाचकमुख्येन सर्वा नद्यः प्रवाहः दशगुणे मुखे विस्तार पञ्चाशद् भागावगाहा इति। एतासां तु तथा न किन्तु प्रवाहमध्ये मुखे चैकरूपः पञ्चविंशत्यधिकयोजन-शतलक्षणः प्रत्येकंविस्तारः नान्यः कश्चिद्विशेषो न च परिवारोऽप्यासां दृश्यते क्षेत्रसमासबृहद्वृत्त्यनुसारेण अतः प्रतीयते यद्येता-स्वन्या अनेकानि सहस्राणि नद्यः प्रविशेयुः तदा कथं क्रमेण परतः परतो गच्छन्तीनां विस्तारविशेषो गङ्गादीनामिव न सम्पद्येतेति। अन्यच्च पूर्वविदेहे भद्रशालवनसमीपवर्त्तिनोः कच्छमङ्गलावतीविजययोस्तथा मुखवनोपकण्ठस्थयोः पुष्कलावतीवच्छनाम्नोश्च ॥१८॥

विजययोरन्तनदीनामभाव एवास्ति अत एतेषु चतुर्ष्वपि प्रत्येकं सामस्त्येनाष्टाविंशतिरष्टाविंशतिसहस्राणि नद्यःसन्ति। गङ्गासिंधु-सम्बन्धिन्यो नापराः। यावती च कच्छविजये भूमिरन्तर्नदीमतां सुकच्छादीनां द्वादशानामप्येन्येषां च तावत्येव नाधिका, अतः कथं तेषु बहुतरा नद्यो ग्राहवत्याद्यन्तर्नदीसंयोगेऽपि विशेषभूमेरभावात् सम्भवन्ति? अत्राह—नैतत् संवादकोटिमाटीकते यतो जम्बूद्वीपप्रज्ञप्तावप्यन्तर्नदीनां प्रत्येकमष्टाविंशति नदीसहस्रलक्षणः परिवारो भणितस्तथा च तद्वाक्यं " गाहावई महानई पवूढा समाणी सुकच्छमहाकच्छविजये दुहा विभयमाणी २ अट्ठावीसाए सलिला सहस्सेहिं समग्गा दाहिणेणं सीयं महानई समुप्पेई " अपरेऽनूचानाः पुनरित्थं प्रवदन्ति—यथा अष्टाशीतिग्रहाश्चन्द्रस्यैव परिवारतया प्रसिद्धा अपि सूर्यस्यैव एत एव परिवारः न पुनरन्यः पृथक् प्रतीयते। उक्तं च समवायाङ्गवृत्तौ अष्टाशीति महाग्रहा एते यद्यपि चन्द्रस्यैव परिवारोऽन्यत्र श्रूयते तथापि सूर्यस्यापीन्द्रत्वादेतदेवपरिवारतयाऽवसेया इति तथा गङ्गासिन्धुसम्बन्धिन्य एवाष्टाविंशतिरष्टाविंशतिर्नदीसहस्राणि अन्तर्नदीनामपि परिवार इति एवमपरविदेहेऽपि ज्ञातव्यमिति ॥ २४ ॥

अथ सूत्रकारोऽमुमेवार्थं स्पष्टयन् सकलजम्बूद्वीप—नदीनां संख्यामाह—

**सीया सीओया वि य, बत्तीससहस्स पंचलक्खेहिं। सव्वे चउदसलक्खा, छप्पन्नसहस्स मेलविया ॥२५॥**

सीया इति—शीता नदी पञ्चभिर्लक्षैर्द्वात्रिंशता सहस्रैर्नदीभिः समं जलधिं व्रजन्तीति पूर्वतरगाथायाः सम्बन्धो गृह्यते। तथा शीतोदा अपि पृथगेतावतैव परिवारेणावगन्तव्याः। ततः सर्वसंख्यया किं जातमित्याह—सव्वेत्यादि सर्वे नदीवाचिनोऽङ्का इति गम्यते। यदि वा प्राकृत्वाल्लिङ्गव्यत्यये सर्वा नद्यः मेलविय त्ति मेलिता इति णिगन्तोऽपि मूलार्थद्योतकः यथा रामो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्यमकारयदकरोदित्यर्थः, ततो मिलिताः समुदिताश्चतुर्दश लक्षाणि षट् पञ्चाशत् सहस्राणि अष्टसप्ततेर्नदीनां परिवारस्ताश्चेमाः चतुर्दशगङ्गाद्या ह्रदसम्भवाः तथा कुण्डप्रभवा गङ्गासिंधुप्रमाणाः प्रति विजयं द्वे द्वे इति कृत्वा द्वात्रिंशति विजयेषु चतुः षष्टिः, ग्रावहत्याद्या द्वादश तु परिवारहीना अन्तर्नद्य एवमेता नवतिर्महानद्यो भवन्ति जम्बूद्वीपे परं पूर्वोक्तात् षट् पञ्चाशत् सहस्राधिक चतुर्दशलक्षलक्षणात् परिवारादेताः समधिका विज्ञेयाः न पुनस्तन्मध्ये गणनीयाः। यतो 'गङ्गा सिन्धू रत्ता रत्तवई' इति गाथया चतुर्दशसहस्रसङ्ख्यः परिवारो मूलनदी व्यतिरिक्त उक्त इत्यादि। आशाम्बरमतानुसारिणोऽप्येवमेवाहुः तथा च तद् ग्रन्थः—

जंबुद्दीवनराहिव संखासव्वनइ चउदहय लक्खा।
छप्पन्नं च सहस्सा, नवई नईओ कहंति जिणा॥ इति ॥ २५॥

सम्प्रति महानदीनां प्रवहमुखयोर्विस्तारमाह—

**छज्जोयण सकोसे, गंगासिंधूण वित्थरो मूले। दसगुणिओ पज्जंते, इय दुदुगुणणेण सेसाणं॥२६॥**

छज्जोयणे त्ति। गङ्गासिन्ध्वोः सादृश्याद् रक्तारक्तवत्योरपि मूले प्रवहे ह्रदान्निस्सारे इति यावत्, सक्रोशानि सगव्यूतानि षट्योजनानि विस्तरः प्रपञ्चः, पर्यन्ते समुद्रादिप्रवेशे दशगुणितोदशगुणः सार्द्धद्वाषष्टियोजनरूपो विस्तारो भवति। तथाऽभ्यन्तराणां रोहितांशादीनां स्वरूपमाह—इय इत्यादि। इत्यनया दिशा शेषाणां द्वाभ्यां द्वाभ्यां गुणनं द्वि द्वि गुणनं तेन द्वि द्वि गुणनेन विस्तारः शेषाणामवशिष्टानामनुक्तानामिति यावत् लभ्यते इति शेषः। तद्यथा-रोहितांशा—रोहिता—रूप्यकूला—सुवर्णकूलानां प्रवहे द्वादशपर्यन्ते पञ्चविंशंशतं योजनानि विस्तारः। तथा तन्मध्यानां हरिकान्ता हरित्सलिलानारीकांता नरकान्तानां हृदतोरणान्निर्गमे



For Private and Personal Use Only

पञ्चविंशतिर्जलधिप्रवेशे तु सार्द्धशतद्वयं योजनानि। पुनः शीताशीतोदयोस्तोरणान्निःसारं पञ्चाशत् पर्यन्ते पञ्चशतानि योजनानां प्रपञ्च इति गाथार्थः॥ २६॥

इदानीं सूत्रकारः स्वयमेव मुग्धावबोधार्थं वर्षधराणामुच्चत्वं वर्णयन्नाह—

**जोयण सयमुच्चिट्ठा कणयमया सिहरि चुल्लहिमवंता। रुप्पि महाहिमवंता, दुसउच्चा रुप्पकणयमया॥२७॥**

जोयणे त्ति। शिखरी पर्यन्तवर्ती वर्षधरः, चुल्ल इति क्षुल्लो महाहिमवतापेक्षया लघुर्हिमवान् क्षुल्लहिमवान् एतौ योजनशतमुच्चिवद्धावुच्छ्रितौ कीदृशावित्याह—कनकं स्वर्णं तन्मयौ तद्वर्णावित्यर्थः। तथा रुप्पीत्यादि रुक्मिमहाहिमवंतौ द्वे शते योजनानामिति गम्यते। उच्चिवद्धावुच्छ्रितौ द्विशतोच्चौ तथा रूप्यकनकमयौ क्रमेण। तथाहि—रुक्मी रूप्यमयः, महाहिमवांस्तु हिरण्मय इति। इह यद्यप्यवगाहो नोक्तः सूत्रकारेण तथाऽप्युच्छ्रयस्य चतुर्थांशमानोऽवगम्यः। उक्तं च—

सव्वे वि पव्वयवरा, समयक्खित्तम्मि मंदरविहूणा।
धरणितले अवगाढा, उस्सेह चउत्थयं भायम्मियं॥ इति॥ २[illegible]॥

**चत्तारि जोयणसए, उव्विद्धो निसढ नीलवंतो य। निसढो तवणिज्जमओ, वेरुलिओ नीलवंत गिरी॥२८॥**

चत्तारित्ति। निषधश्चत्वारि योजन शतानि उव्विद्ध उच्चः, न केवलमयं, नीलवांश्च तावदेवोच्चः। चः समुच्चये। तथा निषधःतपनीयमयो जात्यस्वर्णनिर्माणो रक्तवर्ण इत्यर्थः। माल्य(नील)वान् गिरिस्तु वैडूर्यमयो नीलवर्णः इति॥ २८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्प्रति स्वाभिधानप्रकाशनपुरःसरं सूत्रकारोऽर्थकरणोपसंहारमाह-

**खंडाई गाहाए, दसहिं दारेहिं जंबूदीवस्स । संघयणी सम्मत्ता, रइया हरिभद्दसूरिहिं ॥२९॥**

खंडाइत्ति जम्बूद्वीपस्याद्यद्वीपस्य क्षेत्ररूपस्य सङ्ग्रहणि समाप्ता इष्टार्थकथनेन पूर्णाकैरित्याह-दशभिर्दशसङ्ख्यावच्छिन्नैः द्वारैरुक्त स्वरूपैः किं विशिष्टैः खण्डाइत्ति खण्डादीनामुद्देशका गाथा खंडादि गाथा, तया तथोक्तया, दीर्घह्रस्वौ मिथो वृत्ताविति दीर्घत्वं ई । खंडाजोयणवासा इत्यनया सूत्रादिकथितया गाथयोपलक्षितैरिति । कैः कृते यमित्याह-श्रीहरिभद्रसूरिभी रचिता सूत्रतया निबद्धेति भद्रम् ॥

अथ वृत्तिकारस्य प्रशस्तिः ।

नित्यं श्रीहरिभद्रसूरिगुरवो जीयासुरत्यद्भुत-ज्ञान श्री समलङ्कृताः सुविशदाचारप्रभा भासुराः ।
येषां वाक्प्रपया प्रसन्नतरया शास्त्राम्बुसम्पूर्णया, भव्यस्येह न कस्य कस्य विदधे सन्तापलोपोऽवनौ ॥१॥
चित्ते श्रीकृष्णगच्छे श्रवणपरिवृढश्रीप्रभानन्दसूरि,-क्षेत्रादेः सङ्ग्रहिण्या 'अकृत' समय गौसंवदन्तीं सदर्थैः ।
एतां वृत्तिं खनन्द ज्वलनशशिमिते १३९० विक्रमाब्दे चतुर्थ्यां, भाद्रस्य श्यामलायामिह यदनुचितं तद् बुधाः शोधयन्तु ॥२॥

# इति क्षेत्रसङ्ग्रहणिवृत्तिः समाप्ता



For Private and Personal Use Only

# તપોવન સંસ્કાર પીઠ

## જ્ઞાનકોષ(જ્ઞાનભંડાર)માં મળેલ દાનની નામાવલિ

| અનુ. | રકમ | નામ | ગામ | અનુ. | રકમ | નામ | ગામ |
|---|---|---|---|---|---|---|---|
| (૧) | ૨૫,૦૦૦/- | શ્રી શ્વે.મૂ.પૂ.જૈન સંઘ નાનપુરા | સુરત | | | | |
| (૨) | ૨૫,૦૦૦/- | અરિહંત આરાધના ટ્રસ્ટ | | | | | |
| (૩) | ૨૫,૦૦૦/- | બલસાર જૈન શ્વે.મહાવીર સ્વામી | વલસાડ | | | | |
| (૪) | ૨૫,૦૦૦/- | ડીસા.શ્વે.મૂ.પૂ.સંઘ | ડીસા | | | | |
| (૫) | ૨૫,૦૦૦/- | શ્રી સૂઈગામ શ્વે.મૂ.પૂ. જૈનસંઘ | સૂઈગામ(વાવ) | | | | |
| (૬) | ૨૧,૧૧૧/- | શ્રી પુરૂષદાનીય પાર્શ્વનાથ દેવકીનંદન જૈન સંઘ,નારણપુરા | અમદાવાદ | | | | |
| (૭) | ૨૧,૦૦૦/- | બેણપ જૈન સંઘ | | | | | |
| (૮) | ૧૫,૦૦૦/- | શ્રી કરચેલીયા જૈન શ્વેતામ્બર મહાજન ટ્રસ્ટ | કરચેલીયા | | | | |
| (૯) | ૧૧,૦૦૦/- | શ્રી તાલધ્વજ જૈન શ્વે.તીર્થ કમિટી | તળાજા(સૌરાષ્ટ્ર) | | | | |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only